FJA-II-04

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

बृहद्वास्तुमाला

फलितज्योतिषाचार्यः, द्वितीयवर्षम्
चतुर्थपत्रम्

खण्डः

१

गृहारम्भे चिन्तनीयविषयाः

प्रथमः पाठः ०७-३४

द्वितीयः पाठः ३५-५५

द्वितीयः पाठः ५६-८३

चतुर्थः पाठः ८४-१०१

पञ्चमः पाठः १०२-१२०

षष्ठः पाठः १२१-१४०

पाठलेखनम्

डॉ. चक्रधरकरः
अतिथि-अध्यापकः (ज्यौतिषम्)
(मु.स्वा.पी. स्वा.के.) राष्ट्रियसंस्कृतसंस्थानम्,
सदाशिवपरिसरः, पुरी
(१-४, ६ पाठाः)

डॉ. विष्णुनिर्मलः
सहायकाचार्यः (ज्यौतिषम्)
राष्ट्रियसंस्कृतसंस्थानम्,
वेदव्यासपरिसरः, कांगड़ा (हि.प्र.)
(५ पाठः)

सम्पादनम्

डॉ. अशोकथपलियालः
सहायकाचार्यः
श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्,
नवदेहली

पाठ्यक्रमसंयोजनम्

डॉ. श्यामदेवमिश्रः
(सहायकाचार्यः, ज्यौतिषम्)
राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः, भोपालम् (म.प्र.)

प्रकाशनम्

प्रो. रमाकान्तपाण्डेयः
निदेशकः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् – **२०१७**

ISBN : 978-93-85182-23-5

प्रयुक्तकागदम् – Agro-based environment Friendly.

पृष्ठविन्यासः

राजीवकुमारसिंहः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

संजयकुमारशर्मा
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

मुद्रकः

लक्ष्मी पब्लिकेशन्स प्राइवेट लिमिटेड
113, गोल्डन हाउस, दरियागंज, नई दिल्ली-110 002

पुरोवाक्

राष्ट्रियसंस्कृतसंस्थानं संस्कृतपरम्पराणां प्रचारे प्रसारे च सर्वथा दत्तावधानं विद्यते। निखिलेऽपि भारते संस्थानस्याऽस्य दशपरिसरा विलसन्ति। तेषु तस्मिन् तस्मिन् शास्त्रे कृतभूरिपरिश्रमा आचार्याः तानि तानि शास्त्राणि अध्यापयन्ति। तत्र विविधेषु विद्याप्रस्थानेषु दीक्षां समवाप्य अस्माकम् अनूचानाः शिष्याः सर्वासु दिक्षु संस्कृतपरम्पराया ध्वजम् उत्तोलयन्ति स्थापयन्ति भारतभारत्या नवनवान् मानदण्डान् आविष्कुर्वन्ति च सततं शास्त्रपरम्परासु अभिनवाः सम्भावनाः।

एकविंशशतकम् इदं विद्यते नवसम्भावनानां नवाविष्काराणां नवप्रयोगाणां च कालः। कालेऽस्मिन् नूतनप्रविधीनां वैज्ञानिकसंसाधनानां च प्रयोगेण संस्कृताध्ययनक्षेत्रेऽपि नवा दिश उन्मील्यन्ते। तदेतत्सर्वं मनसि निधाय राष्ट्रियसंस्कृतसंस्थानं दूरस्थशिक्षामाध्यमेन पारम्परिकसंस्कृत-शास्त्राणाम् अध्यापनाय प्रयतते। तदर्थं संस्थानमुख्यालये मुक्तस्वाध्यायपीठनाम्ना स्वतन्त्रः प्रकल्पः संस्थापितः। यस्य स्वाध्यायकेन्द्राणि जम्मू-जयपुर-गुरुवायुर-शृङ्गेरीप्रभृतिसंस्थानपरिसरेषु स्थापितानि सन्ति। एतेन प्रयासेन देशस्य कोणे कोणे स्थिताः शास्त्ररसपिपासवः जिज्ञासवः पुराणीमपि चिरतारुण्यप्राप्तां प्राचीनामपि युगानुरूपां भारतीयां सकलजनहितकारिणीं शास्त्रशिक्षां प्राप्नुवन्ति। कक्षासु नियमितच्छात्रान् अध्यापनपटवः प्राध्यापका यया शैल्या पाठयन्ति तयैव सरलसरलया पद्धत्या लिखितेयं पाठ्यसामग्री भवतः/भवत्या हस्ते विद्यते। विभिन्नेषु संस्थानपरिसरेषु तत्र तत्र नियुक्ताः प्राध्यापका एव शिक्षयन्ति। दूरस्थशिक्षामाध्यमेन अधीयानानां कृते पुनः न केवलं संस्थानस्य प्राध्यापकैः अपि तु राष्ट्रे तस्मिन् तस्मिन् विद्याप्रस्थाने सुनिपुणैः आचार्यैः लिखिता सङ्कलिता सम्पादिता चेयं पाठ्यसामग्री मुक्तस्वाध्यायपीठेन प्रकाश्य प्रेष्यत इति विशेषः।

सम्प्रति दूरस्थशिक्षामाध्यमेन व्याकरणं साहित्यं फलितज्योतिषं चेति त्रिषु विषयेषु विभिन्नाः पाठ्यक्रमाः प्रचाल्यन्ते। नातिचिरं संस्थानं न्यायवेदान्त-मीमांसादिविषयेष्वपि माध्यमेनानेन पाठ्यक्रमान् प्रचारयितुं समीहते। शास्त्राध्ययनप्रकर्षोऽयं जिज्ञासूनां महते हर्षाय उपकाराय ज्ञानाय च कल्प्यते। क्रमेऽस्मिन् पालि-प्राकृत-संस्कृतपत्रकारतादिषु प्रमाणपत्रीयपाठ्यक्रमा अपि प्रारब्धाः। मुक्तस्वाध्यायपीठस्य प्रयासैरेभिः तासु तासु परम्परासु दीक्षिताः सन्तः अध्येतारः भारतवर्षस्य गौरवाभिवृद्धये समधिकतरं प्रयासं विधास्यन्तीति दूरस्थशिक्षायाः पाठ्यक्रमेषु प्रवेशं प्राप्तवतः विद्यार्थिवृन्दान् शुभकामनाभिः सभाजयन् पाठ्यसामग्र्या अस्याः निर्माणे समुल्लासे च स्वप्रातिभं साहाय्यं दत्तवतः विदुषः मुक्तस्वाध्यायपीठस्य प्राध्यापकान् कर्मचारिणश्च वर्धापनततिभिः पुरस्करोति-

०२-११-२०१७

(प्रो. पी.एन.शास्त्री)
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्,
नवदेहली

पत्रपरिचयः

नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थाने प्रवर्तमाने दूरस्थपाठ्यक्रमे आचार्यद्वितीयवर्षस्य फलितज्योतिषविषये तृतीयपत्रे फलितविकासः बृहद्वास्तुमालाग्रन्थश्च निर्धारितोऽस्ति। आचार्य पं. रामनिहोरद्विवेदिना महाभागेन रचितोऽयं बृहद्वास्तुमालाग्रन्थः वास्तुशास्त्रस्य मानकग्रन्थानां सारभूतो वर्तते। निवासाय उपयुक्तस्थानस्य चयने सहयोगः वास्तुशास्त्रस्य उद्देश्यमस्ति। अयं 'वास्तु' शब्दः निवासार्थकः 'वस्' धातोः 'तुण्' प्रत्यये कृते सति निष्पन्नो भवति। भूमिचयनादारभ्य गृहप्रवेशपर्यन्तं सर्वेषां वास्तुशास्त्रीयसिद्धान्तानां बोधनपरोऽयं ग्रन्थः वास्तुशास्त्रमर्मज्ञानां मध्ये अत्यन्तप्रसिद्धोऽस्ति। वर्ण्यविषयदृष्ट्या काकिण्यादितः ग्रामवासविचारः गृहारम्भविधिः भूमिलक्षणं दिक्प्लवत्वविचारः भूमिशोधनविचारः खातविचारः गृहनिर्माणार्थमिष्टिकाकाष्ठादिद्रव्यविचारः आयादिसाधनं गृहारम्भादिमुहूर्तविचारप्रभृतयः वास्तुशास्त्रीय नैकनियमाः ग्रन्थेऽस्मिन् प्रतिपादिताः सन्ति। अत्र पशुगृहनिर्माण-वाटिकानिर्माण-वृक्षारोपण-वृक्षायुर्वेद-दकार्गल-वापीकूप-जलाशयादिनिर्माण-देवमन्दिरनिर्माण-देवस्थापनविधिप्रभृतीनां विविधविषयाणां सम्यक्तया वर्णिताः सन्ति। सप्तशताधिकश्लोकेषु निबद्धोऽयं ग्रन्थः वास्तुशास्त्रस्य मूलसिद्धान्तानां परिचयप्रदाने पूर्णरूपेण सक्षमो वर्तते।

——◆——

खण्डपरिचयः - (गृहारम्भे चिन्तनीयविषयाः)

नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थाने प्रवर्तमाने दूरस्थपाठ्यक्रमे आचार्यद्वितीयवर्षस्य फलितज्योतिषविषये तृतीयपत्रे बृहद्वास्तुमाला ग्रन्थः निर्धारितो वर्तते। आचार्य पं. रामनिहोरद्विवेदिना महाभागेन रचितोऽयं बृहद्वास्तुमालाग्रन्थः वास्तुशास्त्रस्य मानकग्रन्थानां सारभूतो वर्तते। अस्य पत्रस्य प्रथमखण्डे षट्पाठाः समाहिताः सन्ति। वास्तुस्वरूपादिविचारः दिक्प्लवत्वादिविचारः भूमिलक्षणविचारः इष्टिकादिविचारः गृहविभागादिविचारः अहिबलचक्रविचारश्चेति। यथा -

१. **प्रथमपाठः - वास्तुस्वरूपादिविचारः** - अस्य पाठस्य विद्वॉल्लेखकेन डॉ. चक्रधरकरमहाभागेन अस्मिन् पाठे वास्तुशास्त्रस्य परिचयः ग्रन्थग्रन्थकारयोः परिचयः वास्तुपुरुषस्वरूपं गृहादिनिर्माणफलं गृहारम्भविधिः नराकारचक्रविचारः ग्रामवासे शिवाबलिविचारः वर्गादिज्ञानं काकिणीविचारः ग्रामवासविचारः दिग्दशादिज्ञानं भूमिलक्षणविचारश्चेति विषयाः समुपस्थापिताः सन्ति।

२. **द्वितीयपाठः - दिक्प्लवत्वादिविचारः** - अस्मिन् पाठे पाठलेखकेन डॉ. चक्रधरकरमहोदयेन दिक्प्लवत्वादिफलं भूमौ वीथ्यादिविचारः पैतामहादिवास्तुलक्षणं तत्फलं च दिग्वशाद्भूमेः नतोन्नतादिफलविचारः दिग्वशाच्छुभाशुभवृक्षविचारः हलाग्रेणोद्धृत -प्राप्तवस्तुफलविचारः प्रशस्ताप्रशस्तभूमिविचारश्चेति विषयाः सुव्यवस्थितरूपेण प्रतिपादिताः सन्ति।

३. **तृतीयपाठः - भूमिलक्षणादिविचारः** - पाठेऽस्मिन् पाठलेखकेन डॉ.चक्रधर-करमहोदयेन गजपृष्ठादिभूमिलक्षणविचारः आयताद्याकारानुसारेण भूमिविचारः वासयोग्यभूमिविचारः जाग्रतादिभूमिज्ञानविधिः भूमिशयनविचारः भूमेः खननादिविचारः राहुमुखविचारः भूमिसंशोधनादिविचारः खाते पाषाणादिप्राप्तिफलविचारः भूमिपूजाविधिः पिण्डाद्भित्तिविचारश्चेति विषयाः सम्यक्प्रकारेण प्रदर्शिताः सन्ति।

४. **चतुर्थपाठः - गृहनिर्माणे इष्टिकादिविचारः** - अस्य पाठस्य विद्वॉल्लेखकेन डॉ. विष्णुकुमारनिर्मलमहाभागेन पाठेऽस्मिन् गृहनिर्माणायेष्टिकाविचारः इष्टिकाचक्रं वह्निदीपनचक्रं शिलान्यासविधिः स्तम्भस्थापनविधिः गृहनिर्माणे ग्राह्याग्राह्यकाष्ठविचारः वृक्षच्छेदनविचारः वास्तौ खातादिकृत्यं स्तम्भनामादिविचारः गृहोच्चतामानं दिक्षु गृहस्योच्चनीचत्वफलविचारश्चेति विषयाः सम्यग्रूपेण निरूपिताः सन्ति।

५. **पञ्चमपाठः - गृहविभागादिविचारः** -पाठेऽस्मिन् विद्वान् पाठलेखकः डॉ. चक्रधरकरमहोदयः दिक्परत्वेनगृहविभागाः सूतिकागृहे कालविचारः भूमिशोधनाय सूत्रविचारः शल्यनिष्कासनविधिः प्राप्तशल्यफलं चेति विषयान् सम्यक्प्रकारेण निरूपितवान्।

६. **षष्ठपाठः - अहिबलचक्रविचारः** - अस्मिन् पाठे पाठलेखकेन डॉ. चक्रधर-करमहोदयेन अहिबलचक्रस्य प्रयोजनविचारपुरस्सरं अहिबलचक्रनिर्माणविधिः चन्द्रसूर्ययोः साधनविचारः सूर्यचन्द्रयोः नक्षत्रेषु संस्थितिवशात्फलविचारः चन्द्रस्य शुभादिसंस्थितिवशात् फलविचारः चन्द्रोपरि ग्रहदृष्ट्यादिवशात्फलविचारः चन्द्रस्य संस्थितिवशाद्द्रव्यप्राप्तिविचारः नवविधद्रव्याधिष्ठापकाः तेषां पूजनप्रकारश्च सम्यक्तया प्रतिपादितः।

अनेन प्रकारेण अस्यां पाठसामग्र्यां षट्पाठाः सुगुम्फिताः सन्ति ये बृहद्वास्तुमालाग्रन्थस्य मिश्रप्रकरणाख्ये प्रथमप्रकरणे वर्णिताः सन्ति। मन्ये प्रथमखण्डोऽयं स्वाध्यायमुक्तपीठस्य अध्येतृणां कृते महत्सहायको भविष्यतीति।

___◆___

प्रथमः पाठः – वास्तुस्वरूपादिविचारः

पाठसंरचना

१.१ प्रस्तावना

१.२ उद्देश्यम्

१.३ वास्तुशास्त्रस्य परिचयः

१.३.१ ज्योतिषशास्त्रं वास्तुशास्त्रं च

१.३.२ ग्रन्थस्य परिचयः

१.३.३ ग्रन्थकारस्य परिचयः

१.३.४ वास्तुपुरुषस्वरूपम्

१.३.५ बृहद्वास्तुमालायां वास्तुपुरुषस्वरूपम्

१.४ गृहादिनिर्माणफलम्

१.४.१ गृहनिर्माणहेतुः

१.४.२ गृहनिर्माणफलम्

१.४.३ जीर्णोद्धारफलम्

१.४.४ परगृहनिवासफलम्

बोधप्रश्नाः

१.५ गृहारम्भविधिः नराकारचक्रविचारश्च

१.५.१ गृहारम्भविधिः

१.५.२ ग्रामवासे नराकारचक्रम्

१.६ ग्रामवासे शिवाबलिविचारः

बोधप्रश्नाः

१.७ वर्गादिज्ञानं काकिण्यादिविचारः

१.७.१ वर्गादिज्ञानम्

१.७.२ काकिणीविचारः

१.७.३ कल्पितोदाहरणम्

१.७.४ ग्रामवासविचारः

१.७.५ ग्रामवासफलम्

१.८ दिग्दशादिज्ञानम्

१.८.१ दिग्दशादिज्ञानम्

१.८.२ वास्तुप्रदीपे दिग्दशाज्ञानम्

१.८.३ दिग्दशाफलम्

१.८.४ कल्पितोदाहरणम्

बोधप्रश्नाः

१.९ भूमिलक्षणविचारः

१.९.१ भूमिलक्षणानि

१.९.२ प्रकारान्तरेण भूमिलक्षणानि

१.९.३ कल्पद्रुमोक्तभूमिलक्षणानि

१.९.४ वसिष्ठोक्त-भूमि-लक्षणानि

१.९.५ नारदमते भूमिलक्षणानि

१.९.६ भूमिलक्षणफलम्

बोधप्रश्नाः

ग्रन्थस्य मूलपाठः

१.१० सारांशः
१.११ शब्दावली
१.१२ सन्दर्भग्रन्थः
१.१३ सहायकग्रन्थाः
१.१४ बोधप्रश्नोत्तराणि
१.१५ अभ्यासप्रश्नाः

१.१ प्रस्तावना

प्रियच्छात्र! अस्याः बृहद्वास्तुमालायाः ग्रन्थस्य अध्ययनाय भवतां स्वागतम्। अयं ग्रन्थः वास्तुशास्त्रस्य विविधेषु पुस्तकेषु संगृहीतः एकः महत्त्वपूर्णः बृहत्तमग्रन्थः। अस्मिन् पुस्तके वास्तुशास्त्रस्य अत्यावश्यकानां विषयाणां समावेशः अस्ति। अस्य पुस्तकस्य अध्ययनेन भवान् व्यवस्थितमयस्य जीवनयापनस्य कलां ज्ञास्यति। जीवनयापनाय यथा भोजन-जल-वस्त्राणाम् आवश्यकता वर्तते। तथैव निवासस्य अपि भवति। परन्तु मनुष्याणाम् अतिरिक्तम् अन्येषां प्राणिनां कृते वस्त्राणाम् आवश्यकता न भवति। ते प्राणिनः भोजन-जलमतिरिच्य आवासस्य अत्यावश्यकतां अनुभवन्ति। यतोहि आवासः आधारभूतम् आवश्यकं भवति। जलचराः स्थलचराः नभश्चराः च सर्वेषां कृते निवासस्य आवश्यकता भवति। जलचराः ये जले निवसन्ति यथा मत्स्यादयः, स्थलचराः ये पृथिव्योपरि वसन्ति यथा कीटाः सरीसृपाः पशवः मानवाश्च, नभश्चराः ये आकाशे निवसन्ति यथा पक्षिगणाः देवाश्च। उक्तमपि विश्वकर्मणः

देवतानां नराणाञ्च गजगोवाजिनामपि।
निवासभूमिश्शिल्पज्ञैः वास्तुसंज्ञामितीर्यते॥ इति।

सर्वे जीवाः स्व-सामर्थ्यानुसारेण सौविध्यनुसारेण च स्वपरिवारस्य पालन-पोषणाय शीताम्बूष्णाद् रक्षणाय च गृहस्य निर्माणं कृत्वा तत्र निवसन्ति। परन्तु मनुष्यः सृष्टेः सर्वश्रेष्ठः प्राणी अस्ति तदर्थं स न केवलं तत्र स्वपरिवारस्य पालनपोषणाय गृहस्य निर्माणं करोति अपितु जीवनस्य पुरुषार्थसिद्ध्यर्थं धर्मार्थकामान् प्राप्त्यर्थं, शीताम्बूष्णाद् रक्षणाय च गृहस्य निर्माणं करोति। अत एव पुस्तकमिदं पठनेन भवान् व्यवस्थितरूपेण सुखपूर्वकं जीवनयापनाय च गृहनिर्माणविधिं ज्ञास्यति। अस्याः बृहद्वास्तुमालायाः अस्मिन प्रथमे खण्डे प्रथमपाठे भवान् वास्तुस्वरूपादिविचारं विस्तरेण पठिष्यति।

अस्मिन् पाठे भवान् गृह-भवननिर्माणादि विषये उत्तमं ज्ञानं प्राप्स्यति। बृहद्वास्तुमालायाः प्रस्तुते प्रथमे पाठे भवान् वास्तुपुरुषस्वरूपविषये विशेषरूपेण ज्ञास्यति। एतदन्तर्गतं वास्तुपुरुषस्योद्भवस्वरूपादिविषये, गृहनिर्माणहेतुः तस्य आवश्यकता प्रयोजनञ्च ज्ञास्यति। अत्र भवान् तृणपत्रजकुटीरगृहस्य निर्माणं फलम्, मृत्तिकया निर्मितगृहस्य फलम्, ऐष्टिकगृहस्य निर्माणफलम्, प्रस्तरगृहस्य निर्माणफलम्, नष्टकूप- वापी-तडाग-प्रासाद-भवनानां जीर्णोद्धारफलम्, परगृहे निवासफलम्, स्वगृहनिवासफलम्, गृहारम्भविधिः, शिवाबलिः ग्रामवासे शुभाशुभबोधनचक्रम्, वर्गादिज्ञानम्, काकिणीविचारः राशिभेदात् ग्रामवासविचारचक्रम्, तस्य फलम्, अष्टोत्तरीदिग्दशा दिग्वर्गाङ्कचक्रम्, दिग्दशाफलम्, वास्तुराजवल्लभोक्तदिग्दशाज्ञानं च पठिष्यति।

१.२ उद्देश्यम्

प्रयोजनेन विना कार्यं सफलं न भवति इति धिया अस्य पाठस्य आरम्भे पाठाध्ययनस्य उद्देश्यं जानीमः। अस्य पाठस्य अध्ययनेन भवान् वास्तुशास्त्रस्य बृहद्वास्तुमालाग्रन्थस्य ग्रन्थकारस्य च परिचयं प्राप्तवान्। अग्रे भवान् -

- वास्तुपुरुषस्वरूपं ज्ञास्यति।
- गृहनिर्माणस्य आवश्यकताविषये पठिष्यति।
- विभिन्नगृहनिर्माणफलं ज्ञास्यति।
- जीर्णगृहस्य पुनरुद्धारफलं परगृहनिवासफलं च पठिष्यति।
- गृहारम्भविधेः ज्ञानपूर्वकं वासभूमेः शुभाशुभत्वज्ञानाय नराकारचक्रविषये ज्ञास्यति।
- शिवाबलिप्रतिपादने योग्यो भविष्यति।
- ग्रामे गृहनिर्माणाय शुभस्थानस्य चयने, पूर्वादिदिक्षु वर्गबलनिर्धारणे च निपुणो भविष्यति।
- वर्णपरत्वेन भूमेः लक्षणनिरूपणे दक्षो भविष्यति।

१.३ वास्तुशास्त्रस्य परिचयः

निवासाय उपयुक्तस्थानस्य चयने सहयोगः वास्तुशास्त्रस्य उद्देश्यमस्ति। अयं 'वास्तु' शब्दः निवासार्थकः 'वस्' धातोः 'तुण्' प्रत्यये कृते सति निष्पन्नो भवति। अथवा यस्मिन् शास्त्रे भूमिः निवासाय भूमिचयनादीनां नियमानां प्रतिपादनमस्ति तच्छास्त्रम् एव वास्तुशास्त्रम् इत्युच्यते। वास्तुशब्दान्तर्गतं गृहम्, पुरम्, दुर्गम्, प्रासादः, भवनम्, क्षेत्रम्, नगरञ्चादि अनेकाः रचनाः समागच्छन्ति। अतः वास्तुशब्दस्य उत्पत्तिः निवासार्थे 'वस्' धातोः भवति इति वयं ज्ञातवन्तः। अनन्तरम् अस्य वास्तुशास्त्रस्य मूलस्रोतः किम्? कस्मिन् शास्त्रे अस्य शास्त्रस्य युक्तियुक्तं प्रमाणम् उपलभ्यते इत्यादिविषये महती जिज्ञासा समुत्पद्यते। तज्जिज्ञासायाः समाधानाय भारतीयवैदिकदर्शनस्य अध्ययनस्य आवश्यकता भवति। तदध्ययनान्तरं भवन्तः अस्मिन् विषये स्वयमेव ज्ञास्यन्ति।

विश्वस्य प्राचीनतमं ज्ञानं तथा च भारतीयाध्यात्मिकदर्शनस्य चिन्तनपरम्परायाः मूलस्रोतः वेद एव। यत्तु ज्ञानार्थके 'विद्' धातौ 'घञ्' प्रत्यये कृते सति निष्पद्यते। अत्र भारतीय- जीवनदर्शनस्य उत्कर्षं तथा सांस्कृतिकविकासस्य मणिमञ्जूषा विद्यते। अस्य वेदस्य जाज्वल्य- मानकिरणप्रभावात् भारतं जगद्गुरुः आसीत्, अस्ति च। वेदे मानवीयकार्यक्षेत्रे व्यवहृतस्य कलायाः, वास्तुविद्यायाः, स्थापत्यनिर्माणस्य च विधिरपि समुचितरूपेण विवेचितः। सुखमय-आरोग्यमय-जीवनयापनस्य शैली व्यवस्था च तत्र विशदरूपेण वर्णिता अस्ति। प्राचीनकाले वास्तुशास्त्रमिदं स्थापत्यवेदमिति नाम्ना प्रसिद्धमासीत्। तत्र निवासाय गृहनिर्माणम्, जीवनार्थम् आयुर्विज्ञानम्, मनोरञ्जनार्थं संगीत-नृत्यशास्त्रं तथा सामाजिकसंगठनार्थं तत्सम्बन्धितानाम् उपवेदानाम् अपि कल्पना दरीदृश्यते। चत्वारो वेदाः सन्ति। ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदश्च। चतुर्णां वेदानां चत्वारः उपवेदा अपि वर्णिताः। यथा ऋग्वेदस्य आयुर्वेदः यजुर्वेदस्य धनुर्वेदः सामवेदस्य गान्धर्ववेदः, अथर्ववेदस्य च स्थापत्यवेदः वर्तते। अस्य स्थापत्यवेदस्याभिप्रायः निवासयोग्या स्थापना एव। वस्तुतः भारतीयवास्तुविद्यायाः उद्गमः संसारस्य प्राचीनतमग्रन्थात् ऋग्वेदाद् भवति। तत्र वास्तोष्पतेः प्रार्थनायाम् एकः मन्त्रः मिलति। तद्यथा-

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः।
यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे॥

हे वास्तोष्पते! त्वम् अस्मान् जानीहि। गृहं नो नीरोगं कारय। यद्धनं वयं त्वत्

कामयामहे तन्नो यच्छ। द्विपदां चतुष्पदां च न कल्याणकृद् भव। एतदतिरिच्य अस्य वास्तुशास्त्रस्य पूर्णः तथा समुचितः विस्तारः अथर्ववेदेऽपि दृश्यते। तत्र गृहनिर्माणस्य सिद्धान्ताः विधयश्चापि विस्तृततरूपेण विवेचिताः सन्तीति।

१.३.१ ज्यौतिषशास्त्रं वास्तुशास्त्रं च

यथा शरीरावयवेषु चक्षोः स्थानं सर्वोत्कृष्टं भवति, तथैव षट्सु वेदाङ्गेषु ज्यौतिषशास्त्रस्य महत्त्वम् अपि वर्तते। कस्यापि मानवस्य शरीरं चेत् सर्वावयवयुक्तं किन्तु नेत्ररहितं तदा सः स्वजीवनस्य पूर्णानन्दं न प्राप्नोति। तथैव शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दसां मर्मज्ञः विद्वान् यदि ज्यौतिषशास्त्रस्य अध्ययनं न करोति तर्हि सोऽपि नेत्रविहीनः प्राणीव सर्वेषु वैदिककार्येषु सर्वदा अयोग्यः सिद्ध्यति। भास्कराचार्यैः उक्तम्–

वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।
संयुतोऽपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः॥

यथा–वेदपुरुषस्य अङ्गरूपेण ज्यौतिषशास्त्रं स्वीक्रियते। तथैव ज्यौतिषशास्त्रस्य अङ्गरूपेण स्कन्धरूपेण वा वास्तुशास्त्रं विजानीयात्। यथा ज्यौतिषशास्त्रं जनानां भूत-भविष्य-वर्तमानविषयाणां फलनिर्धारणे सहयोगं करोति, तथैव वास्तुशास्त्रम् अपि लोकानां सुख- शान्त्यारोग्याभयनिवासाय भूमेः शुभाशुभत्वनिरूपणे आवासीय-वास्तुनिर्माणे व्यवसाय-कार्यक्षेत्रस्य विधेः निर्धारणे धार्मिककार्यक्षेत्रस्य (वापी-कूप-तडाग-वाटिका-देवमन्दिर-मठ-आश्रमादीनां) च निर्माणे प्रयतते। अनेन वास्तुशास्त्रमाध्यमेन धर्मार्थकामाः यशश्च सिद्ध्यति।

१.३.२ ग्रन्थस्य परिचयः

'बृहद्वास्तुमाला' फलितज्यौतिषशास्त्रस्य प्रसिद्धेषु ग्रन्थेषु अन्यतमः ग्रन्थः। अयं ग्रन्थः फलितज्यौतिषच्छात्राणां वास्तुसम्बन्धिफलादेशसन्दर्भे बहुउपयोगी भविष्यतीति आशया राष्ट्रिय-संस्कृतसंस्थानस्य पाठयक्रमे वर्तते। सम्पूर्णः ग्रन्थः पाठ्यक्रमे निर्धारितः अस्ति। अस्मिन् ग्रन्थे वास्तुपुरुषस्वरूपम्, गृहनिर्माणस्य आवश्यकता, स्वगृहे निवासफलम्, परगृहे निवासफलम्, पत्रकुटीरनिर्माणफलम्, मृत्तिकया निर्मितगृहस्य फलम्, ऐष्टिकेन गृहनिर्माणफलम्, प्रस्तरस्य गृहस्य निर्माणफलम्, पुरातनानां वापी-कूप-तडाग-प्रासाद-भवनानां जीर्णोद्धारफलम्, गृहारम्भविधिः, निवासकर्तुः नामानुसारेण स्थानस्य चयनम्, वर्ग-काकिणीविचारः, भूमेः दोषादोषविचारः, गजपृष्ठभूमिलक्षणम्, कूर्मपृष्ठभूमिलक्षणम्, दैत्यपृष्ठभूमिलक्षणम्, नागपृष्ठभूमिलक्षणम्, वासयोग्यभूमिलक्षणम्, जाग्रतभूमिलक्षणम्, जीवितादिभूमिलक्षणम्, खातविधिः, खातमध्ये पाषाणादिप्राप्तिफलम्, भूमिपूजनविधिः, अभीष्टे शुभस्थाने पिण्डादिसाधनम्, आयव्ययद्रव्यायुषो विचारः, शिलान्यासविधिः, शल्यनिष्कासनविधिः, दिक्साधनम्, पञ्चाङ्ग-कालशुद्धिविचारः, राहुमुखविचारः, वृषवास्तुचक्रम्, वास्तुपुरुषस्थितिः, गृहप्रवेशविधिः, वृक्षारोपणमाहात्म्यम्, दकार्गलम्, जलाश्रयनिर्माणप्रकारः, वृक्षरोपणमुहूर्त्तम्, कूपमुहूर्त्तम्, देवमन्दिरनिर्माणविधिः च विस्तरेण प्रतिपादितोऽस्ति। अयं ग्रन्थः मानवजीवनस्य कृते अत्यन्तम् उपयोगी वर्तते। अत्र गृहादिनिवाससम्बन्धिविविधविषयाः प्रामाणिकरूपेण उपलभ्यन्ते।

१.३.३ ग्रन्थकारस्य परिचयः

अस्य बृहद्वास्तुमालानाम्नः ग्रन्थस्य लेखकः पण्डितश्रीरामनिहोरद्विवेदीमहोदयः। प्रस्तुतग्रन्थे ग्रन्थकारेण गुरूणां मार्गदर्शने पाठकानां मोदाय प्रकीर्णानां प्राचीनाचार्याणां प्रणीतानां वास्तुशास्त्रीयविषयाणां सङ्कलनम् सरलरूपे हिन्दीभाषायामनुवादपूर्वकं प्रदत्तम्। ग्रन्थकारस्य

प्रथमगुरुः काशी-हिन्दुविश्वविद्यालयस्य सुप्रसिद्धः ज्यौतिषाचार्यः पण्डितश्रीरामरत्नओझामहोदयः द्वितीयगुरुः बनारस-संस्कृतमहाविद्यालयस्य गणितशास्त्रस्य आचार्यः पण्डितश्रीहृषीकेशोपाध्यायः, तृतीयगुरुश्च काशी-हिन्दूविश्वविद्यालयस्य धर्मविज्ञानविभागस्य अध्यक्षः महामहोपाध्यायः पण्डितश्रीविद्याधरवर्यः आसीदिति ज्ञायते। एतेषां समेषां गुरूणां मार्गदर्शने ग्रन्थकारः ग्रन्थस्य रचनां कृतवान्। दैवज्ञसमाजे प्रतिष्ठाप्राप्तः बृहद्वास्तुमालाख्यः अयं संग्रहग्रन्थः 1987 वैक्रमाब्दे आश्विनमासस्य कृष्णपक्षे नवम्यां तिथौ प्रकाशमानीतः। अनेन द्विवेदीमहाभागानां कालः प्रायः विक्रमसंवत्सरानुसारेण 1925 तः 2020 पर्यन्तमनुमीयते।

१.३.४ वास्तुपुरुषस्वरूपम्

वास्तुपुरुषस्य उद्भवविषये एका कथा लभ्यते। प्राचीनकाले सत्ययुगस्य आरम्भसमये एकदा शिवान्धकयोः मध्ये भीषणयुद्धमभवत्। तदा भगवतः शिवस्य ललाटाद् भूम्युपरि स्वेदबिन्दुः अपतत्। तत्स्वेदबिन्दुतः भयङ्करः कश्चनः विराट्पुरुषः अजायत। यस्य मुखम् अत्यन्तविकरालमासीत्। सः बृहत्कायः विशिष्टः पुरुषः क्षुधार्तो भूत्वा युद्धक्षेत्रे अन्धकगणस्य रुधिरम् अपिबत्। तथाऽपि तस्य तृप्तिः नाभवत्। तदा सः सदाशिवस्य पुरतः दारुणं तपः आचरितवान्। तस्य तपसा सन्तुष्टः आशुतोषः तस्मै स्वाभीष्टं वरं याचितुमाह। स पुरुष उक्तवान् – माम् एवं वरं ददातु येनाहं त्रैलोक्यग्रसने सक्षमो भविष्यामि। तस्य तपसि सन्तुष्टः शिवः तस्मै वरं दत्तवान्। तदनन्तरं स विराटविकरालपुरुषः स्वविशालशरीरेण समग्रं भूमण्डलम् अन्तरिक्षं चाच्छादयत। तदा भयभीताः देवादयः तं गृहीत्वा पृथिव्योपरि अधोमुखं स्थापितवन्तः। यः देवः यत्रैव तं गृहीतवान् सः तत्रैव तस्योपरि अवसत्। सर्वदेवानां निवासात् सः वास्तुरित्यभिधीयते। यथा मिलति –

तदिदानीं प्रवक्ष्यामि वास्तुनरमनुत्तमम् ।
पुरान्धकवधे घोरे घोररूपस्य शूलिनः॥
ललाटस्वेदसलिलमपतद् भुवि भीषणम् ।
करालवदनं तस्माद् भूतमुद्भूतमुल्वणम् ॥
ग्रासमानमिवाकाशं सप्तद्वीपां वसुन्धराम् ।
ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ ॥
तेन तत् समरे सर्वं पतितं यन्महीतले ।
तथापि तृप्तिमगमन्न तद्भूतं यदा तदा ॥
सदाशिवस्य पुरतस्तपश्चक्रे सुदारुणम् ।
क्षुधाविष्टं तु तद् भूतमहिर्त्तुं जगतीत्रयम् ॥
ततः कालेन संतुष्टो भैरवस्तस्य चाह वै ।
वरं वृणीष्व भद्रं ते यदभीष्टं तवानघ ॥
तमुवाच ततो भूतं त्रैलोक्यग्रसन क्षमम् ॥

मत्स्यादिपुराणेषु अपि इयं कथा भिन्नस्वरूपे प्राप्यते। अत्र वास्तुमालायां उल्लिखितां कथां पठिष्यामः।

१.३.५ बृहद्वास्तुमालायां वास्तुपुरुषस्वरूपम्

पुरा कृतयुगे ह्यासीन्महद्भूतं समुत्थितम्।
व्याप्यमानं शरीरेण सकलं भुवनं ततः॥१॥
तद्दृष्ट्वा विस्मयं देवा गताः सेन्द्रा भयावृताः।
ततस्तैः क्रोधसन्तप्तैर्गृहीत्वा तमथासुरम्॥२॥

विनिक्षिप्तमधोवक्त्रं स्थितास्तत्रैव ते सुराः।
तमेव वास्तुपुरुषं ब्रह्मा कल्पितवान् स्वयम्॥३॥

अन्वयः - पुरा कृतयुगे हि महद् भूतं समुत्थितम् आसीत्। ततः (तस्य) शरीरेण सकलं भुवनं व्याप्यमानम् विस्मयं तद्दृष्ट्वा सेन्द्राः देवाः भयावृताः गताः। ततः तैः क्रोधसन्तप्तैः तम् असुरं गृहीत्वा अधोवक्त्रं विनिक्षिप्तम्। अथ ते सुराः तत्रैव स्थिताः। तमेव स्वयं ब्रह्मा वास्तुपुरुषं कल्पितवान्।

प्रतिपदार्थः - पुरा = प्राचीनकाले, कृतयुगे = सत्ययुगे, हि = निश्चयपूर्वकं, महद् भूतं = विशालकायप्राणी, समुत्थितम् आसीत् =उत्पन्नमभवत्। ततः = उत्पत्यनन्तरं (तस्य = महद्भूतस्य), शरीरेण = देहेन, सकलं = समग्रं, भुवनं = विश्वम्, व्याप्यमानं = आच्छाद्यमानं, विस्मयं = आश्चर्यपूर्वकं, तद्दृष्ट्वा = तं महद् भूतमवलोक्य, सेन्द्राः देवाः= देवराजइन्द्रसहिताः सुराः, भयावृताः गताः = भयभीताः संजाताः। ततः = तदनन्तरं, तैः = इन्द्रादिदेवैः, क्रोधसन्तप्तैः = क्रोधपूर्वकैः, तम् असुरं = तं महद् भूतम्, गृहीत्वा = धृत्वा, अधोवक्त्रम् = अधोमुखं कृत्वा, विनिक्षिप्तं = विनिपातितम्। अथ = अनन्तरं, ते सुराः= सेन्द्राः देवाः, तत्रैव = तस्मिन् स्थाने (तस्योपरि इति भावः), स्थिताः= अवस्थिताः अभवन्। तमेव = तं महद् भूतं हि, स्वयं ब्रह्मा = स्वयमेव विधिः प्रजापतिः वा, वास्तुपुरुषं = भूमेरधिष्ठितदेवं, कल्पितवान् = कल्पयामास, तस्य वास्तुपुरुष इति संज्ञां कृतवानिति भावः।

सरलार्थः - प्राचीनकाले सत्ययुगे एकः महान् विकरालः पुरुषः समुत्पन्नः आसीत्। यस्य शरीरेण समग्रं चतुर्दशभुवनं व्याप्तमासीत्। तम् अवलोक्य इन्द्रादयः सर्वे देवाः भयभीताः आश्चर्य- चकिताश्च जाताः। तदनन्तरं ते देवाः क्रोधपूर्वकं तम् असुरं गृहीत्वा तस्य शरीरं अधोमुखं कृत्वा भूम्युपरि स्थापितवन्तः। येन देवेन तस्य असुरस्य यदंगं गृहीतं, तत्रैव सः देवः स्थितः अभवत्। स्वयमेव ब्रह्मा तस्य वास्तुपुरुष इति संज्ञां कृतवान्।

१.४ गृहादिनिर्माणफलम्

गृहं हि सर्वजन्तूनाम् आश्रयस्थलं श्रमनिवारणस्थलञ्च वर्तते। न केवलं मनुष्यः अपितु सर्वेषां कृते गृहस्य अनिवार्यरूपेण आवश्यकता भवति। कोऽपि प्राणी दिवसे बहिः परिभ्रमणं कृत्वा रात्रौ श्रमनिवारणाय गृहं प्रत्यागच्छति। इत्यतिरिच्य गृहम् अस्मान् शीताम्बूष्णात् रक्षति, सर्वे प्राणिनः स्वस्त्रीपुत्रादिकानां पालनाय पोषणाय तेषां सौख्यजननाय च गृहनिर्माणं कुर्वन्ति। अतः गृहनिर्माणस्याधिकमहत्वम्। एतदर्थमत्र वास्तुशास्त्राचार्याः कथयन्ति यद् वापीदेवगृहादिनिर्माणेन यत्पुण्यं लभते तत्सर्वं पुण्यफलं गृहनिर्माणेन अपि प्राप्यते इति।

१.४.१ गृहनिर्माणहेतुः

स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं
जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम् ।
वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः॥४॥

अन्वयः - इदं गृहं स्त्रीपुत्रादिकभोगसौख्यजननं धर्म-अर्थ-कामप्रदम्, जन्तूनाम् अयनं सुखास्पदम् शीत-अम्बु-घर्मापहं (भवति)। गेहात् वापीदेवगृहादि-अखिलं पुण्यं सम् उत्पद्यते। तेन श्रीविश्वकर्मादयः विबुधाः पूर्वं गेहम् उशन्ति।

प्रतिपदार्थः - इदम् = एतद् गृहं, स्त्रीपुत्रादिकभोगसौख्यजननं = भार्यासन्तानादिकानां

सुखप्रदायकम् आनन्दानुभूतिदायकं भौतिकसुखसुविधानां च जनकमितिभावः, सुख, धर्म-अर्थ-कामप्रदम् = धर्मप्रदमर्थात् धार्मिककृत्यानां मंगलोत्सवादिकानां च पुण्यफलस्य प्रदायकम्, अर्थप्रदमर्थात् धनधान्यादिकानामुपार्जने संग्रहे च सौविध्यकारकं, कामप्रदमर्थात् रत्यादिपारिवारिकसुखप्राप्तौ सहायकम् , जन्तूनां = प्राणिनाम्, अयनं = प्राप्तिस्थानम् आश्रमस्थलं वा, सुखास्पदं = सुखप्रदायकं कल्याणप्रदस्थानं भवति। शीत-अम्बु-घर्मापहं = शीतमर्थात् शैत्यकष्टं, अम्बु अर्थात् वर्षाजलोत्पन्नकष्टं, घर्म अर्थाद् आतपदिने उष्णकष्टं दूरीकरोति, एवं सर्वकष्टेभ्यः रक्षति। गेहात् = गृहात् गृहनिर्माणादिति भावः, वापीदेवगृहादि-अखिलं = जलाशय(बावडी इति हिन्द्याम्)-देवमन्दिरादीनि निर्माणकार्याणि एतेषां समग्रं, पुण्यं = सत्कर्मणः फलं, समुत्पद्यते = सम्यग्रूपेण प्राप्यते, तत् सर्वं पुण्यफलं गृहनिर्माणेन मिलतीति भावः। तेन = एतेन कारणेन, श्रीविश्वकर्मादयः विबुधाः = देवाः पण्डिताश्च, गेहं = गृहनिर्माणार्थं, पूर्वमुशन्ति = सर्वप्रथमं कथयन्ति निर्दिशन्ति वा।

सरलार्थः - इदं गृहं स्त्रीसन्तानादिसुखानुभवस्थानं धर्म-अर्थ-कामादिविषयाणां प्राप्तिस्थानं, प्राणिनां सुखास्पदं कल्याणप्रदं च स्थानं, शीत-अम्बु-उष्णादिकष्टात् रक्षणस्य स्थानं च भवति। विधिवद्गृहस्य निर्माणेन एव वापी-कूप-जलाशय-देवमन्दिरादिनिर्माणात् यत्पुण्यं लभते तत्सर्वं पुण्यफलमपि प्राप्यते। अतएव श्रीविश्वकर्मादयः देवाः पण्डिताश्च सर्वप्रथमं गृहनिर्माणाय कथयन्तीति।

१.४.२ गृहनिर्माणफलम्

कोटिघ्नं तृणजे पुण्यं मृण्मये दशसङ्गुणम् ।
ऐष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे॥५॥

अन्वयः - तृणजे गृहे कोटिघ्नं पुण्यं, मृण्मये दशसङ्गुणम्, ऐष्टिके शतकोटिघ्नं, शैलेऽनन्तं फलं (प्राप्यते)।।

प्रतिपदार्थः - तृणजे = तृणघासादिनिर्मिते, गृहे = भवने गेहे वा, कोटिघ्नं = कोटिगुणं, पुण्यं = स्वर्गादिशुभलोकप्राप्तिरूपशुभफलं लभ्यते, वाप्यादिनिर्माणादपि कोटिगुणं पुण्यफलं लभ्यते इत्याशयः, मृण्मये = मृत्तिकानिर्मिते गृहे, दशसङ्गुणम् = दशकोटिगुणम्, ऐष्टिके = इष्टिकानिर्मिते गृहे, शतकोटिघ्नं = शतकोटिगुणं, शैले = प्रस्तरनिर्मितगृहे, अनन्तम् = अनन्तगुणं, फलं = पुण्यं (लभ्यते)।

सरलार्थः - घासवंशतृणादिमाध्यमेन गृहस्य निर्माणेन गृहकर्ता वाप्यादिनिर्माणादपि कोटिगुणं फलं प्राप्नोति। मृत्तिकागृहस्य निर्माणेन तस्मादपि दशकोटिगुणं फलं प्राप्यते। इष्टिकानिर्माणेन शतकोटिगुणं फलं मिलति। प्रस्तरमाध्यमेन गृहस्य निर्माणेन अनन्तगुणं पुण्यं प्राप्यते।

विशेषः - वस्तुतः तृणनिर्मितगृहस्य अपेक्षया मृत्तिकामाध्यमेन गृहनिर्माणमधिकं सुदृढं स्थायित्वञ्च भजते। मृत्तिकानिर्मितगृहस्य अपेक्षया इष्टिकानिर्मितस्य गृहस्य स्थायित्वम् अधिकं भवति। इष्टिकानिर्मितस्य गृहस्य अपेक्षया प्रस्तरेण गृहनिर्माणे सति अधिकं चिरं स्थिरञ्च गृहं भवति।

१.४.३ जीर्णोद्धारफलम्

वापी-कूप-तडागादि-प्रासाद-भवनानि च।
जीर्णान्युद्धरते यस्तु पुण्यमष्टगुणं लभेत्॥६॥

अन्वयः – वापी–कूप–तडाग–प्रासाद–भवनानि च यः जीर्णान्युद्धरते (स) तु अष्टगुणं पुण्यम् लभेत्।

प्रतिपदार्थः – वापी = पुष्करिणी विस्तृतायाताकारः जलाशयः, कूपः = कूपकः, कुंआ इति हिन्द्याम् तडागः = गभीरः जलाशयः, आदि = इत्यादीनि जलस्रोतांसि, प्रासादः = राजभवनं देवभवनं वा, भवनानि = सामान्यगृहाणि, च, यः = मनुष्यः, जीर्णानि = नष्टानि, उद्धरते =करोति (येन पुनर्निर्माणं क्रियते) तु = निश्चयार्थकः अव्ययः, अष्टगुणम् = अष्टगुणपरिमितफलं, पुण्यं = सत्कर्मफलम्, लभेत्–प्राप्नुयादिति।

सरलार्थः – पुरातनानि वा जीर्णानि वापी–कूप–प्रासाद–देवप्रासाद–राजप्रसाद–भवनादीनि च एतेषां यः मनुष्यः जीर्णोद्धारं करोति सः नूतननिर्माणापेक्षया अष्टगुणं पुण्यमधिकं प्राप्नोतीति।

१.४.४ परगृहनिवासफलम्

परगेहकृतास्सर्वाः श्रौतस्मार्तक्रियाः शुभाः।
निष्फलाः स्युर्यतस्तासां भूमीशः फलमश्नुते॥७॥

अन्वयः – परगेहकृताः सर्वाः शुभाः श्रौतस्मार्तक्रियाः निष्फलाः स्युः यतः तासां फलं भूमीशः अश्नुते।

प्रतिपदार्थः – परगेहे = अन्येषां गृहे , कृताः = विहिताः, सर्वाः = समस्ताः, शुभाः= मङ्गलप्रदाः श्रौतक्रियाः = श्रुतिनाम वेदः तत्र प्रतिपादितानि यज्ञयागादीनि कर्मकाण्डादिकार्याणि, स्मार्तक्रियाः = स्मृत्युक्तानि कार्याणि अर्थात् मनुस्मृत्यादिग्रन्थ–पुराणादिभिः कथितानि व्रतोपवासादिकार्याणि, निष्फलाः = शुभफलविहीनाः पुण्यरहिताश्च, स्युः = भवेयुः, यतः = यतोहि, तासां = श्रौतस्मार्तकार्याणां, फलं = पुण्यफलं, भूमीशः = गृहपतिः, अश्नुते = भुज्यते, प्राप्नोतीति भावः।

सरलार्थः – परगेहे कृतानि यानि सर्वाणि मङ्गलप्रदानि श्रौतस्मार्तकार्याणि विधीयन्ते तानि सर्वाणि शुभकार्याणि निष्फलानि भवन्ति। यतः तेषां श्रौतस्मार्तक्रियाणां सम्पूर्णं शुभफलं भूस्वामिनं प्रति गच्छति। अतः यत्नेन गृहस्य निर्माणं करणीयमिति।

वस्तुतः अस्माकं भारतीयधर्मशास्त्रस्याधारेण सर्वेषां मानवानां जीवनकाले चत्वारः आश्रमाः वर्तन्ते। ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः संन्यासाश्रमश्चेति। उक्तेषु चतुर्षु आश्रमेषु गृहस्थाश्रमस्य वैशिष्ट्यं प्रतिपादितमस्ति यथा –

वानप्रस्थो ब्रह्मचारी यतिश्चैव तथा द्विजाः।
गृहस्थस्य प्रसादेन जीवन्त्येते यथाविधिः॥
गृहस्थ एव जयति गृहस्थस्तप्यते तपः।
ददाति च गृहस्थश्च तस्माच्छ्रेयान् गृहाश्रमी॥

गृहस्थस्य सर्वाणि कार्याणि गृहं विना सफलानि न भवन्ति। तस्माद्धेतोः शास्त्रकाराः सर्वप्रथमं गृहस्थं विशेषरूपेण गृहस्य निर्माणार्थं निर्दिशन्ति। अपि यथोक्तं भविष्यपुराणे–

गृहस्थस्थ क्रियाः सर्वाः न सिद्ध्यन्ति गृहं विना।
यतस्तस्माद् गृहारम्भकर्म चात्राभिधीयते॥ इति॥

बोधप्रश्नाः

१. बृहद्वास्तुमालाग्रन्थस्य प्रणेता कोऽस्ति?

२. पुरा महद्भूतं कस्मिन् युगे समुत्थितम्?

३. अथर्ववेदस्योपवेदः को वर्तते?

४. नष्टगृहस्य पुनरुद्धरणेन कति गुणं फलं लभ्यते?

५. तमेव असुरं वास्तपुरुषः इति कः कल्पितवान्?

१.५ गृहारम्भविधिः नराकारचक्रविचारश्च

इतः पूर्वं भवान् गृहनिर्माणस्यावश्यकता तथा भिन्न-भिन्नगृहनिर्माणफलं, जीर्णगृहाणां पुनरुद्धरणं फलं, परगृहनिवासफलञ्च पठितवान्। अस्मिन् श्लोके गृहस्यारम्भः कदा करणीयः एवमेव नक्षत्रानुसारं नराकारचक्रस्य निर्माणस्य विषये पठिष्यति।

१.५.१ गृहारम्भविधिः

द्वारशुद्धिं निरीक्ष्यादौ भशुद्धिं वृषचक्रतः।
निष्पञ्चके स्थिरे लग्ने द्व्यङ्गे वालयमारभेत्॥८॥
त्यक्त्वा कुजार्कयोश्चांशं पृष्ठे चाग्रे स्थितं विधुम्।
बुधेज्यराशिगं चार्कं कुर्याद् गेहं शुभाप्तये॥९॥

अन्वयः - आदौ द्वारशुद्धिं निरीक्ष्य वृषचक्रतः भशुद्धिं (दृष्ट्वा) निष्पञ्चके स्थिरे द्व्यङ्गे लग्ने वा आलयं (गृहम्) आरभेत्। कुजार्कयोः च अंशम्, अग्रे पृष्ठे च स्थितं विधुं, बुध-इज्य राशिगं च अर्कं त्यक्त्वा शुभाप्तये गेहं कुर्यात्।

प्रतिपदार्थः - आदौ = प्रथमं, द्वारशुद्धिं = द्वारवेधादिशुद्धिं, निरीक्ष्य = विचार्य, वृषचक्रतः = वृषवास्तुचक्रात्, भशुद्धिं = नक्षत्रशुद्धिं, निष्पञ्चके = पञ्चकनक्षत्रे अर्थात् धनिष्ठातः रेवतीं यावत् पंचनक्षत्राणि विहाय, स्थिरे = स्थिरराशौ (वृषः, सिंहः, वृश्चिकः, कुम्भश्च), द्व्यङ्गे = द्विस्वभावराशौ (मिथुन-कन्या-धनु-मीनराशयः), लग्ने वा = स्थिरराशिलग्ने द्विस्वभावराशिलग्ने वा, आलयं = गृहम्, आरभेत् = प्रारभेत्। कुजः = मङ्गलः, अर्कः = सूर्यः, च = च अव्ययपदः, अंशं = अनयोः नवांशानर्थात् मेषसिंहवृश्चिकनवांशान् विहाय, अग्रे = सम्मुखस्थे, पृष्ठे = पृष्ठभागे, च स्थितम् = अवस्थितं, विधुं = चन्द्रं, बुधेज्यराशिगं = बुधः चन्द्रपुत्रः, इज्यः गुरुः अनयोः राशिगतमर्थात् मिथुनकन्याधनुमीनराशीनां च स्थितम्, अर्कं = सूर्यं, त्यक्त्वा = परित्यज्य, शुभाप्तये = शुभफलप्राप्तये, गेहं = गृहम्, सदनं वा, कुर्यात् = गृहनिर्माणं सम्पादयेदिति भावः।

सरलार्थः - सर्वप्रथमं द्वारवेधादिशुद्धिं निरीक्ष्य वृषचक्रतः नक्षत्रशुद्धिं च दृष्ट्वा धनिष्ठातः रेवतीं यावत् यानि नक्षत्राणि भवन्ति तानि परित्यज्य स्थिरे वा द्विस्वभावलग्ने गृहारम्भं कुर्यात्। लग्ने राशौ च मङ्गल-सूर्ययोः नवांशान्, सम्मुखस्थे पृष्ठे च स्थितं चन्द्रं, मिथुन-कन्या-धनु-मीनराशिस्थं सूर्यं त्यक्त्वा शुभफलप्राप्तये शुभसमये गृहारम्भं कारयेत्।

१.५.२ ग्रामवासे नराकारचक्रम्

मस्तके पञ्चलाभाय मुखे त्रीणि धनक्षयः।
कुक्षौ पञ्च धनं धान्यं षट्पादे स्त्रीदरिद्रता॥१०॥

पृष्ठे चैकं पादहानिः नाभौ चत्वारि सम्पदः।
गुह्ये चैकं भयं पीडां हस्ते चैकन्तु क्रन्दनम्॥११॥
वामे चैकं करे भेदो ग्रामचक्रं नराकृतिः।
गणयेज्जन्मनक्षत्रं ग्रामनक्षत्रतस्सदा॥१२॥

अन्वयः - (प्रथममेकं) नराकृतिग्रामचक्रं (निर्माय तत्र) सदा ग्रामनक्षत्रतः जन्मनक्षत्रं (यावत्) गणयेत्। मस्तके पञ्च लाभाय, मुखे त्रीणि धनक्षयः, कुक्षौ पञ्च धनं धान्यं पादे षट् स्त्रीदरिद्रता, पृष्ठे चैकं पादहानिः, नाभौ चत्वारि सम्पदः गुह्ये चैकं भयं पीडा (दक्षिणे) हस्ते चैकं तु क्रन्दनम्। वामे करे चैकं भेदः (भवेत्)।

प्रतिपदार्थः - नराकृतिग्रामचक्रं = ग्रामे निवासे शुभाशुभज्ञानाय मनुष्याकारः ग्रामचक्रं निर्माय, सदा = सर्वदा, ग्रामनक्षत्रतः = स्वाभीष्टग्रामनक्षत्रात्, जन्मनक्षत्रं = जन्मकालिकं नक्षत्रं यावत् गणयेत् = गणनां कुर्यात्। मस्तके = शिरसि, पञ्च = पञ्चपरिमितानि नक्षत्राणि लेख्यानि, लाभाय= यदि ग्रामनक्षत्रतः जन्मनक्षत्रं पंचनक्षत्रेषु अन्यतमं स्यात् तदा ग्रामवासः लाभार्थं ज्ञेयः। मुखे = आनने, तदग्रिमाणि त्रीणि नक्षत्राणि लेख्यानि, तदा धनक्षयः = तत्र जन्मनक्षत्रे सति धनस्य विनाशो भवेत्। कुक्षौ = नराकारचक्रस्य उदरे, पञ्च = तदग्रिमाणि पञ्चनक्षत्राणि लेख्यानि, धनं धान्यं च = तत्र जन्मनक्षत्रे सति वित्तलाभः सस्यलाभश्च स्यात्, पादे = चरणे, षट् = अग्रिमाणि षट् नक्षत्राणि, लेख्यानि, स्त्रीदरिद्रता = पत्निसम्बन्धिदरिद्रता ज्ञेया। पृष्ठे = पृष्ठस्थाने, च एकम् = अग्रिमम् एकं नक्षत्रं स्यात्तदा, पादहानिः = चरणहानिः भवेदर्थात् चरणरोगः सम्भाव्यते, नाभौ = नाभिस्थाने, अग्रिमचत्वारि नक्षत्राणि लेख्यानि, सम्पदः = तदा ऐश्वर्यप्राप्तिः स्यात्, गुह्ये = गुप्तांगस्थाने, च, एकमग्रिमं नक्षत्रं लेख्यं, भयं = तदा भीतिः, पीडा = कष्टं स्यात्। हस्ते = दक्षिणहस्ते, च एकम् = अग्रिमम् एकं नक्षत्रं लेख्यं, क्रन्दनम् = तदा रोदनं भवेत्, वामे = वामहस्ते च, एकम् = तदग्रिमम् एकं नक्षत्रं स्थाप्यं, भेदः = तदा भेदः परस्परयोः मध्ये कलहो भवेत्।

सरलार्थः - ग्रामस्य शुभाशुभफलं ज्ञातुम् एकं मनुष्याकारं चक्रं निर्माय तत्र ग्रामनक्षत्रतः गणनां कृत्वा तन्नराकृतिचक्रस्य मस्तके पञ्च नक्षत्राणि लेख्यानि, तन्नक्षत्राणां मध्ये यदि गृहस्वामिनः जन्मनक्षत्रं स्यात्तदा सः ग्रामः तस्य कृते धनप्रदायको भवेदिति। मुखे तदग्रिमाणि त्रीणि नक्षत्राणि स्थापनीयानि, तत्र यदि गृहस्वामिनः जन्मर्क्षं भवेत्तदा वासकर्तुर्धनक्षयो भवेत्। ततः कुक्षौ अग्रिमाणि पञ्च नक्षत्राणि लेख्यानि तत्र यदि गृहेशस्य जन्मर्क्षं स्यात्तदा निवासकर्ता धनधान्ययुतः स्यात्। ततः पादे तदग्रिमाणि षट्-नक्षत्राणि लेख्यानि तत्र यदि जन्मर्क्षं भवेत्तदा गृहस्य वासकर्त्ता स्त्रीदरिद्रत्वम् आप्नोति अथवा तस्य स्त्री विनश्यति। ततः पृष्ठे अग्रिमम् एक नक्षत्रं लेख्यं तत्र यदि जन्मर्क्षं स्यात्तदा पादहानिः स्यात्। ततो नाभिस्थाने तदग्रिमाणि चत्वारि नक्षत्राणि लेख्यानि तत्र यदि जन्मनक्षत्रं भवेत्तदा निवासकर्ता सम्पद-ऐश्वर्ययुतो भवेत्, तदा नराकारचक्रस्य गुह्यस्थाने तदग्रिमम् एकं नक्षत्रं लेख्यं तत्र यदि जन्मनक्षत्रं स्यात्तदा वासकर्ता भयं पीडां चानुभवति। ततः अग्रिममेकं नक्षत्रं दक्षिणहस्ते लेख्यं तत्र यदि निवासकर्तुः जन्मनक्षत्रं भवेत्तदा गृहे क्रन्दनं भवेत्। ततः वामकरे अग्रिममेकं नक्षत्रं लेख्यं तत्र यदि निवासकर्तुः जन्मर्क्षं स्यात्तदा वासकर्तुः गृहे परस्परं कलहो भवेदिति।

ग्रामवासचक्रम्

स्थानम्	मस्तके	मुखे	कुक्षौ	चरणेषु	पृष्ठे	नाभौ	गुह्ये	दक्षिणे करे	वामे करे
नक्षत्रसंख्या	5	3	5	6	1	4	1	1	1
फलम्	लाभः	धनक्षयम्	धनं धान्यञ्च	स्त्री-हानिः	पाद-हानिः	सम्पद-लाभः	भयम्	क्रन्दनम्	विभेदः

१.६ ग्रामवासे शिवाबलिविचारः

ईशाने मरणं प्रोक्तं चोत्तरे कुरु सर्वतः।
वासं वायण्यकोणेषु भयं किञ्चित्प्रजायते॥१३॥
पश्चिमे वासकरणादानन्दः परिकीर्त्तितः।
नैर्ऋत्ये हि शिवा रौति तदा वासं न कारयेत्॥१४॥
दक्षिणे रौति कल्याणं वह्निकोणे भयं महत्।
पूर्वेप्युच्चाटनं ज्ञेयं कलिर्वा रिपुभिस्सह॥१५॥
अष्टदिक्षु यदा रौति तदा वासं न कारयेत्।
निश्शब्दे सर्वलाभः स्यादिति गर्गादिभाषितम्॥१६॥

अन्वयः - (यदा) ईशाने (शिवा रौति तदा ग्रामे निवासात्) मरणं प्रोक्तं (एवं यदा) उत्तरे (रौति तदा) सर्वतः वासं च कुरु, वायव्यकोणेषु किञ्चिद् भयं प्रजायते। (यदा) पश्चिमे (रौति तदा) वासकरणात् आनन्दः परिकीर्तितः। (यदा) नैर्ऋत्ये शिवा रौति हि तदा वासं न कारयेत्। दक्षिणे रौति कल्याणं, वह्निकोणे महद् भयं (भवेत्)। पूर्वेऽपि उच्चाटनं ज्ञेयं रिपुभिः सह कलिः वा विजानीयात्, यदा अष्टदिक्षु (शिवा) रौति तदा वासं न कारयेत्, निःशब्दे सर्वलाभः स्यात् इति गर्गादिभाषितम्।

प्रतिपदार्थः - ईशाने = ईशानकोणे मरणं = मृत्युः, प्रोक्तं = कथितम्, च उत्तरे = उत्तरस्यां दिशि, सर्वतः = सर्वथा, वासं = निवासं, कुरु = विधेहि, वायव्यकोणेषु = वायव्यविदिशि, किञ्चित् = सामान्यं, भयं = भीतिः, प्रजायते = उत्पद्यते। पश्चिमे = पश्चिमस्यां दिशि, वासकरणात् = निवासात्, आनन्दः = सुखानुभूतिः, परिकीर्तितः = इति फलं कथितमस्ति। नैर्ऋत्ये = नैर्ऋत्यकोणे, शिवा =शृंगालः, रौति = रोदनं करोति, हि = निश्चयेन, तदा = तस्यां स्थितौ तत्र, वासं = निवासं, न = नहि, कारयेत्। दक्षिणे = यमदिशि, रौति = रावं करोति, कल्याणम् = शुभं मंगलं भवति। वह्निकोणे = अग्निकोणे, महद् = महान्, भयम् = अन्त्यन्तभीतिः स्यात्, पूर्वे = पूर्वस्यां दिशि, अपि = तु, उच्चाटनं = मनसि उद्वेगादिकं फलं, ज्ञेयं = विज्ञेयं, रिपुभिः = शत्रुभिः, सह = साकं, कलिः = कलहो वा विजानीयात्, यदा = यस्मिन् समये, अष्टदिक्षु = पूर्वाद्यष्टसु दिक्षु, रौति = रोदनं करोति, तदा = तस्यां स्थितौ तत्र, वासं = निवासं न कारयेत्। निशब्दः = कस्यामपि दिशि ध्वनिः न स्यात्तदा, सर्वलाभः = उत्तमलाभः, स्यादिति, गर्गादिभाषितम् = गर्गादिमुनिभिः उक्तम्।

सरलार्थः - निवासभूमेः शुभाशुभज्ञानाय शिवाबलि निरूपणं क्रियते। तत्र रात्रौ सूर्यास्तानन्तरं मांसादिसंयुतम् अन्नं भूमौ निधाय तत्स्थानात् कियद्दूरं गत्वा तिष्ठेत्। तदनन्तरं तस्मात् स्थानात् शृंगालादीनां पशूनां ध्वन्यनुसारं ग्रामनिवासे शुभाशुभफलं विचारयेत्। यदि ईशानकोणे शिवा रौति तदा ग्रामे वासं न कारयेत्, तत्र निवासेन वासकर्तुः मरणं भवेत्। यदि उत्तरस्यां दिशि शिवा रौति तदा तत्र सर्वथा वासः समुचितः। यदा वायव्यकोणे शिवा रौति तदा तत्र निवासेन सामान्यं भयम् उत्पद्यते। यदा पश्चिमस्यां दिशि शृगालस्य ध्वनिः श्रूयते तदा तत्र निवासेन वासकर्ता सर्वदा आनन्दं प्राप्नोति। यदा नैर्ऋत्यकोणे शिवायाः शब्दः श्रूयते तदा तत्र निवासेन निवासकर्तुः स्वल्पकालं यावत् तत्र तिष्ठति। दक्षिणस्यां दिशि यदा शिवा रावं करोति तदा तत्र निवासेन वासकर्तुः कल्याणं भवति यदा अग्निकोणे शिवा रोदनं करोति तदा तत्र निवासेन वासकर्तुः मनसि भयम् उत्पद्यते। यदा पूर्वदिशि शृगालस्य रावं श्रूयते तदा तत्र निवासेन निवासकर्तुः शत्रुभिः सह कलहो वा भवति। यदा अष्टदिक्षु शिवायाः ध्वनिः श्रूयते तदा तत्र कदापि न निवसेत्। एवं यदा शिवा न रौति, कस्यामपि दिशि तस्याः रावं न श्रूयते तदा तत्र निवासेन निवासकर्त्तुः सर्वत्र लाभं प्राप्नोतीति गर्गादिमुनयः वदन्ति। अत्र भवतां

सौविध्याय चक्रं प्रस्तूयते–

शुभाशुभफलबोधचक्रम्

पूर्वः	आग्नेयः	दक्षिणः	नैर्ऋत्यः	पश्ममः	वायव्यः	उत्तरः	ईशानः	अष्टदिक्	निश्शब्दः
उच्चाटनम्	महद्भयम्	कल्याणम्	अशुभम्	आनन्दम्	स्वल्पभयम्	शुभम्	मृत्युः	अशुभम्	शुभम्

बोधप्रश्नाः

६. परगृहे निवासेन का हानिः?
७. गृहस्य मध्यभागं किमुच्यते?
८. कस्मिन् लग्ने गृहारम्भः क्रियते?
९. चरस्थिरद्विस्वभावेषु सिंहः को राशिः?
१०. नराकारचक्रस्य मुखे कति नक्षत्राणि सन्ति?
११. "द्व्यङ्के" इति शब्दस्य कोऽर्थः?

१.७ वर्गादिज्ञानम्, काकिण्यादिविचारः

अ–क–च–ट–त–प–य–श इति अष्टवर्गाः भवन्ति, अवर्गे अ–आ–इ–ई–उ–ऊ–ए, ऐ–ओ–औ– अं–अः–प्रभृतयः सर्वे स्वरवर्णाः स्युः, कवर्गे क,ख,ग,घ,ङ, तेन प्रकारेण चवर्गे च,छ,ज,झ,ञ एते वर्णाः भवेयुः, टवर्गे ट,ठ,ड,ढ,ण एते वर्णाः स्युः, एवमत्र तवर्गे त,थ,द,ध,न पञ्चवर्णाः भवन्ति, पवर्गे प,फ,ब,भ,म अक्षराणि, यवर्गे य, र, ल, व इति चत्वारि अक्षराणि तथात्र शवर्गे–श,ष,स,ह एते वर्णाः ज्ञेयाः। विस्तरेण अग्रे लिखितमस्ति।

१.७.१ वर्गादिज्ञानम्

वर्गाष्टकस्य पतयो विडालः
सिंहस्तथैव शुनकोरग-मूषकैणः।
मेषः क्रमेण गदिताः खलु पूर्वतोऽपि
यः पञ्चमः स रिपुरेव बुधैर्विवर्ज्यः॥१७॥

अन्वयः - (अ–क–च–ट–त–प–य–श एते अष्टवर्गाः भवन्ति) वर्गाष्टिकस्य पतयः क्रमेण गरुडः विडालः सिंहः तथा एव शुनकः उरग–मूषक–ऐणाः मेषः खलु गदिताः (एतेषु) पूर्वतः अपि यः पञ्चमः स रिपुः एव, (अतः) बुधैः विवर्ज्यः।

प्रतिपदार्थः - वर्गः = "अ–क–च–ट–त–प–य–श" इत्यष्टौ वर्गाः भवन्ति। अष्टकवर्गस्य = उपर्युक्तस्य अवर्गाद्यष्टकस्य, पतयः = स्वामिनः, क्रमेण = क्रमशः, गरुडः = खगेशः, विडालः = मार्जारः, सिंहः = सिंहः तथा = तेन प्रकारेण, शुनकः = श्वा कुक्कुरो वा, उरगः = सर्पः, मूषकः = आखुः (चूहा इति हिन्द्याम्), ऐणः = मृगः, मेषः = एडकः(भेड इति हिन्द्याम्), खलु = अव्ययः निश्चयबोधात्मकशब्दः, गदिताः = कथिताः, पूर्वतः = पूर्वदिगारभ्य, यः = यः वर्गः, पञ्चमः = पञ्चमवर्गः भवेत् स = सः वर्गः, रिपुः = शत्रुः, एव = निश्चयात्मकः अव्ययः, अतः बुधैः = विद्वद्भिः, विवर्ज्यः = त्याज्यः।

सरलार्थः - अ–क–च–ट–त–प–य–श इति अष्टवर्गाः भवन्ति। एतेषां वर्गाणां गणना वर्गस्य प्रथमाक्षरस्य आधारेण भवत्येव। अत्र भवतां सौविध्याय वर्गे वर्णाः, तस्य संख्या, अधिपश्च सारल्येन प्रस्तूयते। यथा अवर्गे अ, इ, उ, ए, ओ, ऐ, औ, अं, अः प्रभृतयः सर्वे स्वरवर्णाः भवेयुः, अस्य संख्या 01 तथा तस्य स्वामी गरुडो भवति। एवमेव कवर्गस्य

संख्या 02 तथात्र क, ख, ग, घ, ङ एते वर्णाः स्युः, तथा तस्य वर्गस्य स्वामी मार्जारः (विडालः)भवति। चवर्गस्य संख्या 03, अस्मिन् वर्गे च, छ, ज, झ, ञ एते वर्णाः स्युः, अस्याधिपः सिंहोऽस्ति। टवर्गसंख्या 04, अत्र ट, ठ, ड, ढ, ण ऐतेषां वर्णानां समाहारः स्यात्। ट वर्गस्य स्वामी शुनकः(कुक्कुरः) भवति। तवर्गस्य संख्या 05, तथात्र त, थ, द, ध, न इत्येते पञ्चवर्णाः जानीयात्। तथा अस्य वर्गस्य स्वामी सर्पो भवति। पवर्गस्य संख्या 06, तथात्र प, फ, ब, भ, म एते पञ्चवर्णाः भवन्ति तथा वर्गस्य अधिपः मूषकः स्यात्। य वर्गस्य संख्या 07 तथात्र य, र, ल, व एते चत्वारः वर्णाः सन्ति, अस्य वर्गस्य अधिपः मृगो भवेत्। शवर्गस्य संख्या 08, तथात्र श, ष, स, ह इत्येते चत्वारः वर्णाः भवन्ति। शवर्गस्य स्वामी मेषः भवेदिति। अनेन प्रकारेण भवान्, वर्गस्य प्रथमाक्षरस्य आधारेण कस्मिन्वर्गे के वर्णाः? का च वर्गसंख्या? तथा च कस्य वर्गस्य कः स्वामी? इति ज्ञातवान्। इदानीम् अष्टकवर्गाः कासु दिक्षु बलिनः भवन्तीति ज्ञास्यामः। अवर्गः पूर्वदिशः, कवर्गोऽग्निकोणस्य, चवर्गो दक्षिणस्य, टवर्गो नैर्ऋत्यस्य, तवर्गः पश्चिमस्य, पवर्गः वायुकोणस्य, यवर्गः उत्तरस्य, शवर्गः ईशानकोणस्य च स्वामिनः भवन्तीति। एवमत्र स्ववर्गात् पञ्चमो यः वर्गः सः तस्य शत्रुः भवति। यथा–गरुडसर्पयोः, मार्जारमूषकयोः, सिंहगजयोः, कुक्कुरमेषयो च परस्परं महावैरं भवति इत्यर्थः। तस्माद्धेतोः निजवैरवर्गस्य दिशि न वसेत्।

१.७.२ काकिणीविचारः

स्ववर्गं द्विगुणं कृत्वा परवर्गेण योजयेत्।
अष्टभिस्तु हरेद्भागं योऽधिकः स ऋणी भवेत्॥१८॥

अन्वयः – स्ववर्गं (ग्रामस्याद्यक्षरवशाद्यद्वर्गमथवा वास्तुकर्तुः यत्संख्यको वर्गः तत्स्ववर्गः तं) द्विगुणं कृत्वा परवर्गेण (वास्तुकर्तुः वर्गेण अथवा ग्रामस्य वर्गेण) योजयेत्। अष्टभिः तु हरेद् भागं यः अधिकः स ऋणी भवेत्।

प्रतिपदार्थः – स्वं = स्वकीयं, वर्गं = वर्गाणां मध्ये 'निजवर्गं', यथा – वास्तुकर्तुः प्रथमनामाक्षरस्य वर्गसंख्या, यद्भवति तद्वर्गं, द्विगुणं = द्विगुणीकृत्य, परवर्गेण = स्वातिरिक्तं अन्यवर्गेण, यथा– ग्रामस्य वर्गसंख्या तया, संयोजयेत् = योगः कार्यः इति भावः, योगफले अष्टभिः = अष्टभिः संख्यया तु = अपि, हरेद्भागं = विभजनेन यच्छेषं सा काकिणी ज्ञेया इति भावः, यः अधिकः = यस्य वर्गस्य काकिणीसंख्या अधिकः (स्यात्) स = तद्वर्गः, ऋणी = अपरस्यार्थे धनपरिशोधकः, भवेत् = स्यात्।

सरलार्थः – यथा कल्प्यते निवासकर्तुः नाम्नः प्रथमाक्षरस्य वर्गः स्ववर्गः, ग्रामस्य प्रथमाक्षरस्य वर्गः परवर्गः इति। तदा स्ववर्गसंख्या द्विगुणीकृत्य तत्र परवर्गसंख्यां योजनीया। अष्टभिः भागे कृते सति भागफलं तु त्यजेत्। शेषं यद्भवति तत् स्वकीया काकिणी भवति। एवमेव ग्रामस्याद्यक्षरस्य वर्ग स्ववर्ग तथा च निवासकर्तुः वर्ग परवर्ग मत्वा काकिणी विचार्या। तदा नरस्य ग्रामस्य च मध्ये यस्य काकिणी अधिका सः वर्गः अपरस्य कृते अर्थदो भवति।

१.७.३ कल्पितोदाहरणम्

निवासकर्तुः नाम राघवेन्द्रः, अत्र पूर्वोक्तं विध्यनुसारं राघवेन्द्रस्य प्रथमनामाक्षरम् य, र, ल, व इत्युक्ते यवर्गे अस्ति अतः राघवेन्द्रस्य यवर्गः इति सिद्धम्। यवर्गस्य अङ्कः–7

स्थानस्य नाम जबलपुरम्, अत्र पूर्वकथनानुसारं जबलपुरस्य प्रथमनामाक्षरम् च, छ, ज, झ, ञ इत्युक्ते च वर्गे अस्ति। अतः जबलपुरनगरस्य चवर्गः इति सिद्धम्, चवर्गस्य अङ्क–3, इदानीं श्लोके या प्रक्रिया उक्ता तदनुसारं गणितप्रक्रिया क्रियते–

यथा स्ववर्गः(निवासकर्तुः वर्गः) 2 +परवर्गः(ग्रामस्य वर्गः) = शेषतुल्या काकिणी
8

स्ववर्गः (निवासकर्तुः वर्गसंख्या) 7×2 = 14।

14 + परवर्गः(ग्रामस्य वर्गसंख्या) = 17, संयोजनेन सप्तदश स्यात्। अष्टभिः शोधिते सति 17"8= भागफलं 02 तु त्यजेत्, शेषं 01 गृह्यते, अतः 01 नरस्य काकिणी इति निर्द्धारिता। एवमेव ग्रामस्य काकिणीसाधनाय प्रक्रिया क्रियते-

स्ववर्गः (ग्रामस्य वर्गः) 2 + परवर्गः (निवासकर्तुः वर्गः)= शेषफलतुल्या काकिणी,
8

स्ववर्गः 3×2 =6। ततः 6 + परवर्गः 7 = 13 भवति। अष्टभिः शोधिते 13"8 = भागफलं 01, शेषम् 05। अतः 05 ग्रामस्य काकिणी इति निर्द्धारिता।

अत्र निवासकर्तुः काकिणी 01, स्थानस्य काकिणी 05 इत्यस्ति। निवासकर्तुः काकिणीतः स्थानस्य काकिणी अधिकास्ति। अस्माद्धेतोः तत्स्थानं निवासकर्तुः कृते अर्थप्रदायकं शुभं च भविष्यतीति सिद्धम्।

१.७.४ ग्रामवासविचारः

गोसिंहनक्रमिथुनं निवसेन्न मध्ये
ग्रामस्य पूर्व-ककुभोऽलिझषाङ्गनाश्च।
कर्को धनुस्तुलभमेषघटाश्च तद्व-
द्वर्गाः स्वपञ्चमपरा बलिनः स्युरैन्द्र्याः॥१९॥

अन्वयः - गोसिंहनक्रमिथुनं ग्रामस्य मध्ये, (तथा च) पूर्वककुभः अलिझषाङ्गनाश्च कर्कः धनुः तुलभमेषघटाश्च न निवसेत्। तद्वत् ऐन्द्र्याः बलिनः (स्युः), स्वपञ्चम परा स्युः।

प्रतिपदार्थः - गो = वृषराशिः, सिंह = सिंहराशिः, नक्रः = मकरराशिः, मिथुनः = मिथुनराशिः, एतेष्वन्यतमराशियुतः नरः, ग्रामस्य मध्ये = ग्रामस्य मध्यमविभागे स्थले वा, पूर्वककुभः = पूर्वदिशः आरभ्य यथाक्रमेण, अलिः = वृश्चिकराशियुतः नरः पूर्वे, झषः = मीनराशियुतः अग्निकोणे, अङ्गना = कन्याराशियुतः दक्षिणे, कर्कः = कर्कराशिमान् नैर्ऋत्ये, धनुः = धनुराशियुतः पश्चिमे, तुलभ = तुलाराशियुक्तः वायव्ये, मेषः = मेषराशियुक्तः उत्तरे, घटः = कुम्भराशियुतः नरः ईशाने च, न = नहि, निवसेत् = वासं कुर्यात्। तदवत् वर्गाः= पूर्ववत् ऐन्द्र्याः पूर्वदिशः सकाशात् अवर्गाः क्रमशः, बलिनः = बलवन्तः भवेयुः। स्वपञ्चम = स्वस्मात् वर्गात् पञ्चमवर्गाः, परा = शत्रवः, स्युः = भवेयुः इति।

सरलार्थः - यस्मिन् ग्रामे निवासमभीष्टं तस्य ग्रामस्य नवधा विभागं कृत्वा तत्र मध्यमस्थले वृष-सिंह-मकर-मिथुनराशियुताः जनाः न निवसेयुः। एवमेव पूर्वदिशः आरभ्य यथाक्रमं वृश्चिकमीनकन्याकर्कधनुतुलामेषकुम्भराशियुताः नराः न निवसेयुः अर्थात् पूर्वस्यां दिशि वृश्चिकराशिजनाः, अग्निकोणे मीनराशिजनाः, दक्षिणे कन्याराशिजनाः, नैर्ऋत्ये कर्कराशिजनाः, पश्चिमे धनुराशिजनाः, वायव्ये तुलराशिजनाः, उत्तरे मेषराशिजनाः ईशानकोणे कुम्भराशिजनाः न निवसेयुः। वर्गाः- अ-क-च-ट-त-प-य-शाः स्युः एवमत्र पूर्ववत् दिगीशाः ज्ञेयाः। यथा-अवर्गः पूर्वदिशि, कवर्गः आग्नेयकोणे, चवर्गः दक्षिणे, टवर्गः नैर्ऋत्ये, तवर्गः पश्चिमे, पवर्गः वायव्यकोणे, यवर्गः उत्तरे, शवर्गः ईशानकोणे च एते वर्गेशाः दिश्यधिपाः भवेयुः, तथा स्वनामवर्गात् पञ्चमसंख्यकः वर्गः स्वस्य शत्रुवर्गो भवतीत्यर्थः।

ग्रामे अशुभवासादिविचारचक्रम्

ईशानकोणः कुम्भः 8 शवर्गः मेषः	पूर्वदिक् वृश्चिकः 1 अवर्गः गरुडः	आग्नेयकोणः मीनः 2 कवर्गः मार्जारः
उत्तरदिक् मेषः 7 यवर्गः मृगः	मध्यः वृषः, सिंहः मिथुनः, मकरः	दक्षिणदिक् कन्या 3 चवर्गः सिंहः
वायव्यकोणः तुला 6 पवर्गः मूषकः	पश्चिमदिक् धनुः 5 तवर्गः सर्पः	नैर्ऋत्यकोणः कर्कः 4 टवर्गः श्वानः

१.७.५ ग्रामवासफलम्

नामर्क्षाद्द्विसुताङ्कदिग्भवगतो ग्रामः शुभो नान्यथा।

मतान्तरे–

स्वनामराशेर्यद्राशिर्द्विशराङ्केशदिग्मितः।
स ग्रामः शुभदः प्रोक्तस्त्वशुभः स्यात्ततोऽन्यथा॥२०॥

अन्वयः - नाम ऋक्षात् द्वि-सुत-अङ्क-दिग्-भवगतः ग्रामः शुभः न अन्यथा।

मतान्तरे - स्वनामराशेः द्वि-शर-अङ्क-ईश-दिग्मितः यद् (ग्रामस्य)राशिः। स ग्रामः शुभदः स्यात् अन्यथा तु अशुभः प्रोक्तः।

प्रतिपदार्थः - नाम-ऋक्षात् = स्वव्यावहारिकनाम्नः नक्षत्रवशात् यः राशिः, द्वि = 2, सुत = पुत्रभावः शब्दानेन 5 स्वीक्रियते, अङ्क = 9, दिग् = 10, भव = एकादशरुद्राः अतः शब्दानेन 11 स्वीक्रियते,गतः= यातः, ग्रामः = निवासोपयुक्तग्रामस्य नामवशाद्राशिरिति भावः, शुभः = कल्याणकरः, अन्यथा = उपर्युक्तानामतिरिक्तगतं स्यात्तर्हि, न = नहि, शुभः स्यात्। प्रकारान्तरेण स्वनामराशेः = स्वव्यावहारिकनामराशितः, यद्राशिः = यः ग्रामस्य राशिः, द्वि = 2, शर = पञ्चबाणाः अतः शब्दानेन 5 स्वीक्रियते, अङ्कः = 9, ईशः = एकादशरुद्राः अतः शब्दानेन 11 स्वीक्रियते, दिग् = 10, मितः = संख्यात्मको भवेत्, स ग्रामः, शुभदः = कल्याणकरः वासयोग्यः इति भावः, स्यात् = भवेत्, ततः = तदनन्तरं, अन्यथा = उपर्युक्तानामतिरिक्तगतं स्यात्तर्हि, तु = निश्चयबोधात्मकः अव्ययपदम्, अशुभः= अकल्याणकरः वासस्य अयोग्यः इति भावः, एव प्रोक्तः = हि कथितः।

सरलार्थः - गृहकर्तुः यत् प्रसिद्धव्यावहारिको नामाक्षरवशाद् यः राशिः सः स्वनामराशिरिति, एवमेव अभीष्टग्रामस्य आद्याक्षरवशाद्यद्राशिः स ग्रामराशिः स्यात्। निवासकर्तुः राशितः स्वाभीष्टग्रामराशिः यदि 2, 5, 9, 10, 11 च भवेत् तर्हि स ग्रामः गृहकर्तुः कृते निवासाय अनुकूलं भवेदिति एतदतिरिक्तगते अर्थात् नामराशितः ग्रामराशिः 1, 3, 4, 6, 7, 8, 12 गतः स्यात्तदा न शुभः।

अत्र विशेषः - ज्योतिषशास्त्रे प्रत्येकं राशेः कृते यथा नवसंख्यकानि नक्षत्रचरणानि निर्द्धारितानि सन्ति। तथैव वास्तुशास्त्रे न भवति। एतस्य नियमः वास्तुशास्त्रे किञ्चित् भिन्नं दरीदृश्यते। वास्तुशास्त्रे अश्विन्यादिनक्षत्रत्रयाणां कृते मेषराशिः वर्तते। मघादिनक्षत्रत्रयाणां कृते

सिंहराशिः, मूलादिनक्षत्रत्रयाणां च कृते धनुराशिः भवत्येव। अतः एतेषु नक्षत्रत्रयेषु एकस्मिन् नक्षत्रे द्वादशनक्षत्रचरणानि स्वीकृतानि। इत्यतिरिच्य अन्येषु राशिषु अष्टनक्षत्रचरणानि भवन्त्येव।

नक्षत्राणि	अश्वि. भरणी कृति.	रोहि. मृग.	आर्द्रा पुन.	पुष्य आश्ले.	मघा पू.फा. उ.फा.	हस्त चित्रा	स्वाती विशा.	अनुराधा ज्येष्ठा	मूल पू.षा. उ.षा.	श्रव. धनि.	शत. पू.भा.	उ.भा. रेवती
राशिः	मेषः	वृषः	मिथुनः	कर्कः	सिंहः	कन्या	तुला	वृश्चिकः	धनुः	मकरः	कुम्भः	मीनः

उदाहरणम् -

निवासकर्तुः नाम अनिलः, तदा-चू, चे, चो ला अश्विनी, ली, लू, ले, लो भरणी, अ, इ, उ, ए कृतिका नक्षत्रान्तर्गतं मेषराशिः वर्तते। स्वाभीष्टस्थानस्य नाम-देहली, अत्र स्थानस्य नामराशिः दू, थ, झ, ञ उत्तराभाद्रपद, दे, दो, चा, ची रेवती नक्षत्रयोः मीनराशिः भवेदिति। अत्र निवासकर्तुः नामराशितः(मेषराशितः) क्रमगणनया स्वाभीष्टस्थानराशिः (मीनराशिः)12 गतः। अतएव अनिलस्य कृते देहल्यां निवासः अशुभः इति सिद्धम्।

१.८ दिग्दशादिज्ञानम्

श्लोकेऽस्मिन् गृहस्य दिग्दशा साधनविधिः, ग्रहाणां दशावर्षसंख्यायाः ज्ञानं तथा च दशाभोगसमये कस्य ग्रहस्य दशा कालो वा शुभः? कस्य ग्रहस्य कालः अशुभः भवतीति विषये भवान् पठिष्यति।

१.८.१ दिग्दशाज्ञानम्

गजशरर्त्तुयुगाश्वमहीगुणा द्विसहिता मघवादिदिशि क्रमात्।
गृहपतेरभिधापुरदिङ्मिता नवहृता भवनस्य दशा भवेत्॥२१॥
अथाष्टवर्गाः क्रमतोऽष्टवाण तर्काब्धिसप्तेन्दुगुणाविश्वभिश्च।
नृग्रामदिग्वर्णमिताङ्कयोगे सूर्याद्दशेशाः नवभिर्विभक्तात्॥२२॥
सूर्येन्दुभौमास्त्व-गुजीवमन्दसौम्याश्च केतुर्भृगुजः क्रमेण।
षड्दिङ्नगाधृत्यवनीश्वरांकचन्द्राघनास्सप्तनखास्तदब्दाः॥२३॥
स्वेष्वेषु वर्षप्रमितेषु तेषां दशाफलं तत्र निवासिनां च।
तदुत्तरादुत्तरतो दशेशफलं विकल्प्यं च दशाक्रमेण॥२४॥

अन्वयः - गज-शर-ऋतु-युग-अश्व-मही-गुणा द्विसहिता मघवादिदिशि क्रमात् (अवर्गादेः च स्वराङ्काः सन्ति)। गृहपतेः अभिधा-पुर-दिङ्मिता नवहृता (शेषः) भवनस्य दशा भवेत्। अथ-अष्टवर्गाः क्रमतः अष्ट-बाण-तर्क-अब्धि-सप्त-इन्दु-गुण-अश्विभिः नृ-ग्राम-दिग्-वर्णमितांकयोगे च नवभिः विभक्तात् सूर्य-इन्दु-भौमाः त्वगु-जीव-मन्द-सौम्याः केतुः भृगुजः सूर्यात् दशेशाः (भवेयुः)। तद्-अब्दाः क्रमेण षड्-दिङ्-नग-आधृति-अवनीश्वर-अंकचन्द्र-आघनाः सप्त नखाः च (स्युः)। स्वेषु स्वेषु वर्षप्रमितेषु तत्र निवासिनां दशाफलं तदुत्तरादुत्तरतः च तेषां दशेशफलं दशाक्रमेण च विकल्प्यम्।

प्रतिपदार्थः - गजशरर्तुयुगाश्वमहीगुणाः= गजशब्देन 8 संख्या स्वीक्रियते, शरशब्देन 5 संख्या, ऋतुशब्देन 6 संख्या,युगशब्देन 4 संख्या, अश्वशब्देन 7 संख्या, महीशब्देन 1 संख्या तथा च गुणशब्देन 3 संख्या स्वीक्रियते, द्विसहिता = अपि च पूर्वोक्तैः अंकैः सह द्विसंख्या अपि ज्ञेया इति भावः, एते अंकाः, मघवादिदिशि क्रमात् = पूर्वादिदिक्क्रमेण,

दिगांकाः ज्ञेयाः। गृहपतेः = गृहस्वामिनः, अभिधा = नाम, अत्र नामाक्षरसंख्या ग्राह्या, पुरदिङ्मिता= नगरस्य ग्रामस्य वा नामाक्षरसंख्या, दिशानुसारं पूर्वोक्तदिगाङ्कं च एतेषां त्रयाणां योगः, नवहृता = नवभिः विभक्ता, शेषः, भवनस्य = गृहस्य, दशा भवेत् = सूर्यादिग्रहाणां दशा स्यात्।

अथ = अनन्तरम्, अष्टवर्गाः = अ-क-च-ट-त-प-य-शवर्गाः, क्रमतः = क्रमशः, क्रमतः अष्ट-बाण-तर्क-अब्धि-सप्त-इन्दु-गुण-अश्विभिः = अष्ट 8, बाणशब्देन 5 संख्या, तर्कशब्देन 6 संख्या, अब्धिशब्देन 4 संख्या, सप्त 7, इन्दुशब्देन 1 संख्या, गुणशब्देन 3 संख्या,अश्विशब्देन 2 संख्या स्वीक्रियते,एभिः दिगनुसारं वर्गाणां वर्णांकाः दिगांकाः वा ज्ञेयाः। ततः, नृ-ग्राम-दिग्-वर्णमितांकयोगे = गृहकर्तुः नामवशादंकाः ग्रामस्य नामवशादंकाः तथा च दिगनुसारं वर्गस्य वर्णांकाः, एतेषां त्रयाणामङ्कानां योगे कृते तस्मिन्, नवभिः = नवसंख्यकैः विभक्तात् = विभाजनात्, सूर्यः = अर्कः, इन्दुः = चन्द्रः, भौमिः = मङ्गलः, त्वगुः = राहुः जीवः = गुरुः मन्दः = शनिः, सौम्याः = बुधः, केतुः = केतुः, भृगुजः = शुक्रः सूर्याद्दशेशाः= अर्काद् आरभ्य क्रमेण दशेशाः स्युः। तद्-अब्दाः = सूर्यादिग्रहाणां दशावर्षाणि, क्रमेण = क्रमशः, षड्-दिङ्-नग-आधृति-अवनीश्वर-अंकचन्द्र-आघनाः= षट् 6, दिक्शब्देन 10, नगशब्देन 7, आधृतिशब्देन 18, अवनीश्वरशब्देन 16, अंकचन्द्रशब्देन 19, तथा आघनशब्देन 17 संख्या स्वीक्रियते, सप्त=7, नखाः= नखशब्देन 20 संख्या च स्वीक्रियते, एतन्मितानि दशावर्षाणि स्युः। ते ग्रहाः=सूर्यादिदशेश्वराः ग्रहाः, स्वेषु स्वेषु = निजेषु, वर्षप्रमितेषु = दशावर्षसमयेषु, तत्र निवासिनां = तस्मिन् गृहे वासिनां जनानां, तेषां दशाफलं मिलति। तदुत्तरादुत्तरतः दशेशफलं च = दशेशग्रहस्य दशावर्षानन्तरं तदुत्तरग्रहस्य दशा भवति तदनुसारं तद्दशेशस्य फलं वासिनां कृते जानीयात्, एवमेव उत्तरोत्तरं ज्ञेयम्, विकल्प्यम् = ज्ञेयमिति भावः।

सरलार्थः - अत्र गृहस्य दशा आनयनविधिः प्रदीयते। सर्वप्रथमं अष्टवर्गाः तथा च तेषां स्वरांकाणां स्थापनं क्रियते। यथा अवर्गस्य-8, कवर्गस्य-5, चवर्गस्य-6, टवर्गस्य-4, तवर्गस्य-7, पवर्गस्य-1, यवर्गस्य-3, शवर्गस्य-2 भवेदिति। एते पूर्वादिदिशि क्रमात् अवर्गादीनां च स्वराङ्का सन्ति। अत्र गृहपतेः नामाङ्कः स्थानस्य अङ्कः दिक्स्वराङ्कश्च एतेषां योगं कृत्वा नवसंख्यया विभाजितेन यद् अवशिष्टं भवेत्तत्तु गृहस्य एकादिशेषानुसारेण सूर्यादिग्रहाणां दशा स्यात्। दशायाः ग।णना सूर्यादारभ्य भवति। यथा- 1 शेषे सूर्यस्य, 2शेषे चन्द्रस्य, 3शेषे भौमस्य,4शेषे राहोः, 5शेषे गुरोः, 6शेषे शनेः, 7शेषे बुधस्य,8शेषे केतोः तथा 0शेषे शुक्रस्य। तत्र दशावर्षाणि तु सूर्यस्य-6, चन्द्रस्य-10, भौमस्य-7, राहोः-18, गुरोः-16, शनेः-19, बुधस्य-17, केतोः-7, शुक्रस्य-20 भवन्तीति। ते ग्रहाः स्वावधिं यावत् शुभाशुभफलं प्रदास्यन्ति। अत्र शुभग्रहाणां शुभफलं पापग्रहाणाम् अशुभफलं भवेदिति वक्तव्यम्।

१.८.२ वास्तुप्रदीपे दिग्दशाज्ञानम्

नृग्रामदिग्वर्गमिताङ्कयोगे सूर्याद्दशेशा नवभिर्विभक्तात्।
आचकुराजीशबुकेशुपूर्वा दशा ग्रहाणां कथिता मुनीन्द्रैः॥२६॥

अन्वयः - (गृहपतेः) नृग्रामदिग्वर्गमिताङ्कयोगे नवभिः विभक्तात् सूर्याद् दशेशाः (भवन्ति)। आचकुराजीशबुकेशुपूर्वा मुनीन्द्रैः ग्रहाणां दशा कथिता।

प्रतिपदार्थः - नृ-ग्राम-दिग्वर्गमितांकयोगे = गृहस्वामिनः नामाक्षरसंख्या, ग्रामस्य नामाक्षरसंख्या, दिशः वर्गसंख्या च एतेषां योगे, नवभिः = नवसंख्याभिः, विभक्तात् = विभाजनात्, शेषाङ्कात् = एकादिशेषानुसारेण इति भावः, सूर्यात् = अर्कादारभ्य, दशेशा =

दशाधिपतयः स्युः। आ = अदित्य, च = चन्द्रः कु = कुजः, रा = राहु, जी = जीवः श = शनिः, बु = बुधः, के = केतुः, शु = शुक्रः पूर्वा = पूर्वकमिति भावः, मुनीन्द्रैः = प्राचीनज्योतिर्विदृषिभिः, ग्रहाणां = सूर्यादिग्रहाणां, दशा = गृहस्य दशाक्रमं, कथिता = निगदिता ।

सरलार्थः - गृहपतेः नामाक्षरसंख्या, ग्रामस्य नामाक्षरसंख्या तथा च -दिग्वर्गस्वराङ्काः, एतान् एकीकृत्य नवसंख्यया भाजितेन शेषाङ्कात् सूर्यादारभ्य क्रमशः सूर्य-चन्द्र-भौम-राहु-बृहस्पति-शनि-बुध-केतु-शुक्राः दशेशाः भवन्ति। तेषां दशावर्षसंख्या क्रमेण 6, 10, 7, 18, 16, 19, 17, 7, 20 भवति। उपर्युक्तग्रहाः स्वभावानुसारेण शुभाशुभफलं प्रयच्छन्ति।

दिग्वर्गाङ्कचक्रम्

ऐशान्याम् शवर्गः 2	पूर्वे अवर्गः 8	आग्नेयम् कवर्गः 5
उत्तरे यवर्गः 3		दक्षिणे चवर्गः 6
वायव्याम् प 1	पश्चिमे तवर्गः 7	नैर्ऋत्याम् टवर्गः 4

१.८.३ दिग्दशाफलम्

उद्विग्नचित्तः परिपूर्णवित्तो वह्न्याभिभूतो ज्वरपीडिताङ्गः।
सौख्यान्वितो रोगयुतः सुखाढ्यो दुःखान्वितः सर्वसुखान्वितश्च॥२५॥
शुभस्य शुभदा ज्ञेया दशा पापस्य चाधमा।

अन्वयः - (सूर्यादारभ्य) उद्विग्नचित्तः, परिपूर्णवित्तः वह्न्याभिभूतः, ज्वरपीडिताङ्गः, सौख्यान्वितः, रोगयुतः, सुखाढ्यो दुःखान्वितः सर्वसुखान्वितः च (क्रमेण शुक्रं यावत् फलं भवेत्)। (अत्र) शुभस्य दशा शुभदा पापस्य च (दशा) अधमा ज्ञेया।

प्रतिपदार्थः - उद्विग्नचित्तः= सूर्यदशासमये उद्वेगजनितः मनः स्यात्। परिपूर्णः वित्तः=चन्द्रदशायां पूर्णरूपेण धनलाभः भवेत्, गृहं धनेन पूर्णं स्यात्। वह्न्याभिभूतः = भौमदशाकाले वह्निः अग्निः तेन अभिभूतः अर्थात् अग्निभयं भवेत्। ज्वरपीडिताङ्गः = राहुदशायां ज्वरकारणात् शरीरे पीडा भवति। सौख्यान्वितः =गुरोः दशायां गृहं सुखेन युक्तं स्यात्, रोगयुतः = शनिदशासमये गृहनिवासिनः रोगेण युक्ताः पीडिताश्च भवन्ति। सुखाढ्यः = बुधदशायाम् गृहं आनन्देन युक्तं भवेत्, दुखान्वितः = केतुदशाकाले गृहस्वामी दुःखेन युक्तः स्यात्। सर्वःसुखान्वितश्च = शुक्रस्य दशायां तु गृहेशः समस्तसुखेन युक्तः कल्याणं च अनुभवति। (अत्र)शुभस्य = शुभग्रहस्य, दशा = गृहस्य दशाकालः इति भावः, शुभदा = सुखप्रदा, पापस्य = पापग्रहस्य दशा, अधमा = नेष्टा अशुभप्रदा च ज्ञेया।

सरलार्थः - गृहस्य दशा निर्द्धारणादनन्तरं जिज्ञासा वर्तते यत्सर्वे ग्रहाः स्व-स्वदशायां शुभफलं प्रयच्छन्ति न वा तत्समाधानाय अत्रोच्यते। यदा सूर्यस्य महादशा भवेत्तदा मन उद्विग्नो भवति। यदा चन्द्रस्य दशा प्रचलति तदा गृहस्वामी धनेन परिपूर्णो भवेत् मङ्गलस्य दशायां अग्निकृद् महद्भयं भवति। यदा राहोः दशा प्रचलति तदा शरीरं ज्वरेण पीडितं स्यात्। गुरोः महादशायां तु अत्यन्तं सुखानुभूतिः भवति। यदा शनेः दशा प्रचलति तदा शरीरं रोगाक्रान्तं

स्यात्। यदा बुधस्य दशा प्रचलति तदा आनन्दानुभूतिः भवेत्। केतोः दशायां गृहस्वामी दुखेन परितप्तः स्यात्। यदा शुक्रस्य दशा प्रचलति तदा गृहेशः सर्वप्रकारेण सुखम् अनुभवति। अत्र तु शुभग्रहस्य दशा सर्वदा शुभदा मङ्गलप्रदा च भवति। तथा पापग्रहस्य दशा सर्वदा हानिप्रदा अमङ्गलप्रदा चैव भवति।

१.८.४ कल्पितोदाहरणम्

कस्यचित् व्यक्तेः नाम "शशिकान्तः" स "जयपुरम्" इत्यस्मिन् नगरे गृहनिर्मातुम् इच्छति। तथात्र निवासकर्तुः "शशिकान्तः" नामाक्षरः शवर्गस्वराङ्कः 2, "जयपुरम्" इति नगरस्य चवर्गः, स्वराङ्कश्च 6, उत्तरदिशि स्वराङ्कः 3। त्रयाणां स्वराङ्कानां योगः 2+6+3 = 11। योगफलं नवभिः विभक्तात् 11"9 = शेषं 2 । अत अत्र क्रमेण गणनया सूर्यादशानन्तरं चन्द्रस्य दशा प्रचलति। चन्द्रदशाफलं धनान्वितम् इति । अतः शशिकान्तस्य जयपुरनगरस्य उत्तरस्यां दिशि निवासः गृहारम्भतः चन्द्रदशावर्षपर्यन्तम् अतीवशोभनः स्यात्।

बोधप्रश्नाः

१२. ग्रामस्य मध्यभागे केषां राशिजनानां निवासः निषिद्धोऽस्ति?

१३. कति वर्गाः सन्ति?

१४. यदा दक्षिणे शिवा रौति तदा किं फलं भवति?

१५. स्ववर्गतः कतिसंख्यकवर्गः शत्रुवर्गः?

१६. अर्थदः को भवति?

१७. 'पुरदिङ्मिता' अस्य शब्दस्य अर्थः लेख्यः?

१.९ भूमिलक्षणविचारः

भूमेः मृत्तिकायाः वर्ण-गन्ध-स्वादानुसारेण एवं च तत्र समुत्पन्नानां कुश-काश-शर-तृणादीनामाधारेण विचार्यते यद् भूमिः ब्राह्मणी क्षत्रिया वैश्या शूद्रा वा। अयमेव भूमिलक्षणविचारः।

१.९.१ भूमिलक्षणानि

शुक्ला मृत्स्ना च या भूमिर्ब्राह्मणी सा प्रकीर्तिता।।२७।।
क्षत्रिया रक्तमृत्स्ना च हरिद्वैश्या उदाहृता।
कृष्णा भूमिर्भवेच्छूद्रा चतुर्धा परिकीर्तिता।।२८।।

अन्वयः - या भूमिः शुक्ला मृत्स्ना च सा ब्राह्मणी प्रकीर्तिता। (या भूमिः) रक्तमृत्स्ना (सा) क्षत्रिया। (या) (भूमिः) हरिद्(वर्णसमन्विता च सा) वैश्या उदाहृता, (या भूमिः) कृष्णा सा शूद्रा भवेत्। (एवं भूमिः) चतुर्धा परिकीर्तिता।

प्रतिपदार्थः - या भूमिः = वास्तुक्षेत्रं, शुक्ला = श्वेता शुभ्रवर्णा, मृत्स्ना = मृत्तिकायुक्ता, सा = तादृशी भूमिः, ब्राह्मणी = ब्राह्मणीसंज्ञका इति। प्रकीर्तिता = कथिता, या भूमिः रक्तमृत्स्ना = शोणितवर्णमृत्तिकया युक्ता, सा क्षत्रिया = क्षत्रियसंज्ञका प्रकीर्तिता, या भूमिः हरिद्वर्णा = हरिद्रेव पीतवर्णसमन्विता सा भूमिः, वैश्या = वैश्यसंज्ञका, उदाहृता = कथिता, या भूमिः कृष्णा = श्यामला, सा शूद्रा = शूद्रसंज्ञका भवेत् एवं भूमिः चतुर्धा =

चतुर्विधा, परिकीर्तिता = प्रतिपादिता।

सरलार्थः - या भूमिः श्वेतमृत्तिकया युक्ता, सा भूमिः ब्राह्मणी इति प्रकीर्तिता। या भूमिः रक्तमृत्तिकया युक्ता सा क्षत्रियसंज्ञका भवति। या भूमिः हरिद्वर्णसमन्विता भवेत् सा भूमिः वैश्यसंज्ञका भवति। या मही श्यामला कृष्णा च स्यात् सा भूमिः शूद्रसंज्ञका परिकीर्तिता। एवमेव भूमिः वर्णानुसारेण चतुर्विधा कथिता।

१.९.२ प्रकारान्तरेण भूमिलक्षणानि

ब्राह्मणी भूः कुशोपेता क्षत्रिया स्याच्छराकुलाः।
कुशकाशाकुला वैश्या शूद्रा सर्वतृणाकुला॥२९॥

अन्वयः - कुशोपेता भूः ब्राह्मणी, शराकुला (भूमिः) क्षत्रिया स्यात् कुशकाशाकुला वैश्या सर्वतृणाकुला (सहिता भूमिः) शूद्रा (स्यात्)।

प्रतिपदार्थः - या कुशोपेता = कुशसहिता दर्भयुक्ता च, भूः = भूमिः, सा ब्राह्मणी = ब्राह्मणीति संज्ञका, शराकुला = मुञ्जयुक्ता अवनी, क्षत्रिया = क्षत्रियेति संज्ञका, स्यात् = भवेत्, कुशकाशाकुला = कुशकाशाभ्यां सहिता, भूमिः, वैश्या = वैश्यसंज्ञका, सर्वतृणाकुला = समस्तप्रकारेण तृणघासादिसमन्विता भूमिः, शूद्रा = शूद्रेति संज्ञका कथिता।

सरलार्थः - कुशयुक्ता भूमिः ब्राह्मणी, शर-मुञ्जयुक्ता भूमिः क्षत्रिया, कुशैः काशैश्च संयुक्ता भूमिः वैश्या तथा सम्पूर्णतृणघासादिसमन्विता या भूमिः भवेत् सा शूद्रेति कथ्यते।

१.९.३ कल्पद्रुमोक्तभूमिलक्षणानि

सुगन्धा ब्राह्मणी भूमि रक्तगन्धा तु क्षत्रिया।
मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिका॥३०॥
अम्ला भूमिभवेद्वैश्या तिक्ता शूद्रा प्रकीर्तिता।
मधुरा ब्राह्मणी भूमिः कषाया क्षत्रिया मता॥३१॥

अन्वयः - (या) सुगन्धा भूमिः (सा) ब्राह्मणी, रक्तगन्धा तु क्षत्रिया, मधुगन्धा वैश्या, मद्यगन्धा च शूद्रिका भवेत्।

(या) मधुरा (रसयुक्ता) भूमिः (सा) ब्राह्मणी, कषाया क्षत्रिया मता, अम्ला भूमिः वैश्या भवेत्, तिक्ता (भूमिः) शूद्रा प्रकीर्तिता।

प्रतिपदार्थः - या सुगन्धा = सुवासयुक्ता भूमिः = मृत्तिका सा ब्राह्मणी = ब्राह्मणी संज्ञका, रक्तगन्धा = शोणितगन्धसमन्विता, तु = निश्चयार्थकाव्ययः, क्षत्रिया = क्षत्रियसंज्ञका, मधुगन्धा = क्षौद्र(मधुमक्षिकैः पुष्परसनिर्मितद्रव्यं 'शहद' इति हिन्द्याम्)गन्धवती भूमिः, वैश्या = वैश्यसंज्ञका, मद्यगन्धा = सुरागन्धयुक्ता च, शूद्रिका = शूद्रसंज्ञका भवेत्।

(या) मधुरा = मधुररसयुक्ता भूमिः = अवनी, सा ब्राह्मणी = ब्राह्मणीति संज्ञका, कषाया = कषायरसयुक्ता, क्षत्रिया = क्षत्रियसंज्ञका, मता = उक्ता। या अम्ला = अम्लरसयुक्ता, भूमिः = मही, सा वैश्या = वैश्यसंज्ञका भवेत्। या तिक्ता = तिक्तरससमन्विता स्यात् सा शूद्रा = शूद्रसंज्ञका, प्रकीर्तिता = प्रतिपादिता।

सरलार्थः - या भूमिः सुगन्धयुक्ता सा भूमिः ब्राह्मणीति संज्ञका। या भूमिः शोणितगन्धसमन्विता प्रतीयते सा भूमिः क्षत्रिया इति कथ्यते। या भूमिः मधुगन्धयुक्ता सा

वैश्या, या भूमिः तिक्तरसयुक्ता सा भूमिः शूद्रेति परिकीर्तिता।

या मृतिका आस्वादने सति मधुरस्वादयुता सा ब्राह्मणीभूमिः ब्राह्मणानां कृते अनुकुलफलप्रदा भवति, या मृत्तिका आस्वादने सति कषायरससमा अनुभूयते सा क्षत्रियसंज्ञका क्षत्रियजनानां हितप्रदा स्यात्, या मही अम्लस्वादयुता सा वैश्यसंज्ञका वैश्यजातीयानां कृते शुभा तथा च या अवनी तिक्तस्वादयुता सा मृत्तिका शूद्रसंज्ञका भवतीति।

१.९.४ वसिष्ठोक्तभूमिलक्षणानि

श्वेता शस्ता द्विजेन्द्राणां रक्ता भूमिर्महीभुजाम्।
विशां पीता च शूद्राणां कृष्णान्येषां विमिश्रिता॥३३॥

अन्वयः - द्विजेन्द्राणां श्वेता भूमिः शस्ता, महीभुजां रक्ता (भूमिः), विशां पीता (मृत्तिका), शूद्राणां कृष्णा, अन्येषां च विमिश्रिता मही शस्ता (भवति)।

प्रतिपदार्थः - द्विजेन्द्राणां = द्विजानां मध्ये इन्द्राः श्रेष्ठा ये ते द्विजेन्द्राः ब्राह्मणाः, तेषां कृते, श्वेता = शुक्ला, शुभ्रवर्णयुक्ता, भूमिः = मृत्तिका, शस्ता = शुभदा भवति। महीभुजां = क्षत्रियाणां, रक्ता = रक्तवर्णा भूमिः प्रशस्ता स्यात्। विशां = वैश्यानां, पीता = पिङ्गलवर्णा हरिद्वर्णा, मही, शूद्राणां = शूद्रजातीयजनानां, कृष्णा = श्यामलवर्णा भूमिः, अन्येषां = वर्णसङ्करादीनां, च, विमिश्रिता = अनेकरंगमिश्रिता भूमिः प्रशस्ता भवति।

सरलार्थः - ब्रह्मर्षिवसिष्ठेनोक्तं यद् या भूमिः शुभ्रश्वेतवर्णसमन्विता सा ब्राह्मणानां कृते सर्वदा शुभदा भवति। या मृत्तिका रक्तवर्णा सा भूमिः क्षत्रियाणां कृते प्रशस्ता स्यात्। या मही दर्शनेन हरिद्रेव पीता पिङ्गलाभासयुक्ता च प्रतीयते सा वैश्यानां कृते मङ्गलप्रदा भवेत्। या भूमिः अवलोकनेन कृष्णवर्णा स्यात् सा मही शूद्रजातीयजनानां कृते शुभफलप्रदा भवति। या मृत्तिका अनेकरंगविमिश्रिता भवेत् सा मही वर्णसङ्करमलेच्छादिजनानां कृते आनन्दप्रदा भवति।

१.९.५ नारदमते भूमिलक्षणानि

ब्राह्मणक्षत्रियविशां शूद्राणाञ्च शुभावहः।
घृतासृगन्नमद्यानां गन्धश्च क्रमशो भवेत्॥३४॥

अन्वयः - ब्राह्मणक्षत्रियविशां शूद्राणां च क्रमशः घृत-असृग-अन्न-मद्यानां गन्धः च शुभावहः भवेत्।

प्रतिपदार्थः - ब्राह्मणक्षत्रियविशां = विप्राणां राजन्यानां, वैश्यानां च, शूद्राणां = शूद्रवर्णजनानां, च क्रमशः = क्रमात्,घृत-असृग-अन्न-मद्यानां = घतम् आज्यं गव्यं वा, असृक् रक्तः, अन्नम् ओदनम्, मद्यं मदिरा च एतेषां, गन्धः = सुगन्धः, च शुभावहः = शुभकरः सुखकरश्च, भवेत् = स्यात्।

सरलार्थः - यथा समाजे ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः चत्वारः वर्णाः प्राचीनाचार्यैः कथिता। तथैव भूमेरपि चतुष्प्रकाराः ते निर्दिशन्ति। ब्राह्मणजातीयजनानां कृते घृतगन्धसमाना मही शुभदा भवति। क्षत्रियजनानां कृते शोणितगन्धसमाना मही सुखदा भवति। वैश्यजातीयजनानां कृते अन्नगन्धसमाना मृत्तिका शुभप्रदा भवति। शूद्रजातीयजनानां कृते मदिरागन्धसमाना भूमिः मङ्गलप्रदायिका भवेदिति।

१.९.६ भूमिलक्षणफलम्

ब्राह्मणी सर्वसुखदा क्षत्रिया राज्यदा भवेत्।
धनधान्यकरी वैश्या शूद्रा तु निन्दिता स्मृता॥३२॥

अन्वयः – ब्राह्मणी (भूमिः) सर्वसुखदा, क्षत्रिया राज्यदा भवेत्। वैश्या धनधान्यकरी, शूद्रा तु निन्दिता स्मृता॥

प्रतिपदार्थः – ब्राह्मणी = ब्राह्मणीसंज्ञका भूमिः, सर्वसुखदा = सर्वप्रकारेण सुखं ददाति। क्षत्रिया = क्षत्रियलक्षणसमन्विता भूमिः, राज्यदा = राज्यप्रदा स्यात्। वैश्या = वैश्यसंज्ञका भूमिः धनधान्यकरी भवेत्। शूद्रा = शूद्रलक्षणसमन्विता भूमिः, तु = निश्चयेन, निन्दिता = त्याज्या इति स्मृता = प्रतिपादिता।

सरलार्थः – या ब्राह्मणीसंज्ञका भूमिः सा सर्वदा सुखदा भवेत्। या क्षत्रियसंज्ञका भूमिः सा राज्यप्रदायिका स्यात्। या वैश्यजातीया सस्यगन्धसमन्विता भूमिः सा मही धनधान्यप्रदा स्यात्। या कृष्णवर्णा शूद्रसंज्ञका मृत्तिका वर्तते, सा भूमिः विद्वद्भिः आवासाय परित्यक्तव्या।

बोधप्रश्नाः

१८. का भूमिः सर्वसुखदा?

१९. कस्याः दशायाः फलम् अधमा स्वीक्रियते?

२०. का भूमिः दूरतः त्यज्या?

२१. रक्तगन्धसमा का भूमिः वर्तते?

२२. या अन्नगन्धसमा भूमिः तस्याः का संज्ञा?

ग्रन्थस्य मूलपाठः

वास्तुपुरुषस्वरूपम्

पुराकृतयुगे ह्यासीन्महद्भूतं समुत्थितम्।
व्याप्यमानं शरीरेण सकलं भुवनं ततः॥१॥
तद्दृष्ट्वा विस्मयं देवा गताः सेन्द्रा भयावृताः।
ततस्तैः क्रोधसन्तप्तैर्गृहीत्वा तमथासुरम्॥२॥
विनिक्षिप्तमधोवक्त्रं स्थितास्तत्रैव ते सुराः।
तमेव वास्तुपुरुषं ब्रह्मा कल्पितवान् स्वयम्॥३॥

गृहनिर्माणहेतुः

स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदम्
जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम्।
वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः॥४॥

गृहनिर्माणफलम्

कोटिघ्नं तृणजे पुण्यं मृण्मये दशसङ्गुणम्।
ऐष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे॥५॥

वापी-कूप-तडागादि-प्रासाद-भवनानि च।
जीर्णान्युद्धरते यस्तु पुण्यमष्टगुणं लभेत्॥६॥

परगृहनिवासफलम्

परगेहकृतास्सर्वाः श्रौतस्मार्तक्रियाः शुभाः।
निष्फलाः स्युर्यतस्तासां भूमीशः फलमश्नुते॥७॥

गृहारम्भविधिः

द्वारशुद्धिं निरीक्ष्यादौ भशुद्धिं वृषचक्रतः।
निष्पञ्चके स्थिरे लग्ने द्व्यङ्गे वालयमारभेत्॥८॥
त्यक्त्वा कुजार्कयोश्चांशं पृष्ठे चाग्रे स्थितं विधुम्।
बुधेज्यराशिगं चार्कं कुर्याद् गेहं शुभाप्तये॥९॥

ग्रामवासे नराकारचक्रम्

मस्तके पञ्चलाभाय मुखे त्रीणि धनक्षयः।
कुक्षौ पञ्च धनं धान्यं षट्पादे स्त्रीदरिद्रता॥१०॥
पृष्ठे चैकं पादहानिर्नाभौ चत्वारि सम्पदः।
गुह्ये चैकं भयं पीडां हस्ते चैकन्तु क्रन्दनम्॥११॥
वामे चैकं करे भेदो ग्रामचक्रं नराकृतिः।
गणयेज्जन्मनक्षत्रं ग्रामनक्षत्रतस्सदा॥१२॥

शिवाबलिः

निशीथे निर्जने देशे भक्तं मांसादिसंयुतम्।
भूमौ निधाय विधिवद् दूरं गत्वा विचिन्तयेत्॥
ईशाने मरणं प्रोक्तं चोत्तरे कुरु सर्वतः।
वासं वायव्यकोणेषु भयं किञ्चित्प्रजायते॥१३॥
पश्चिमे वासकरणादानन्दः परिकीर्तितः।
नैर्ऋत्ये हि शिवा रौति तदावासं न कारयेत्॥१४॥
दक्षिणे रौति कल्याणं वह्निकोणे भयं महत्।
पूर्वेप्युच्चाटनं ज्ञेयं कलिर्वा रिपुभिस्सह॥१५॥
अष्टदिक्षु यदा रौति तदा वासं न कारयेत्।
निश्शब्दे सर्वलाभः स्यादिति गर्गादिभाषितम्॥१६॥

वर्गादिज्ञानम्

वर्गाष्टकस्य पतयो गरुडो विडालः
सिंहस्तथैव शुनकोरग-मूषकैणः।
मेषः क्रमेण गदिताः खलु पूर्वतोऽपि
यः पञ्चमः स रिपुरेव बुधैर्विवर्ज्यः॥१७॥

काकिणीविचारः

स्ववर्गं द्विगुणं कृत्वा परवर्गेण योजयेत्।
अष्टभिस्तु हरेद्भागं योऽधिकः स ऋणी भवेत्॥१८॥

राशिभेदात् ग्रामवासविचारः

गोसिंहनक्रमिथुनं निवसेन्न मध्ये
ग्रामस्य पूर्व-ककुभोऽलिझषाङ्गनाश्च।
कर्को धनुस्तुलभमेषघटाश्च तद्व-
द्वर्गाः स्वपञ्चमपरा बलिनः स्युरैन्द्र्याः॥१९॥

ग्रामवासफलम्

नामर्क्षाद्द्विसुताङ्कदिग्भवगतो ग्रामः शुभो नान्यथा।

मतान्तरे—

स्वनामराशेर्यद्राशिर्द्विशराङ्केशदिग्मितः।
स ग्रामः शुभदः प्रोक्तस्त्वशुभः स्यात्ततोऽन्यथा॥२०॥

दिग्दशाज्ञानम्

गजशरर्त्तुयुगाश्वमहीगुणा द्विसहिता मघवादिदिशि क्रमात्।
गृहपतेरभिधापुरदिङ्मिता नवहृता भवनस्य दशा भवेत्॥२१॥
अथाष्टवर्गाः क्रमतोऽष्टबाणतर्काब्धिसप्तेन्दुगुणाश्विभिश्च।
नृगामदिग्वर्णमितांकयोगे सूर्याद्दशेशाः नवभिर्विभक्तात्॥२२॥
सूर्येन्दुभौमस्त्वगुजीवमन्दसौम्याश्च केतुर्भुगुजः क्रमेण।
षड्दिङ्नगाधृत्यवनीश्वरांकचन्द्राघनास्सप्तनखास्तदब्दाः॥२३॥
स्वेष्वेषु वर्षप्रमितेषु तेषां दशाफलं तत्र निवासिनां च।
तदुत्तरादुत्तरतो दशेशफलं विकल्प्यं च दशाक्रमेण॥२४॥

दिग्दशाफलम्

उद्विग्निचित्तः परिपूर्णवित्तो वह्न्याभिभूतो ज्वरपीडिताङ्गः।
सौख्यान्वितो रोगयुतः सुखाढ्यो दुःखान्वितः सर्वसुखान्वितश्च॥२५॥
वास्तुराजवल्लभोक्तदिग्दशाज्ञानम्
नृग्रामदिग्वर्गमिताङ्कयोगे सूर्य्याद्दशेशा नवभिर्भिक्तात्।
आचकुराजीशबुकेशुपूर्वा दशा ग्रहाणां कथिता मुनीन्द्रैः॥२६॥

भूमिलक्षणानि

शुभस्य शुभदा ज्ञेया दशा पापस्य चाधमा।
शुक्ला मृत्स्ना च या भूमिर्ब्राह्मणी सा प्रकीर्तिता॥२७॥
क्षत्रिया रक्तमृत्स्ना च हरिद्वैश्या उदाहृता।
कृष्णा भूमिर्भवेच्छूद्रा चतुर्धा परिकीर्तिता॥२८॥

प्रकारन्तरेण भूमिलक्षणानि

ब्राह्मणी भूः कुशोपेता क्षत्रिया स्याच्छराकुलाः।
कुशकाशाकुला वैश्या शूद्रा सर्वतृणाकुला॥२९॥

कल्पद्रुमोक्तभूमिलक्षणानि

सुगन्धा ब्राह्मणी भूमिः रक्तगन्धा तु क्षत्रिया।
मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिका॥३०॥

अम्ला भूमिर्भवैद्वैश्या तिक्ता शूद्रा प्रकीर्तिता।
मधुरा ब्राह्मणी भूमिः कषाया क्षत्रिया मता॥३१॥

तासां फलानि

ब्राह्मणी सर्वसुखदा क्षत्रिया राज्यदा भवेत्।
धनधान्यकरी वैश्या शूद्रा तु निन्दिता स्मृता॥३२॥

वसिष्ठोक्तभूमिलक्षणानि

श्वेता शस्ता द्विजेन्द्राणां रक्ता भूमिर्महीभुजाम्।
विशां पीता च शूद्राणां कृष्णान्येषां विमिश्रिता॥३३॥

नारदमते भूमिलक्षणानि

ब्राह्मणक्षत्रियविशां शूद्राणाञ्च शुभावहः।
घृतासृगन्नमद्यानां गन्धश्च क्रमशो भवेत्॥३४॥

१.१० सारांशः

अस्मिन् वास्तुस्वरूपादिविचारपाठे भवान् वास्तुशास्त्रस्य परिचयः, ज्योतिषशास्त्रदृष्टया वास्तुशास्त्रस्य परिचयः, ग्रन्थकारस्य परिचयः, वास्तुपुरुषस्वरूपम्, ग्रन्थस्याधारे वास्तुपुरुष-स्वरूपविचारः, गृहनिर्माणस्य आवश्यकता, भिन्न-भिन्नगृहनिर्माणस्य फलं, जीर्णोद्धारफलं, परगृहनिवासफलं, स्वगृहस्य आवश्यकता, गृहस्थस्य वैशिष्ट्यं, गृहारम्भविधिः, ग्रामशुभाशुभफल-ज्ञानाय नराकारचक्रनिर्माणस्य विधिः, शिवाबलिविधिश्च, वर्गाधारेण काकिणीविचारः, ग्रामे कस्यां दिशि केषां राशिजनानां निवासः निषिद्धोऽस्ति, नाम-स्थान-दिगाधारेण गृहस्य दशा आनयनविधिः, तथा तस्य फलं वर्ण-जाति-गन्ध-स्वादानुसारं भूमेः लक्षणानि, तेषां फलानि चेति सर्वम् अधीतवान्। मन्ये पाठस्यास्याध्ययनेन भवान् भूमिपरीक्षणादिकार्ये निपुणो जातः।

१.११ शब्दावली

१.	पुरा	–	प्राचीनकाले
२.	हि	–	निश्चयः
३.	पीडितैः	–	कष्टैः
४.	घर्मः	–	उष्णम्, आतपम्
५.	जन्तूनां	–	प्राणिनां
६.	जीर्णाः	–	नष्टाः
७.	विबुधाः	–	पण्डिताः, देवाः
८.	निरीक्ष्य	–	अवलोक्य
९.	इज्यः	–	गुरुः
१०.	अर्कम्	–	सूर्यम्
११.	विधुम्	–	चन्द्रम्
१२.	त्यक्त्वा	–	परित्यज्य

१३.	गणयेत्	–	विचारयेत्
१४.	शिवा	–	श्रृगालः
१५.	नराकृतिः		नराकारसमः
१६.	रौति	–	रावं करोति
१७.	शुनकः	–	कुक्कुरः
१८.	उरगः	–	सर्पः
१९.	बुधैः	–	विद्वद्भिः
२०.	द्व्यङ्गः	–	द्विस्वभावः
२१.	ऐन्द्रयाः	–	पूर्वादिदिक्षु क्रमशः
२२.	अङ्गना	–	कन्या
२३.	गो	–	वृषः
२४.	अलि	–	वृश्चिकः
२५.	झषः	–	मीनः
२६.	घटः	–	कुम्भः
२७.	प्रोक्तम्	–	उक्तम्
२८.	अभिधा	–	नाम
२९.	नखाः	–	विंशतिसंख्या ज्ञायते
३०.	गजः	–	अष्ट
३१.	शर	–	पञ्च
३२.	युगः	–	चत्वारः
३३.	नृ	–	मनुष्यः
३४.	मघवादिदिशि	–	पूर्वादिदिशि
३५.	मृत्स्ना	–	मृत्तिका
३६.	परिकीर्तिता	–	कथिता
३७.	विशां	–	वैश्यजातीजनानां
३८.	असृक्	–	रक्तः
३९.	स्ववर्गः	–	निजवर्गः
४०.	भूमीशः	–	भूमेः स्वामी

१.१२ सन्दर्भग्रन्थः

१. **बृहद्वास्तुमाला - श्री रामनिहोरद्विवेदी,** सम्पादकः- ब्रह्मानन्दत्रिपाठी, प्रकाशकः- चौखम्बा सुरभारती प्रकाशन वाराणसी।

१.१३ सहायकग्रन्थाः

१. **बृहत्संहिता श्रीवराहमिहिरकृता, व्याख्याकारः पं. अच्युतानन्द झा** चौखम्बा सुरभारती प्रकाशन वाराणसी।

२. **वास्तुरत्नावली, श्रीजीवनाथझा दैवज्ञ-विरचिता,** टीकाकारः श्रीमदच्युतानन्द झा चौखम्बा अमरभारती प्रकाशन वाराणसी।

३. **मुहूर्त्तचिन्तामणिः श्रीरामदैवज्ञविरचिता**

४. **वास्तुरत्नाकरः, श्रीविन्ध्येश्वरी प्रसाद द्विवेदी विरचितः,** चौखम्बा संस्कृत आफिस सीरीज वाराणसी, प्रकाशन।

१.१४ बोधप्रश्नोत्तराणि

१. श्रीरामनिहोरद्विवेदिवर्येण

२. कृतयुगे

३. स्थापत्यवेदः

४. अष्टगुणफलं प्राप्यते

५. ब्रह्मा

६. शुभकार्याणां फलानि निष्फलानि भवन्ति।

७. ब्रह्मस्थानम्

८. स्थिरे वा द्विस्वभावलग्ने

९. स्थिरसंज्ञकः

१०. त्रीणि नक्षत्राणि सन्ति

११. द्विस्वभावः

१२. वृष-सिंह-मकर-मिथुनराशयः

१३. अष्टवर्गाः भवन्ति।

१४. कल्याणम्

१५. पञ्चमवर्गः

१६. योऽधिकः स अर्थदो भवति।

१७. ग्रामः दिक् संयोगः

१८. ब्राह्मणी भूमिः

१९. पापस्य दशा

२०. शूद्रा भूमिः

२१. क्षत्रिया

२२. वैश्या

१.१५ अभ्यासप्रश्नाः

१. ग्रन्थाधारेण वास्तुपुरुषस्वरूपं लिखत।

२. स्वनाम्नः प्रथमाक्षराधारेण वर्गनिर्णयविधिं निरूपयत।

३. गृहारम्भविधिं प्रतिपादयत।

४. कल्पितोदाहरणोक्तकाकिणीं विचारयत।

५. राजवल्लभवास्तुशास्त्रानुसारं दिग्दशां साधयत।

६. भूमेः वर्णानां निर्धारणं कथं क्रियते?

द्वितीयः पाठः – दिक्प्लवत्वादिविचारः

पाठसंरचना

२.१ प्रस्तावना
२.२ उद्देश्यम्
२.३ दिक्प्लवत्वादिफलम्
२.३.१ मतान्तरे भूमेः दिक्प्लवत्वम्
२.३.२ भूमिप्लवनादिफलम्
बोधप्रश्नाः
२.४ भूमौ वीथ्यादिविचारः
२.४.१ गोवीथ्यादिसंज्ञा
२.४.२ पैतामहादिवास्तुफलम्
बोधप्रश्नाः
२.५ दिग्वशाद्भूमेः नतोन्नतादिफलविचारः
२.५.१ भूमेः दिग्वशान्नतफलम्
२.५.२ दिग्वशाद्भूमेरुन्नतफलम्
२.६ दिग्वशाच्छुभाशुभवृक्षविचारः
बोधप्रश्नाः
२.७ हलाग्रेणोद्धृतप्राप्तवस्तुफलम्
२.८ प्रशस्ताप्रशस्तभूमिविचारः
२.८.१ प्रशस्तभूमिफलम्
२.८.२ भूमिदोषाः
बोधप्रश्नाः
ग्रन्थस्य मूलपाठः
२.९ सारांशः
२.१० शब्दावली
२.११ सन्दर्भग्रन्थः
२.१२ सहायकग्रन्थाः
२.१३ बोधप्रश्नोत्तराणि
२.१४ अभ्यासप्रश्नाः

२.१ प्रस्तावना

बृहद्वास्तुमालायाः द्वितीये पाठे भवतां स्वागतम्। इतः पूर्वं भवान् प्रथमे पाठे वास्तु-स्वरूपादिविचारप्रसङ्गे वास्तुशास्त्रस्य परिचयः, ग्रन्थस्य परिचयः, ग्रन्थकर्तुः परिचयः, वास्तु-पुरुषस्वरूपं, गृहनिर्माणस्य आवश्यकता, जीर्णोद्धारफलं, परगृहनिवासफलं, गृहारम्भविधिः, ग्रामे निवासाय ग्रामवास चक्रम्, शिवाबलिः, वर्गविचारः, काकिणीविचारः, गृहदिग्दशाज्ञानं, भूमिलक्षणानि च सम्यग्रूपेण अधीतवान्। द्वितीयपाठस्य नाम दिक्प्लवत्वादिविचारः वर्तते। अस्मिन् पाठे भवान् भूमेः अष्टदिक्प्लवत्वविचारः भूमिप्लवनादिफलं भूमौ गोवीथ्यादिविचारः, पैतामहादिवास्तुलक्षणं तथा तस्य फलं, भूमेः दिग्वशान्नतोन्नतादिफलं, दिग्वशाच्छुभाशुभवृक्षाणां फलं हलाग्रेणोद्धृतप्राप्तवस्तूनां फलं, प्रशस्ताप्रशस्तभूमिलक्षणं, दोषादोषान् च ज्ञास्यति।

२.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- भूमेः अष्टदिक्प्लवत्वपरिचयं प्राप्स्यति।
- प्रकारान्तरेण भूमेः प्लवत्वफलं ज्ञास्यति।
- गोवीथ्यादिभूमेः लक्षणप्रतिपादने दक्षो भविष्यति।
- वास्तुक्षेत्रम् अवलोक्य तस्य क्षेत्रस्य नाम तथा शुभाशुभफलस्य निरूपणे प्रवीणो भविष्यति।
- भूमिं दृष्ट्वा तस्याः वर्ण-जात्यादिनिर्धारणे कुशलो भविष्यति।
- भूमेः कस्यां दिशि जलं प्रवहति एवं च वर्ण-रसादिमाध्यमेन कस्य वर्णस्य कृते का भूमिः सुखदा भवेदिति ज्ञास्यति।
- भिन्न-भिन्नदिशि वृक्षं दृष्ट्वा तस्य शुभाशुभफलस्य कथने सक्षमो भविष्यति।
- हलाग्रेणोद्धृतप्राप्तवस्तूनां फलादेशे योग्यो भविष्यति।
- प्रशस्ताप्रशस्तभूमिविचारयितुं शक्ष्यति।
- भूमेः दोषादोषप्रतिपादने सक्षमो भविष्यति।

२.३ दिक्प्लवत्वादिफलम्

भूमेः कस्यां दिशि उन्नतिः सति लाभप्रदा अपि च कस्यां दिशि अवनते हानिः भवतीति श्लोकेऽस्मिन् पठिष्यति।

श्रियं दाहं तथा मृत्युं धनहानिं सुतक्षयम्।
प्रवासं धनलाभं च विद्यालाभं क्रमेण च॥३५॥
विदध्यादचिरेणैव पूर्वादिप्लवतो मही।
मध्यप्लवा मही नेष्टा न शुभा प्लवतत्परा॥३६॥

अन्वयः – पूर्वादिप्लवतः मही अचिरेण एव क्रमेण श्रियं दाहं च मृत्युं धनहानिं सुतक्षयं प्रवासं धनलाभं विद्यालाभं च विदधाति। मध्यप्लवा मही न इष्टा तथा प्लवतत्परा (भूमिः) न शुभा इति।

प्रतिपदार्थः – पूर्वादिप्लवतः = पूर्वादिदिशः,मही = भूमिः, अचिरेण = शीघ्रमेव क्रमेण =क्रमशः, श्रियं = लक्ष्मीप्राप्तिं, दाहं = गृहदाहं देहसन्तापादिकं च, मृत्युं = मरणं, धनहानिं = धनक्षयं, सुतक्षयं = सन्ताननाशं प्रवासं = परदेशवासं, धनलाभं = धनप्राप्तिं, विद्यालाभं = विद्याप्राप्तिं च विदधाति = प्रददाति। मध्यप्लवा = मध्यभागनता, मही = पृथ्वी, न = नहि, इष्टा = इष्टप्रदा, प्लवतत्परा = प्लवहीना न शुभा = न शुभकरा इत्यर्थः।

सरलार्थः – याः भूमिः पूर्वस्यां दिशि अवनता भवेत् सा भूमिः सर्वदा धनं प्रददाति। या भूमिः आग्न्येकोणे अवनता दृश्यते सा भूमिः अग्निदाहं सन्तापादिकं च विदधाति। या भूमिः दक्षिणस्यां दिशि नता स्यात् सा भूमिः निवासकर्तुः मरणाय भवति। या भूमिः नैर्ऋत्यां दिशि प्लवा भवेत् सा भूमिः वासकर्तुः धनहानिं करोति। या भूमिः पश्चिमस्यां दिशि अवनता स्यात् सा भूमिः सन्ततिकष्टं जनयति। या भूमिः वायव्यदिशि प्लवा स्यात् सा भूमिः वासकर्तारं प्रवासं ददाति या भूमिः उत्तरस्यां दिशि अवनता भवेत् सा भूमिः धनं प्रददाति।

या भूमिः ईशानदिशि नता स्यात् सा भूमिः विद्याप्राप्तिं विदधाति। या भूमिः सर्वत्र समाना परन्तु मध्यनिम्ना प्रतीयते सा भूमिः कदापि सौख्यं न प्रयच्छति।

२.३.१ मतान्तरे भूमेः दिक्प्लवत्वम्

शम्भुकोणे प्लवा भूमिः कर्तुः श्रीसुखदायिनी।
पूर्वप्लवा वृद्धिकरी धनदा तूत्तरप्लवा॥३७॥
मृत्युशोकप्रदा नित्यमाग्नेयी दक्षिणप्लवा।
गृहक्षयकरी सा च भूमिर्या निर्ऋतिप्लवा॥३८॥
धनहानिकरी चैव कीर्तिदा वरुणप्लवा।
वायुप्लवा तथा भूमिर्नित्यमुद्वेगकारिणी॥३९॥

अन्वयः - भूमिः शम्भुकोणे प्लवा (सा) कर्तुः श्रीसुखदायिनी, पूर्वप्लवा वृद्धिकरी उत्तरप्लवा तु धनदा (भवति), या भूमिः आग्नेयी प्लवा सा नित्यं मृत्युः शोकप्रदा च, दक्षिणप्लवा गृहक्षयकरी, निर्ऋति (नता) सा धनहानिकरी (भवेत्), वरुणप्लवा च एव कीर्तिदा तथा (या) भूमिः वायुप्लवा (सा) नित्यम् उद्वेगकारिणी (भवति)।

प्रतिपदार्थः - या भूमिः = मही, शम्भुकोणे = ईशानकोणे, प्लवा = अवनता सा भूमिः, कर्तुः = वासकर्तुः, श्री सुखदायिनी = लक्ष्मीसुखदायिनी, पूर्वप्लवा = पूर्वदिशि नता भूमिः, वृद्धिकरी = धनधान्यवृद्धिकरी भवेत्, उत्तरप्लवा = उत्तरदिशि अवनता भूमिः तु = निश्चयेन, धनदा धनप्रदायका भवेत्। आग्नेयी भूमिः= अग्निकोणे मही, प्लवा = नता, सा नित्यं = निरन्तरं मृत्युशोकप्रदा = मरणं शोकं च प्रददाति, या भूमिः दक्षिणप्लवा = दक्षिणे नता, सा गृहक्षयकरी = गृहनाशकरी भवति। या भूमिः निर्ऋतिप्लवा = नैर्ऋत्यां नता, सा, धनहानिकरी = धनक्षयकरी वरुणप्लवा = पश्चिमे अवनता, भूमिः एव कीर्तिदा = कीर्तिप्रदायिका, तथा = तेन प्रकारेण। वायुप्लवा = वायव्यकोणे अवनता भूमिः, नित्यं = निरन्तरम्, उद्वेगकारिणी= उच्चाटनप्रदा उद्वासकारिणी वा भवति।

सरलार्थः - यदि भूमिः ईशानकोणे अवनता भवेत्तदा सा भूमिः निवासकर्तुः कृते लक्ष्मीसुखप्रदायिनी भवति। यदि पूर्वदिशि नता भवति तर्हि सा भूमिः कर्तुः धनधान्यप्रदायिनी भवति। यदि भूमिः उत्तरेऽवनता स्यात्तर्हि सा भूमिः निश्चयं धनं प्रददाति। यदि भूमिः अग्निकोणे प्लवा स्यात्तर्हि सा भूमिः निरन्तरं शोकं प्रददाति। यदि दक्षिणेऽवनता भवेत्तर्हि सा वासकर्तुः गृहनाशकरी स्यात्। यदि नैर्ऋत्यां दिशि नता स्यात्तर्हि सा भूमिः धनं नाशयति। यदि भूमिः पश्चिमे अवनता भवेत्तदा सा भूमिः कीर्तिप्रदायिका भवति। यदि वायव्यदिशि नता भवेत्तदा सा भूमिः नित्यं कष्टं उद्वेगञ्च जनयति।

नारायणभट्टमते-

सौम्यादिप्लवभूतले विरचयेद्विप्रादिकोऽग्रयोऽखिले।
नान्येषां नियमोऽथ यत्र निखिला कुर्युर्गृहं हृत्स्थिरम्॥४०॥

अन्वयः - अथ विप्रादिकः अग्रयः अखिले सौम्यादिप्लवभूतले (गृहं) विरचयेत्। अन्येषां न नियमः। अथ यत्र हृत्स्थिरं (तत्र)निखिलाः गृहं कुर्युः।

प्रतिपदार्थः - विप्रादिकः = ब्राह्मण-क्षत्रिय-वैश्य-शूद्रजातयः अग्रयः = प्रथमः, अग्रगण्याः इति भावः, अखिले = समग्रे, सौम्यादिप्लवभूतले = उत्तर-पूर्व-दक्षिण-पश्चिमादिदिक्षु नते भूमौ गृहं विरचयेत् = गृहस्य रचनां कारयेत्।अन्येषाम् = अपरेषाम्, चातुर्वर्ण्यातिरिक्तानां जनानां वर्णसंकरचाण्डालादीनां च कृते, न = नहि, नियमः = प्रणाली, न कश्चिन्नियमविशेषः

इति भावः। अथ = अनन्तरम्, यत्र = यस्मिन् स्थले, हत्स्थिरं = मनसंतुष्टिः इति भावः, यस्य मनो यत्र संलग्नम्, तत्र, निखिलाः = समस्तजनाः, गृहं कुर्युः = गृहनिर्माणं कुर्वन्तु।

सरलार्थः – या भूमिः उत्तरस्यां दिशि अवनता सा मही ब्राह्मणजातीयजनानां कृते उत्तमफलप्रदा भवति। या भूमिः पूर्वस्यां दिशि अवनता स्यात् सा भूमिः क्षत्रियजातीयजनानां कृते सुखप्रदायिका भवति। या मही दक्षिणदिशि नता भवेत्। सा अवनी वैश्यजातीयजनानां कृते मङ्गलदायका भवति। या मृत्तिका पश्चिमदिशि नता स्यात्। सा भूमिः शूद्रवर्णानां कृते प्रशस्ता भवति। चातुर्वर्ण्यातिरिक्तजनानां कृते न कश्चिन्नियमविशेषः। अत्र विशेषः यस्य मनो यत्र रमते स तत्रैव गृहनिर्माणं कर्तुं शक्यते।

२.३.२ भूमिप्लवनादिफलम्

पूर्वप्लवा वृद्धिकरी उत्तरा धनदा स्मृता।
अर्थक्षयकरीं विद्यात् पश्चिमप्लवना ततः॥४१॥
दक्षिणप्लवना पृथ्वी नराणां मृतिदा भवेत्॥४२-१॥

अन्वयः – पूर्वप्लवा वृद्धिकरी उत्तरा धनदा स्मृता, ततः पश्चिमप्लवना मही अर्थक्षयकरीं विद्यात्। दक्षिणप्लवना पृथ्वी नराणां मृतिदा भवेत्।

प्रतिपदार्थः – पूर्वप्लवा = पूर्वदिशि नता भूमिः, वृद्धिकरी = धनधान्यवृद्धिकरी, उत्तरा = उत्तरदिशि अवनता मही, धनदा = धनप्रदा, स्मृता = ज्ञेयेति भावः, ततः = तदनन्तरं पश्चिमप्लवना = पश्चिमे अवनता भूमिः, अथक्षयकरी = धननाशकरी, विद्यात् = जानीयात्। दक्षिणप्लवना = दक्षिणे अवनता पृथ्वी = भूमिः, नराणां = जनानां, मृतिदा = मरणप्रदा भवेत्।

सरलार्थः – या भूमिः पूर्वस्यां दिशि अवनता भवेत्। सा मही सर्वदा धनधान्यवृद्धिकरी मनोनुकूला शुभफलप्रदा च भवति। या भूमिः उत्तरस्यां दिशि नता प्रतीयते सा भूमिः धनप्रदायिका भवति। या भूमिः पश्चिमस्यां दिशि अवनता वर्तते सा पृथ्वी धननाशकरी स्यात्। या भूः दक्षिणे नीचा भवेत् सा मही निवासिनां कृते मरणप्रदा इत्युच्यते।

बोधप्रश्नाः

१. या भूमिः पूर्वदिशि अवनता भवेत् सा भूमिः किं फलं प्रयच्छति?

२. महीभुजः इत्यस्य शब्दस्य कोऽर्थः?

३. उद्वेगकारिणी का भूमिः स्यात्?

४. दक्षिणप्लवा भूमिः केषां कृते शुभप्रदा?

५. नैर्ऋत्यां दिशि निम्ना भूमिः किं फलं प्रददाति?

२.४ भूमौ वीथ्यादिविचारः

वीथिरिति शब्दस्यार्थो भवति आवागमनार्थं मार्गः। तत्र यस्यां शालायां यत्प्रमाणं कथितं स्यात् तत्त्रिभागतुल्या वीथिका गृहाद्बहिः भवितव्याः। सा वीथिका यदि गृहस्य भवनस्य वा प्राग्भागे भवेत्तदा तद्वास्तु क्षेत्रं नाम सोष्णीषं भवति। यदि वीथिका भवनस्य पृष्ठभागे पश्चिमभागे वा वर्तते तद्वास्तु नाम सायाश्रयमिति कथ्यते। यदि सा वीथिका गृहस्य उत्तरदक्षिणयोः मध्ये भवेत्तदा तद्वास्तु नाम सावष्टम्भः स्यात्। एवमेव यदि सा वीथिका भवनस्य चतसृष्वपि दिक्षु भवेत्तदा तद्वास्तुक्षेत्रं नाम सुस्थितं भवतीति किरणाख्ये तन्त्रे उल्लिखितमस्ति। तद्यथा–

यः शालायास्तृतीयांशस्तेन कार्या तु वीथिका।
यद्यग्रतो भवेद्वीथि सोष्णीषं नाम तद् गृहम्॥
पश्चात्सायाश्रयं नाम सावष्टम्भं तु पार्श्वयोः।
सामन्ताद्यदि जाता सा तदा सुस्थितमुच्यते॥

परन्वत्र भूमेः नतावनतवशाद्वीथिसंज्ञा प्रतिपादिता वर्तते। बृहद्वास्तुमालायां वर्णितगोवीथ्याद्यष्टविधवीथीनां विषये वयमत्र पठामः।

२.४.१ गोवीथ्यादिसंज्ञा

वारुणोच्चसमायुक्ता नीचमाहेन्द्रसंयुता॥४२॥
सा गोवीथिरिति ज्ञेया, ऐन्द्रोच्चा नीचवारुणा।
जलवीथिरिति प्रोक्ता वास्तुज्ञानविशारदैः॥४३॥
सोमोच्चयमनीचा च यमवीथीति कथ्यते।
यमोच्चसोमनीचाच गजवीथीति कथ्यते॥४४॥
ईशोच्चं निर्ऋतौ नीचं भूतलं भूतवीथिकम्।
आग्नेयोच्चं वायुनीचं नागवीथी प्रशस्यते॥४५॥
वायूच्चमग्निनीचं यद् वीथिं वैश्वानरीं विदुः।
निर्ऋत्युच्चमीशनीचं धनवीथीत्युदाहृता॥४६॥

अन्वयः - (या भूमिः) वारुणोच्चसमायुक्ता माहन्द्रनीचा संयुता सा गोवीथिरिति (भूमिः) ज्ञेया।(या भूमिः) ऐन्द्रोच्चा वारुणनीचा (सा मही) जलवीथिरिति वास्तुविज्ञानविशारदैः प्रोक्ता।(या भूमिः) सोमोच्चा यमनीचा च (सा भूमिः) यमवीथीति कथ्यते।(या भूमिः) यमोच्चा सोमनीचा च (सा अवनी) गजवीथीति कथ्यते।(यदि)भूतलं ईशोच्चं निर्ऋतौ च नीचं (तद्भूखण्डं) भूतवीथिकम्।(यद्भूतलं) आग्नेयोच्चं वायुनीचं (तत्) नागवीथि (इति संज्ञकं) प्रशस्यते।यद् (भूतलं)वायूच्चम् अग्निनीचं (च तद्) वीथिं वैश्वानरीं विदुः। यत्तु नैर्ऋयुच्चमीशनीचं (तद्भूतलं) धनवीथीत्युदाहृता।

प्रतिपदार्थः - (या भूमिः) वारुणोच्चा = पश्चिमदिशि उन्नता, समायुक्ता = समन्विता, माहेन्द्रनीचा = पूर्वदिशि नता, संयुता = युता, सा गोवीथिः= तादृशी भूमिः गोवीथिसंज्ञका इति, ज्ञेया = विज्ञेया। ऐन्द्रोच्चा = पूर्वदिशि उन्नता, वारुणनीचा = पश्चिमदिशि अवनता, सा मही जलवीथिः इति, वास्तुविज्ञानविशारदैः = वास्तुशास्त्रज्ञपण्डितैः वास्तुशास्त्रकारैः वा प्रोक्ता = उक्ता। सोमोच्चा = उत्तरस्यां दिशि उन्नता, यमनीचा = दक्षिणस्यां दिशि निम्ना भवेत् सा भूमिः यमवीथीति, कथ्यते = उच्यते। (या भूमिः) यमोच्चा = दक्षिणे उन्नता, सोमनीचा = उत्तरे नता च, सा अवनी गजवीथीति कथ्यते। (यद्) भूतलं = भूमितलं, ईशोच्चम् = ईशानकोणे उन्नतं, निर्ऋतौ = नैर्ऋतिकोणे नीचं = नतं तद्वास्तु भूतवीथिकम्, आग्नेयोच्चक्षेत्रं = भूतलम् अग्निकोणोन्नतं, वायुनीचं = वायव्यकोणेऽवनतं च स्यात्, तद्वास्तुक्षेत्रं नाम नागवीथीति प्रशस्यते । वायूच्चं = वायव्यकोणे उच्चम्, अग्निनीचम् = आग्नेयकोणे च अवनतं, तद्वीथिं = तां वीथीं वैश्वानरीम् इति, विदुः = जानीयुः। निर्ऋत्युच्चं = निर्ऋतिकोणे उन्नतम्, ईशनीचं = ईशानकोणे निम्नं भूतलं धनवीथीति उदाहृता = निगदिता।

सरलार्थः - भूमिः पश्चिमस्यां दिशि उन्नता, पूर्वस्यां दिशि अवनता स्यात्तदा सा भूमिः गोवीथीति उक्ता। यदि भूमिः पूर्वस्यां दिशि उच्चयुता, पश्चिमस्यां दिशि निम्ना स्यात्तदा सा भूमिः जलवीथीति कथिता।या भूमिः उत्तरस्यां दिशि समुन्नता, दक्षिणस्यां दिशि निम्नान्विता स्यात्तदा सा भूमिः यमवीथीति प्रोक्ता। या भूमिः दक्षिणस्यां दिशि उच्चसमन्विता, उत्तरस्यां

दिशि अवन्नता भवेत्तदा सा भूमिः गजवीथीति कथ्यते। भूमिः ईशानकोणे उन्नतयुता, निर्ऋतिकोणे नतयुता भवेत्तदा सा अवनी भूतवीथिसंज्ञका स्यात्।एवमेव या मही आग्नेयकोणे उच्चसमन्विता, वायव्यकोणे निम्ना स्यात्तदा सा नागवीथीति प्रसिद्धा। या भूमिः वायव्यकोणे उन्नता, आग्नेयकोणे अवनता स्यात् सा भूमिः वैश्वानरी इति कथ्यते। यस्याः भूमेः नैर्ऋत्यकोणे उन्नतिः तथा ईशानकोणे च निम्नता दृश्यते सा भूमिः यमवीथीति उच्यते।

२.४.२ पैतामहादिवास्तुफलम्

इन्द्राग्न्यन्तरमुच्चं स्यानीचं वरुणवातयोः।
वास्तु पैतामहं विद्यान्नराणां कुरुते शुभम्।।४७।।
याम्याग्न्यन्तरमुच्चं स्यान्नीचं मारुतसोमयोः।
सुपथं नाम तद्वास्तु प्रशस्तं सर्वकर्मणि।।४८।।
सोमेशानन्तरं नीचमुच्चं निर्ऋतिकालयोः।
दीर्घायुर्नाम तद्वास्तु प्रशस्तं कुलवर्द्धनम्।।४९।।
ईशानेन्द्रान्तरं नीचमुच्चं वरुणराक्षसोः।
पुण्यकं नाम तद्वास्तु द्विजानां च शुभावहम्।।५०।।
इन्द्राग्न्योन्तरं नीचमुच्चं वायुजलेशयोः।
अपथं नाम तद्वास्तु वैराय कलहाय च।।५१।।
कालाग्न्योरन्तरं नीचमुच्चं स्याद्वायुसोमयोः।
रोगकृन्नाम तद्वास्तु नराणां रोगवृद्धिकृत्।।५२।।
निर्ऋत्यन्तकयोर्नीचमुच्चं सोमशिवान्तरम्।
अर्गलं नाम तद्वास्तु ब्रह्महत्यादिनाशकृत्।।५३।।
रुद्रेन्द्रान्तरमुच्चं स्यानीचं वरुणरक्षसोः।
श्मशानं नाम तद्वास्तु केवलं कुलनाशनम्।।५४।।
नीचमग्नौभवेदुच्चं निर्ऋतीशानवायुषु।
श्येनकं नाम तद्वास्तु नाशाय मरणाय च।।५५।।
रुद्राग्निवरुणेषूच्चं नीचं स्यान्निर्ऋतौ तथा।
श्वमुखं नाम तद्वास्तु दारिद्र्यं कारयेत् फलम्।।५६।।
नैर्ऋत्याग्निशिवेषूच्चं नीचं वह्नीन्द्रयोस्तथा।
ब्रह्मघ्नं नाम तद्वास्तु नेष्टं प्राणभृतां सदा।।५७।।
अग्नौ यदि भवेदुच्चं नीचं निर्ऋतिरुद्रयोः।
वातनिम्नं च तद्वास्तु स्थावरं नाम शोभनम्।।५८।।
उच्चं निर्ऋतिभागे स्यान्नीचं ज्वलनवातयोः।
रुद्रनिम्नं च तद्वास्तु स्थण्डिलं नाम शोभनम्।।५९।।
रुद्रोच्चं यदि निम्नं स्याद्वह्नौ निर्ऋतिवातयोः।
शाण्डुलं नाम तद्वास्तु प्रापयत्यशुभं सदा।।६०।।
नैर्ऋत्याग्निशिवेषूच्चं नीचं चन्द्रमसं प्रति।
द्विजेन्द्राणान्तु सुस्थानमवनी समुदाहृता।।६१।।
नीचमिन्द्रे भवेदुच्चं निर्ऋत्यां पश्चिमानिले।
सुतलं नाम तद्वास्तु राजराष्ट्रविवर्धनम्।।६२।।
सौम्येशपवनेषूच्चं नीचं भवति चेद्यमे।
नाम्ना वास्तु चरं यत्स्याद्वैश्यानां तदभीष्टदम्।।६३।।
नीचं वारुणमुच्चं चेदीशानेन्द्राग्निषु क्रमात्।
श्वमुखं नाम तद्वास्तु शूद्राणां तदभीष्टदम्।।६४।।

अन्वयः - इन्द्राग्न्यन्तरमुच्चं वरुणवातयोः नीचं स्यात् तद्वास्तु पितामहं विद्यात्। यः नराणां शुभं कुरुते। याम्याग्न्यन्तरमुच्चं मारुतसोमयोः नीचं स्यात्, तत् सुपथं नाम वास्तु (यत्)सर्वकर्मणि प्रशस्तम् (भवति)। सोमेशानन्तरं नीचं निर्ऋतिकालयोः उच्चं वास्तु दीर्घायुः नाम, तत् प्रशस्तं कुलवर्द्धनं (भवति)।ईशानेन्द्रान्तरं नीचं वरुणराक्षसोः उच्चं पुण्यकं नाम,तद्वास्तु द्विजानां च शुभावहम्। (यत्)इन्द्राग्न्योरन्तरं नीचं वायुजलेशयोः उच्चं तद्वास्तु नाम अपथं, (यत्) वैराय कलहाय च (भवेत्)। (यत्)कालाग्न्योरन्तरं नीचं वायुसोमयोः उच्चं स्यात्। तद्वास्तु नाम रोगकृत्, (तत्तु) नराणां रोगवृद्धिकृत् (भवति)। निर्ऋति-अन्तकयोः नीचं सोमशिवान्तरम् उच्चं (भवेत्)अर्गलं नाम वास्तु, तत् ब्रह्महत्यादिनाशकृत् (भवेत्)। (यत्) रुद्रेन्द्रान्तरमुच्चं वरुणरक्षसोः नीचं स्यात्। तद्वास्तु नाम श्मशानं, (यत्) केवलं कुलनाशनं (करोति)। (यत्)अग्नौ नीचं निर्ऋति-ईशान-वायुषु उच्चं भवेत् तद्वास्तु नाम श्येनकं, (तत्तु)नाशाय मरणाय च (भवति)। (यत्)रुद्राग्निवरुणेषूच्चं तथा निर्ऋतौ नीचं स्यात्। तद्वास्तु नाम श्वमुखं, (यत्) दारिद्र्यं फलं कारयेत्।नैर्ऋत्याग्निशिवेषु उच्चं तथा वह्नीन्द्रयोः नीचं स्यात्। तद्वास्तु नाम ब्रह्मघ्नं, (यत्) प्राणभृतां सदा नेष्टम्। यदि अग्नौ उच्चं निर्ऋति-रुद्रयोः नीचं वातनिम्नं च भवेत्। तत् स्थावरं नाम वास्तु शोभनम् (स्यात्)।निर्ऋतिभागे उच्चं ज्वलनवातयोः नीचं रुद्रनिम्नं च स्यात्। तत् स्थपिण्डलं नाम वास्तु शोभनम् (स्यात्)। यदि रुद्रे उच्चं वह्नौ निर्ऋतिवातयोश्च निम्नं स्यात्। तत् शाण्डुलं नाम वास्तु, (तत्र नरः) सदा अशुभं प्रापयति। (यत्)नैर्ऋति-अग्निशिवेषु उच्चं चन्द्रमसं प्रति नीचं (स्यात्)। (तत्)सुस्थानम्, (इयं) अवनी द्विजेन्द्राणान्तु समुदाहृता। (यत्)इन्द्रे नीचं निर्ऋत्यां पश्चिमानिले उच्चं भवेत् तद्वास्तु नाम सुतलं,(यत्तु)राजराष्ट्रविवर्धनं (करोति)। सौम्य-ईश-पवनेषु उच्चं यमे च नीचं भवति। (तत्)वास्तु नाम्ना चरं (स्यात्) तद् वैश्यानां अभीष्टदं स्यात्। चेत् वारुणे नीचम् क्रमात् ईशान-इन्द्र-अग्निषु उच्चं (स्यात्)तद्वास्तु नाम श्वमुखं तद् शूद्राणाम् अभीष्टदं (भवति)।

प्रतिपदार्थः - इन्द्राग्न्यन्तरम् = इन्द्रः पूर्वदिक्स्वामी अतः इन्द्रशब्देन पूर्वदिक् ज्ञेया, अग्निः आग्नेयकोणः अनयोः अन्तरं मध्ये यत्स्थलं वर्तते तत्स्थानम्, उच्चम् = उन्नतं, वरुणवातयोः = वरुणः पश्चिमदिक्स्वामी, वातः वायव्यकोणः अनयोः मध्यस्थलं, नीचं = नतं, स्यात् = भवेत्, तद्वास्तु = भवननिर्माणाय भूक्षेत्रं, पितामहमिति संज्ञकं, विद्यात् = जानीयात्,यः नराणां = जनानां, शुभं = मङ्गलं कुरुते। याम्याग्न्यन्तरम् = याम्यः यमस्य दिक् दक्षिणः, अग्निः अग्निकोणः अनयोः अन्तरं मध्ये यत्स्थलं वर्तते तद्, उच्चं = उन्नतं भवेत् मारुतसोमयोः = मारुतः वायव्यकोणः सोमः उत्तरदिक्स्वामी अतः वायव्योत्तरयोः मध्यस्थानं , नीचं = निम्नं स्यात्। तद्वास्तु क्षेत्रं नाम सुपथं यत् सर्वकर्मणि = समस्तकार्येषु, प्रशस्तं = श्रेष्ठं, शुभं स्यादिति भावः। सोमेशानयोः = उत्तर-ईशानकोणयोः मध्यक्षेत्रं, नीचं = निम्नं, निर्ऋतिकालयोः =निर्ऋतिः नैर्ऋत्यकोणः कालः यमः तस्य दिक् दक्षिणः अनयोः अन्तरं यत्स्थलं (तद्) उच्चं= उन्नतं स्यात्, तद्वास्तु = तत्क्षेत्रं नाम, दीर्घायुः, (यत्) प्रशस्तं = श्रेष्ठं, शस्तं, कुलवर्द्धनं = वंशवर्द्धकं स्यात्। ईशानेन्द्रान्तरम् = ईशानकोणः, इन्द्रः पूर्वदिक् अनयोः अन्तरं मध्यस्थलं, नीचम् = अवनतं, वरुणरक्षसोः = वरुणः पश्चिमदिक्, रक्षः निर्ऋत्यकोणः, अनयोः मध्यस्थलम्, उच्चं = उन्नतं स्यात्, तद्वास्तु = तद्भूखण्डनाम, पुण्यकं, यद्द्विजानां = ब्राह्मण-क्षत्रिय-वैश्यवर्णानां कृते, शुभावहं = सुखदं शुभप्रदं च भवेत्।

इन्द्राग्नयोः = पूर्व-अग्निकोणयोः, अन्तरं = मध्यस्थानं, नीचम् = अवनतं, वायुजलेशयोः = वायव्यकोण-पश्चिमयोः (यत्स्थलं वर्तते तत्स्थलं), उच्चं = उन्नतं स्यात्, तद्वास्तु = तद्क्षेत्रं अपथं नाम, तत्तु वैराय = शत्रुतावर्धनाय, कलहाय च स्यात्। कालाग्नयोः = दक्षिण-अग्निकोणयोः, अन्तरम् = अन्तरं, नीचं = नतं, वायुसोमयोः = वायव्यकोणः- उत्तरयोः मध्यस्थानम्, उच्चं =उन्नतं यद्वास्तु स्यात्। तद्वास्तु = तद्वास्तुक्षेत्रं रोगकृत् नाम, यत्

नराणां = जनानां, रोगवृद्धिकृत् = रोगवृद्धिकारको भवेत्। निर्ऋत्यन्तकयोः = नैर्ऋत्यकोण-दक्षिणयोः मध्यभागं, नीचं = नतं, सोमशिवान्तरम् = उत्तर-ईशानकोणयोः मध्यस्थानम्, उच्चं स्यात्। तद्वास्तुक्षेत्रं नाम अर्गलं भवति। सा भूमिः ब्रह्महत्यादिमहापापानां विनाशकृत् = विनाशं करोति। रुद्रेन्द्रान्तरं = ईशानकोण-पूर्वयोः मध्यस्थलम्, उच्चम् = उन्नतं, वरुणरक्षसोः = पश्चिम-नैर्ऋत्ययोः मध्यस्थानं, नीचम् = अवनतं स्यात्। तद्वास्तुक्षेत्रं नाम श्मशानं स्यात्। सा भूमिः केवलं कुलनाशनं = वंशनाशनं करोति। अग्नौ = अग्निकोणे, नीचं = नतं निर्ऋति-ईशान-वायुषु = नैर्ऋत्य-ईशान-वायव्यकोणेषु, उच्चम् = उन्नतं भवेत्, तद्वास्तुक्षेत्रं नाम श्येनकं स्यात्। सा भूमिः नाशाय = धनपुत्रसम्पत्यादिनाशाय, मरणाय = मृत्यवे च भवेत्। रुद्र-अग्नि-वरुणेषु = ईशानकोण-आग्नेयकोण-पश्चिमेषु, उच्चम् = उन्नतं तथा निर्ऋतौ = निर्ऋतिकोणे, नीचं = निम्नं स्यात्, तद्वास्तुस्थानं नाम श्वमुखं, तादृशं भूक्षेत्रं दारिद्र्यं = धनादीनामभावं, कारयेत् = सम्पादयेत्। नैर्ऋत्याग्निशिवेषु = नैर्ऋत्यकोण-अग्निकोण- ईशानकोणेषु, उच्चम् = उन्नतं, वह्नीन्द्रयोः = वायव्यकोण-पूर्वयोः मध्यस्थलं, नीचम् = अवनतं स्यात्। तद्वास्तुक्षेत्रं नाम ब्रह्मघ्नं भवति। तादृशं वास्तु सदा = सर्वदा प्राणभृतां = मनुष्यादीनां कृते, नेष्टम् = नहि ईष्टप्रदं भवति, अशुभं स्यादिति भावः। यदि अग्नौ = अग्निकोणे, उच्चम् = उन्नतं, निर्ऋतिरुद्रयोः = नैर्ऋत्यकोण-ईशानकोणयोः, नीचम् = अवनतं, तथा वातनिम्नं = वायव्यकोणे अपि नतं च भवेत्। तद्वास्तुक्षेत्रं नाम स्थावरं, तत् शोभनं = शुभप्रदं स्यात्। निर्ऋतिभागे = नैर्ऋत्यकोणे, उच्चम् = उन्नतं, ज्वलनवातयोः = आग्नेयकोण-वायव्यकोणयोः रुद्रे = ईशानकोणे च, एव नीचं = निम्नं स्यात्। तद्वास्तु नाम स्थण्डिलं भवेत्। तत् क्षेत्रं शोभनं = शुभप्रदायकं भवेत्। यदि रुद्रोच्चम् = ईशानकोणे उन्नतं, वह्नौ = अग्निकोणे, निर्ऋतिवातयोः = नैर्ऋत्यकोण-वायव्यकोणयोः, निम्नं = नीचं स्यात्। तद्वास्तु नाम शाण्डुलं, तत् सदा = सर्वदा, शुभं = शुभफलं प्रापयति = प्रददातीति भावः। नैर्ऋत्याग्निशिवेषु = नैर्ऋत्यकोण-अग्निकोण-ईशानकोणेषु, उच्चम् = उन्नतं, चन्द्रमसं प्रति = उत्तरं प्रति, नीचं = नतं स्यात्। तद्वास्तु नाम सुस्थानम्, इयम् अवनी = भूमिः द्विजेन्द्राणां = विप्राणां, तु, समुदाहृता = ब्राह्मणानां निवासाय प्रशस्ता कथिता इति भावः। इन्द्रे = पूर्वदिशि, नीचम् = अवनतं, नैर्ऋत्यां = नैर्ऋत्यकोणे, पश्चिमानिले = पश्चिमदिशि वायव्यकोणे च, उच्चम् = उन्नतं भवेत्। तद्वास्तु नाम = तद् भूक्षेत्रं नाम सुतलं यत्, राजराष्ट्रविवर्धनं = क्षत्रियजनानां वृद्धिकारकं राज्यवर्धकं च भवति। सौम्येशानपवनेषु = उत्तर-ईशान-वायव्यकोणेषु, उच्चम् = उन्नतं चेत् = यदि, यमे = दक्षिणे, नीचम् = अवनतं भवति, तद् वास्तु नाम्ना चरं, सा भूमिः वैश्यानां = वैश्यजातीयजनानां अभीष्टम् = इष्टप्रदं स्यात्। वरुणनीचं = पश्चिमे नतं, चेत् = यदि, क्रमात् = क्रमशः ईशानेन्द्राग्निषु = ईशानकोण-पूर्वदिक्- आग्नेयकोणेषु, उच्चम् = उन्नतं, स्यात् तद्वास्तु नाम श्वमुखं तद् = तद्, शूद्राणां = शूद्रवर्णानां कृते, अभीष्टदम् = इष्टप्रदं भवेत्।

सरलार्थः- यस्याः भूमेः पूर्वदिक् अग्निकोणश्च उन्नतः तथा पश्चिमदिक् वायव्यकोणश्च अवनतः स्यात् तद्वास्तु पितामहसंज्ञकमित्युच्यते। सा भूमिः जनानां सर्वमङ्गलप्रदायिका भवेदिति।

यस्याः भूमेः दक्षिणाग्नयोः मध्यभागः उन्नतः वायव्य-उत्तरयोः च मध्यभागः अवनतः स्यात्, तस्याः भूमेः नाम सुपथं स्यात्। सा भूमिः निवासकर्तुः कृते प्रशस्ता।

यद्वास्तु उत्तर-ईशानकोणे अवनतं, नैर्ऋत्य-दक्षिणयोश्च उन्नतं भवेत्। तद्वास्तुक्षेत्रं नाम दीर्घायुः स्यात्। सा भूमिः वासकर्तुः वंशवर्द्धनाय भवति।

या भूमिः ईशान-पूर्वे अवनता, निर्ऋति-पश्चिमयोश्च उच्चा स्यात्। तद्वास्तुक्षेत्रं पुण्यकं नाम। सा भूमिः ब्राह्मण-क्षत्रिय-वैश्यवर्णानां कृते सुखप्रदा भवति।

यस्याः भूमेः पूर्व-आग्नेयकोणौ उन्नतौ वायव्यपश्चिमौ च अवनतौ स्याताम्। तस्य वास्तुक्षेत्रस्य नाम अपथं भवति, सा अवनी वासकर्तुः नित्यं कलहं प्रददाति।

यद्भूखण्डः दक्षिणे अग्निकोणे च अवनतः वायव्ये उत्तरभागे च उन्नतः स्यात्। तद्वास्तुगृहं रोगकृन्नामकमस्ति। सा भूमिः निवासकर्तुः रोगवृद्धिदं भवति।

यस्याः भूमेः नैर्ऋत्य-दक्षिणौ अवनतौ उत्तर-ईशानौ च उन्नतौ भवेताम्। तद्वास्तुक्षेत्रं अर्गलमित्युच्यते। सा भूमिः वासकर्तुः ब्रह्महत्यादिमहापापानि विनाशयति।

यस्याः वास्तुभूमेः ईशान-पूर्वौ उच्चतायुक्तौ पश्चिम-निर्ऋतौ च नीचौ स्यात्। तद्वास्तुक्षेत्रं नाम श्मशानं विद्यते। सा भूमिः निवासकर्तुः वंशं विनाशयति।

यद्वास्तु आग्नेयकोणे अवनतम्, नैर्ऋत्यईशान-वायव्यकोणेषु उन्नतं स्यात्। तद्वास्तुक्षेत्रं श्येनकं नाम, सा भूमिः निवासकर्तुः विनाशाय तथा च तस्य मृत्योः कारणं भवति।

यस्याः भूमेः ईशान-अग्नि-पश्चिमभागाः उन्नताः प्रतीयन्ते। तथा नैर्ऋत्यकोणः अवनतः स्यात्। तद्वास्तुक्षेत्रं नाम श्वमुखम् इत्युच्यते। सा भूमिः दारिद्र्यं प्रददाति।

यस्याः भूमेः नैर्ऋत्य-आग्नेय-ईशानभागाः उन्नताः, वायव्यकोण-पूर्वदिशौ च अवनते स्याताम्, तद्वास्तुगृहं नाम ब्रह्मघ्नमस्ति। सा भूमिः निवासयोग्या न भवति। तत्र कृषिकार्याणि कारयेत्।

यद्वास्तु अग्निकोणे उन्नतं, नैर्ऋत्य-ईशान-वायव्यकोणेषु अवनतं स्यात्, तद्वास्तुक्षेत्रं स्थावरसंज्ञकम्। तत्र निवासेन जीवनं सुखमयं भवति।

यस्याः भूमेः नैर्ऋत्यकोणः उन्नतः आग्नेय-वायव्य-ईशानकोणाश्च निम्नाः स्युः। तद्वास्तुक्षेत्रं स्थण्डिलमित्युच्यते। तस्यां भूमौ निवासेन वासकर्तुः स्थिरतां प्राप्नोति।

यस्याः भूमेः ईशानकोणः उन्नतः अग्नि-निर्ऋति-वायव्यकोणाश्च नताः भवेयुः। तद्वास्तु क्षेत्रं शाण्डुलं भवति। सा भूमिः निवासयोग्या न भवति।

या भूमिः आग्नेय-नैर्ऋत्य-ईशानकोणेषु उन्नता वायव्यकोणे च नता स्यात्। तद्वास्तुक्षेत्रं सुस्थानमित्युक्तम्। सा सुस्थानसंज्ञका अवनी ब्राह्मणानां कृते सुखदा भवति।

यद्वास्तु पूर्वस्यां दिशि अवनतं तथा च नैर्ऋत्य-वायव्य-पश्चिमक्षेत्रेषु उन्नतं स्यात्। तद्वास्तुक्षेत्रं सुतलमिति निगदितम्। सा भूमिः क्षत्रियवर्णानां सुखप्रदा राज्यविवर्धनाय च भवति।

यस्याः भूमेः उत्तर-ईशान-वायव्यकोणाः उन्नताः तथा दक्षिणभागः अवनतः स्यात्। तद्वास्तुक्षेत्रं चरम् उच्यते। एतादृशी भूमिः वैश्यजातीयजनानां कृते लाभप्रदा भवति।

यस्याः वास्तुभूमेः पश्चिमभागः अवनतः, ईशान-पूर्व-आग्नेयकोणाश्च उन्नताः, तद्वास्तु श्वमुखम् इत्युच्यते। सा भूमिः शूद्रवर्णानां सर्वाभीष्टं पूरयति।

बोधप्रश्नाः

६. या भूमिः उत्तरदिशि उन्नता दक्षिणे चावनता प्रतीयते तस्याः का संज्ञा?

७. सुपथसंज्ञकवास्तुभूमेः किम् लक्षणम्?

८. श्मशानभूमेः किं फलं भवति?

९. शाण्डुलवास्तु निवासयोग्यं भवति न वा?

१०. विप्राणां निवासाय का भूमिः हितप्रदा?

२.५ दिग्वशाद्भूमेः नतोन्नतादिफलविचारः

एतेषां श्लोकानामध्ययनान्तरं भवान् ज्ञास्यति यत् कीदृशी भूमिः कस्य वर्णस्य कृते अनुकूलफलप्रदा निवासयोग्या च भवतीति।

२.५.१ भूमेः दिग्वशान्नतफलम्

या तु सौम्यप्लवा चैव कुशदर्भैरलङ्कृता।
आज्यगन्धा च सा भूमिर्ब्राह्मणानां प्रशस्यते॥६५॥
पूर्वप्लवा च रक्ता च कुशदर्भैरलङ्कृता।
रक्तगन्धा च या भूमिः क्षत्रियाणां प्रशस्यते॥६६॥
दक्षिणप्लवनोपेता कुशदर्भैरलङ्कृता।
अन्नगन्धा च या भूमिः सा वैश्यानां प्रशस्यते॥६७॥
पश्चिमप्लवनोपेता दूर्वाभिश्च समन्विता।
सुरागन्धा च या भूमिः शूद्राणां समुदाहृता॥६८॥

अन्वयः - या भूमिः सौम्यप्लवा कुशदर्भैरलङ्कृता च आज्यगन्धा च एव (स्यात्)। सा तु ब्राह्मणानां प्रशस्यते।

या भूमिः पूर्वप्लवा रक्ता च कुशदर्भैरलङ्कृता च रक्तगन्धा च (भवेत्)। (सा भूमिः) क्षत्रियाणां प्रशस्यते।

या भूमिः दक्षिणप्लवनोपेता कुशदर्भैरलङ्कृता अन्नगन्धा च (स्यात्)। सा (भूमिः) वैश्यानां प्रशस्यते।

या भूमिः पश्चिमप्लवनोपेता दूर्वाभिश्च समन्विता सुरागन्धा च (भवति)। (सा भूमिः) शूद्राणां समुदाहृता।

प्रतिपदार्थः - या भूमिः सौम्यप्लवा = उदक्प्लवा अर्थात् उत्तरदिशि नता, कुशदर्भैः = कुशैः दर्भैश्च, अलङ्कृता = समन्विता च, आज्यगन्धा = घृतगन्धवती च स्यात्। सा = तादृशी भूमिः तु = निश्चयेन ब्राह्मणानां = विप्राणां कृते, प्रशस्यते = प्रयुज्यते।

या भूमिः पूर्वप्लवा = पूर्वदिशि नता, रक्ता = रक्तमृत्तिकया युक्ता च कुशदर्भैः = कुशैः काशैश्च, अलङ्कृता = सुशोभिता, रक्तगन्धा = शोणितगन्धयुक्ता च भवेत्। सा भूमिः क्षत्रियाणां = महीभुजानां, प्रशस्यते = शुभा भवतीति आशयः।

या भूमिः दक्षिणप्लवनोपेता = दक्षिणदिशि अवनता युक्ता, कुशदर्भैः = कुशघासैः दर्भैश्च, अलङ्कृता = सुसज्जिता, अन्नगन्धा = सस्यगन्धवती च स्यात्। सा भूमिः वैश्यानां = वैश्यजातीयजनानां, प्रशस्यते।

या भूमिः पश्चिमप्लवनोपेता = पश्चिमदिशि नीचसमन्विता, दूर्वाभिः = दुर्वादलैः, च समन्विता = संयुक्ता, सुरागन्धा = मद्यगन्धयुक्ता च स्यात्। सा मही शूद्राणां = शूद्रजातीयजनानां कृते, समुदाहृता = आवासयोग्या कथिता।

सरलार्थः - यस्याः भूमेः उत्तरदिक् नीचा भवेत्तथा भूमिः कुशदर्भादिसंयुक्ता, घृतगन्धसमन्विता च स्यात्। सा भूमिः विप्रवर्णानां निवासयोग्या भवेदिति।

या भूमिः पूर्वस्यां दिशि नता, तथा कुशदर्भादिसमन्विता, रक्तवर्णा, रक्तगन्धयुक्ता च स्यात्। सा भूमिः क्षत्रियवर्णानां कृते समुचितलाभं प्रददाति।

यस्याः भूमेः दक्षिणदिक् निम्ना भवेत्तथा भूमिः कुशदर्भादिसंयुक्ता अन्नगन्धवती च भवेत्। सा भूमिः वैश्यवर्णानां कृते उत्तमसुखं प्रयच्छति।

या भूमिः पश्चिमस्यां दिशि नता स्यात्। अपि च सा भूमिः दूर्वादलाङ्कुरैः सुसज्जिता मद्यसमगन्धयुक्ता च भवेत् सा भूमिः शूद्राणां कृते प्रशस्ता भवतीति।

२.५.२ दिग्वशाद्भूमेरुन्नतफलम्

इन्द्रोन्नतं पुत्रनाशं वह्न्युन्नतमथार्थदम्।
अग्निनीचोऽर्थनाशः स्याद् याम्योन्नतमरोगकृत्॥६९॥
निर्ऋत्युच्चे श्रियो लाभः पुत्रदं वरुणोन्नतम्।
वायून्नतं द्रव्यनाशं सौम्योन्नतमथागदम्॥७०॥
ईशानोच्चं महाक्लेशं वास्तु विद्यादितिक्रमात्।

अन्वयः - अथ (या भूमिः) इन्द्रोन्नतं (सा भूमिः) पुत्रनाशं (कारयति)। वह्न्युन्नतमर्थदम्, अग्निनीचोऽर्थनाशः, याम्योन्नतमरोगकृत् स्यात्।

निर्ऋत्युच्चे श्रियो लाभः वरुणोन्नतं पुत्रदं, वायून्नतं द्रव्यनाशम्, अथ सौम्योन्नतम् आगदम्, ईशाने उच्चं महाक्लेशं इति क्रमात् वास्तुविद्यात्।

प्रतिपदार्थः - अथ = अनन्तरम्, इन्द्रोन्नतं = पूर्वदिशि उच्चं, पुत्रनाशं = सुतनाशं, वह्न्युन्नतम् = अग्निकोणे उच्चम्, अर्थदं = धनप्रदम्, अग्निनीचः = आग्नेयकोणे निम्नः स्यात्, अर्थनाशः = वित्तनाशः, याम्यन्नतम् = दक्षिणे उच्चम्, अरोगकृत् = रोगनाशकृत्, स्यात् = भवेत्।

निर्ऋत्युच्चे = नैर्ऋत्यकोणे उन्नते सति, श्रियो लाभः = लक्ष्मीलाभप्रदायकः, वरुणोन्नतम् = पश्चिमे उच्चं, पुत्रदं = पुत्रप्रदं, अथ, वायून्नतम् = वायव्यकोणे उच्चं, द्रव्यनाशं = द्रव्यहानिप्रदं सौम्योन्नतम् = उत्तरदिशि उच्चम्, आगदम् = समन्तात् रोगप्रदम्, ईशानोच्चम् = ईशानकोणे उन्नतं, महाक्लेशं = अतिकष्टकारकम्, इति क्रमात् = क्रमशः वास्तुविद्यात् = वास्तुक्षेत्रस्य शुभाशुभं जानीयादिति।

सरलार्थः - या भूमिः पूर्वस्यां दिशि उन्नतयुक्ता स्यात्। सा भूमिः वासकर्तुः पुत्रं विनाशयति। या भूमिः आग्नेयकोणे समुन्नता भवेत्, सा भूमिः धनधान्यं प्रददाति। या मही दक्षिणस्यां दिशि उच्चान्विता स्यात्, सा अवनी निवासकर्तुः रोगं नाशयति, अर्थात् तत्र निवासिनः प्रायः रोगमुक्ताः भवन्ति। या भूमिः निर्ऋतिकोणे उन्नता स्यात्, सा भूमिः कर्तुः वित्तप्रदं भवति। या भूमिः पश्चिमस्यां दिशि उच्चा स्यात्, सा भूमिः पुत्रसन्तति प्रददाति। या भूमिः वायव्यकोणे उच्चयुक्ता भवेत्, सा भूमिः कर्तुः द्रव्यं विनाशयति। उत्तरस्यां दिशि उन्नता भूमिः समन्तात् रोगप्रदायिका भवति। ईशानकोणे उच्चसंयुक्ता भूमिः महाक्लेशप्रदायिका भवेदिति एव वास्तुशास्त्रस्याचार्याणां मतम्।

२.६ दिग्वशाच्छुभाशुभवृक्षविचारः

अत्र पाठ्यविषयोऽस्ति भूमेः कस्यां दिशि कः वृक्षः शुभफलं प्रयच्छति तथा कस्यां दिशि कः वृक्षः अशुभफलं प्रददाति इत्यस्मिन विषये प्रतिपादितमस्ति।

अश्वत्थः पूर्वतो धन्यो दक्षिणस्यामुदुम्बरः।
न्यग्रोधः पश्चिमे श्रेष्ठः प्लक्षोऽप्युत्तरतः शुभः॥७१॥

न्यग्रोधः पूर्वतो वर्ज्यो दक्षिणे प्लक्ष एव च।
अश्वत्थः पश्चिमे भागे ह्युत्तरे चाप्युदुम्बरः॥७२॥
अश्वत्थोऽग्निभयं कुर्यात् प्लक्षः कुर्यात् प्रमादकम्।
न्यग्रोधः शस्त्रसम्पातं कुक्षिरोगमुदुम्बरः॥७३॥

अन्वयः – पूर्वतः अश्वत्थः धन्यः, दक्षिणस्याम् उदुम्बरः, पश्चिमे न्यग्रोधः श्रेष्ठः, उत्तरतः प्लक्षः अपि शुभः। पूर्वतः न्यग्रोधः दक्षिणे प्लक्षः एव च पश्चिमे भागे हि अश्वत्थः उत्तरे च उदुम्बरः अपि वर्ज्यः। अश्वत्थः अग्निभयं कुर्यात्, प्लक्षः प्रमादकं, न्यग्रोधः शस्त्रसम्पातम्, उदुम्बरः कुक्षिरोगं कुर्यात्।

प्रतिपदार्थः – पूर्वतः = पूर्वदिशः अश्वत्थः = अश्वत्थवृक्षः पीपलवृक्ष इति हिन्द्याम्, धन्यः = श्रेष्ठः,धनधान्यप्रदायकः शुभश्चेति भावः, दक्षिणस्यां = दक्षिणदिशि, उदुम्बरः = उदुम्बरवृक्षः, गूलरवृक्ष इति हिन्द्याम्, पश्चिमे = पश्चिमस्यां दिशि, न्यग्रोधः = वटवृक्षः बरगदवृक्ष इति हिन्द्याम्, श्रेष्ठः = श्रेष्ठफलप्रदः। उत्तरतः = उत्तरदिशः, प्लक्षः = पलाशवृक्षः, अपि शुभः = शुभफलप्रदः।

पूर्वतः = पूर्वदिशः, न्यग्रोधः = वटवृक्षः, दक्षिणे = दक्षिणस्यां दिशि, प्लक्षः = पलाशवृक्षः, एव च = निश्चयवाचकः अव्ययः, पश्चिमे = पश्चिमस्यां दिशि, भागे = स्थले हि = निश्चयेन, अश्वत्थः = अश्वत्थवृक्षः उत्तरे = उत्तरस्यां दिशि च, उदुम्बरः = उदुम्बरवृक्षः, वर्ज्यः = वर्जनीयः यतो न शुभप्रदः इति भावः।

सरलार्थः – वास्तुभूमेः शुभाशुभफलस्य विचारः वृक्षस्याधारेण अपि निरूपणं भवति। यथा–पूर्वस्यां दिशि अश्वत्थवृक्षाः दक्षिणस्यां दिशि उदुम्बरवृक्षाः पश्चिमस्यां दिशि वटवृक्षाः उत्तरस्यां दिशि पलाशवृक्षाश्च क्रमशः श्रेष्ठफलप्रदायकाः भवन्तीति।

परन्तु यदि वृक्षाणां स्थितिः विपरीतदिशि क्रमतः भवेत् तर्हि एते वृक्षाः न शुभफलं प्रयच्छन्ति। यथा–पूर्वदिशि वटवृक्षाः दक्षिणदिशि पलाशवृक्षाः, पश्चिमदिशि अश्वत्थवृक्षाः, उत्तरदिशि उदुम्बरवृक्षाश्च वर्ज्याः सन्तीति।

वास्तुभूमौ चतृसृषु दिक्षु वृक्षवशाच्छुभाशुभफलविचारसमये ध्यातव्यं यदि पूर्वस्यां दिशि वटवृक्षो भवेत्तदा तत्र अग्निकारणात् भयमुत्पद्यते। एव यदि दक्षिणदिशि पलाशवृक्षाः भवेयुः तर्हि प्रमादकारकं स्यात्। यदि पश्चिमदिशि अश्वत्थवृक्षाः स्युः तर्हि शस्त्रात् भयं भवति। एवं यदि उत्तरदिशि उदुम्बरवृक्षाः स्युः तदा उदरसम्बन्धिरोगात् पीडा भवेदिति।

बोधप्रश्नाः

११. या मही रक्तवर्णा शोणितगन्धयुक्ता च स्यात् तस्याः का संज्ञा?
१२. यस्याः भूमेः दक्षिणदिशि प्लवः स्यात् सा केषां कृते शुभप्रदा?
१३. इन्द्रोन्नतभूमिः किं फलं प्रददाति?
१४. यस्याः भूमेः पूर्वदिशि वटवृक्षः भवेत् तस्य किं फलं भवति?
१५. उत्तरे कस्य वृक्षस्य निषेधः अस्ति?

२.७ हलाग्रेणोद्धृतप्राप्तवस्तुफलम्

भूखण्डे गृहनिर्माणकार्यारम्भात्पूर्वं तत्स्थलं संशोधनाय भूस्वामी लाङ्गलाग्रेण (हलेन) भूमिं कर्षति। खननसमये तस्मिन् स्थाने विभिन्नशुभाशुभद्रव्याणि लभ्यन्ते। तानि लब्धद्रव्यैः यच्छुभाशुभफलानि भवन्ति तानि सर्वाणि अत्र विवेचितानि सन्ति।

काष्ठेष्टकातुषाङ्गारपाषाणास्थिसरीसृपान्।
हलाग्रेणोद्धृतान् दृष्ट्वा तत्र विद्यादिदं फलम्॥७४॥
काष्ठेष्वग्निभयं विद्यादिष्टकासु धनागमम्।
अङ्गारेषु तथा रोगं तुषेष्वेव धनक्षयम्॥७५॥
पाषाणेष्वपि कल्याणं कुलनाशं तथास्थिषु।
सरीसृपेषु सर्वेषु तादृग्भ्यो भयमादिशेत्॥७६॥

अन्वयः – हलाग्रेणोद्धृतान् काष्ठेष्टकातुषाङ्गारपाषाणास्थिसरीसृपान् दृष्ट्वा तत्र इदं फलं विद्यात्। काष्ठेषु अग्निभयं विद्यात्, इष्टिकासु धनागमं तथा अङ्गारेषु रोगं, तुषेषु एव धनक्षयं, पाषाणेषु कल्याणं, तथा अस्थिषु कुलनाशं, सर्वेषु सरीसृपेषु तादृग्भ्यो भयम् अपि आदिशेत्।

प्रतिपदार्थः – हलाग्रेण = हलस्य अग्रभागेण (सीतया इति भावः) उद्धृतान् = कर्षिते प्राप्तपदार्थान् (यथा) काष्ठः = काष्ठः, इष्टका = इष्टिका ईंट इति हिन्द्याम्, तुषः = धान्यावरणः भूसा इति हिन्द्याम्, अङ्गारः = अग्निदग्धावशेषः कोयला इति हिन्द्याम्, पाषाणः = प्रस्तरखण्डः, अस्थि = हड्डी इति हिन्द्याम्, सरीसृपान् = सर्पादिसरीसृपजीवान्, दृष्ट्वा = अवलोक्य, तत्र = तस्मिन् स्थले, इदं फलं = शुभाशुभफलं, विद्यात् = जानीयात्।

काष्ठेषु = काष्ठखण्डेषु, अग्निभयं = वह्निभयं विद्यात् = विजानीयात्, ईष्टकासु = ईष्टकाखण्डेषु, धनागमं = वित्तलाभं, तथा = तेन प्रकारेण अङ्गारेषु, रोगं = रोगभयं, तुषेषु = धान्यादि-आवरणेषु, एव = निश्चयरूपेण, धनक्षयं = वित्तक्षयं, पाषाणेषु = प्रस्तरखण्डेषु कल्याणं = मङ्गलप्रदं, तथा = तेन प्रकारेण अस्थिषु = शल्येषु, कुलनाशं = वंशनाशं, सर्वेषु = समस्तेषु, सरीसृपेषु = सर्पादिजीवेषु, तादृग्भ्यो भयं = यथा सर्पः दृश्यते तदा सर्पभयम् एवमेव अन्य सरीसृपेभ्यो अपि भीतिः भवेदिति, आदिशेत् = निर्दिशेत्।

सरलार्थः – वास्तुक्षेत्रं हलाग्रभागेण खननादनन्तरं यदि तत्र काष्ठम् ईंटखण्ड अङ्गारः तुषः प्रस्तरखण्डः अस्थि सर्पादिसरीसृपाः वा दृश्यते तर्हि तदनुसारेण तेषां फलमपि भवत्येव। खननसमये यदि काष्ठस्य दर्शनं भवेत्तदा तद्गृहस्य कृते अग्निकारणात् भयं समुत्पन्नं भवति। एवं यदि ईष्टिकायाः प्राप्तिः स्यात्तर्हि धनधान्यलाभं भवेत्। यदि तुषस्य दर्शनं भवेत्तदा धनहानिः स्यात्। यदि अङ्गारस्य प्राप्तिः स्यात्तर्हि रोगभयं भवेत्। यदि प्रस्तरखण्डानां दर्शनं भवेत्तदा कर्तुः कल्याणं शुभं च जानीयात्। यदि अस्थिप्राप्तिः स्यात्तर्हि गृहस्वामिनः वंशनाशं भवेत्। एवं तत्र यदि सर्पादिसरीसृपजीवानां दर्शनं भवेत्तदा तादृग्भ्यो भयं भवति । यथा सर्पः दृश्यते तदा सर्पभयम् एवमेव अन्य सरीसृपेभ्यो अपि भीतिः भवेदिति।

२.८ प्रशस्ताप्रशस्तभूमिफलम्

यस्यां भूमौ दर्शनेन मनसि आनन्दानुभूतिः भवति। अपि च भूमिः नतोन्नतरहिता सर्वत्र समाना, शुभ्रवर्णा, सुगन्धा, स्निग्धा, मधुरा, विभिन्नौषधिभिः फलपुष्पवृक्षादिभिश्च युक्ता भवेत्। यत्र पथिकस्य श्रमनिवारणं भवति। तादृशी भूमिः प्रशस्ता निवासयोग्या च भवति। इत्यतिरिच्य या भूमिः स्फुटिता, असमाना, वल्मीकयुक्ता, अतिप्रस्तरयुक्ता कृष्णवर्णा दुर्गन्ध-युक्ता फलपुष्पवृक्षादिरहिता जलहीना शल्यादियुक्ता च भवेत्। सा भूमिः अप्रशस्ता निवासाय अयोग्या भवतीति वास्तुशास्त्रविशारदैः कथितमस्ति। अत्रापि प्रशस्तभूमिलक्षणं पठिष्यामः।

२.८.१ प्रशस्तभूमिफलम्

अनूषरा स्निग्धवती प्रशस्ता च बहूदका।
तृणोपलान्विता या सा मान्या वास्तुविधौ धरा॥७७॥
शस्तौषधिद्रुमलता मधुरा सुगन्धा
स्निग्धा समानसुखदा च मही नराणाम्।
अप्यध्वनि श्रमविनोदमुपागतानां
धत्ते श्रियं किमुत शाश्वतमन्दिरेषु॥७८॥

अन्वयः – या धरा अनूषरा स्निग्धवती बहूदका तृणोपलान्विता च (भवेत्)। सा (भूमिः) वास्तुविधौ प्रशस्ता मान्या च। (या) मही शस्तौषधिद्रुमलता मधुरा सुगन्धा स्निग्धा समानसुखदा च (भवेत्)। (सा भूमिः) अपि अध्वनि उपागतानां नराणां श्रमविनोदं धत्ते अपि किमुत शाश्वतमन्दिरेषु श्रियं (धत्ते)।

प्रतिपदार्थः – या धरा = भूमिः, अनूषरा = ऊषररहिता सस्यवतीति भावः, स्निग्धवती = स्नेहयुक्ता बहूदका = अधिकजलयुक्ता, तृणोपलान्विता = तृणघासप्रस्तरसंयुक्ता च स्यात्। सा = तादृशी भूमिः, प्रशस्ता = शुभा श्रेष्ठा, वास्तुविधौ = गृहनिर्माणाय इति भावः मान्या = ग्रहणीया भवतीति।

या मही = भूमिः, शस्तौषधिद्रुमलता = श्रेष्ठवनस्पतियुक्ता शुभवृक्षलतादिभिः संयुक्ता च, मधुरा = मृष्टस्वादयुता, सुगन्धा = आज्यादिशुभगन्धवती, स्निग्धा = सस्नेहा, समाना = सर्वत्र तुल्या, सुखदा = सुखप्रदा च स्यात्। अपि च अध्वनिः = भूम्युपरि पदार्पणेन नादरहिता कोलाहलरहिता इति भावः, उपागतानां नराणां = भूमिसमीपागतानां श्रान्तानां क्लान्तानां जनानां, श्रमविनोदम् = श्रमं दूरीकृत्य विनोदं जनयतीति भावः, अपि = अत्रावस्थितत्वादपि किमुत = कथं न, शाश्वतमन्दिरेषु = स्थिरभवनादिनिर्माणं कृत्वा ये तत्र निवसन्ति तेषां कृते, श्रियं = लक्ष्मीं धत्ते = विधत्ते।

सरलार्थः – या भूमिः अनूषरा स्नेहवती अधिकजलयुक्ता तृणघाससहिता प्रस्तरयुक्ता च स्यात् सा भूमिः वास्तुशास्त्रानुसारेण निवासाय योग्या प्रशस्ता ग्रहणीया च भवति।

या मृत्तिका विभिन्नौषधियुक्ता, याज्ञिक-पलाशपिप्पलप्रभृतिवृक्षसहिता श्यामलतादिसमन्विता च स्यात्। या च पदचापध्वनिरहिता भूमिः समुपागतानां जनानां श्रमोपनोदनं कृत्वा विनोदं जनयति। सा भूमिः कथं न तत्र निवासिनां कृते लक्ष्मीं प्रदास्यतीति। अर्थात् ये जना तत्र गृहनिर्माणपूर्वकं निरन्तरं निवसन्ति तेषां धनधान्यादिवर्द्धनं तथा स्थिरशाश्वतसुखञ्च भवति।

२.८.२ भूमिदोषाः

स्फुटिता च सशल्या च वल्मीकाऽऽरोहिणी तथा।
दूरतः परिहर्तव्या कर्त्तुरायुर्धनापहा॥७९॥
स्फुटिता मरणं कुर्यादूषरा धननाशिनी।
सशल्या क्लेशदा नित्यं विषमा शत्रुवर्धिनी॥८०॥
चैत्ये भयं गृहकृतो वल्मीके स्वकुले विपत्।
गर्तानां तु विनाशः स्यात् कूर्माकारे धनक्षयः॥८१॥

अन्वयः – (या भूमिः) स्फुटिता सशल्या च वल्मीका तथा आरोहिणी (स्यात्) (सा भूमिः) दूरतः परिहर्तव्या (यतः) कर्तुः आयुर्धनापहा च (भवेत्)। (या भूमिः) स्फुटिता

(सा वासकर्तुः) मरणं कुर्यात्, ऊषरा धननाशिनी, सशल्या नित्यं क्लेशदा, विषमा शत्रुवर्धिनी (स्यात्)। चैत्ये गृहकृतो भयं, वल्मीके स्वकुले विपद्, गर्तानां तु विनाशः, कूर्माकारे धनक्षयः स्यात्।

प्रतिपदार्थः - (या) स्फुटिता = विवरयुक्ता खण्डिता, सशल्या = अस्थिप्रभृतिशल्यसमन्विता, च वल्मीका = वल्मीकयुता, तथा = तेन प्रकारेण भूमिः, आरोहिणी = नतोन्नता स्यात्, (सा भूमिः) दूरतः = दूरादेव, परिहर्तव्या = परित्याज्या, नोचेत्, कर्तुः = निवासकर्तुः, आयुर्धनापहा = आयुषः धनस्य च नाशं करोति।

(या भूमिः) स्फुटिता = खण्डिता विवरयुक्ता, (सा) वासकर्तुः मरणं = निधनं कुर्यात् = करोति, ऊषरा = घासशस्याद्युत्पादने असमर्था भूमिः, धननाशिनी = धनहन्त्री स्यात्। सशल्या = अस्थिप्रभृतिशल्ययुक्ता धरा, नित्यं = निरन्तरं सर्वदा, क्लेशदा = कष्टदा भवति। विषमा = नतोन्नतयुक्ता शत्रुवर्धिनी = शत्रुवृद्धिकारिणी भवेत्। चैत्ये = समाधिस्थले श्मशाने वा, गृहकृतः = गृहनिर्माणात्, भयं = अशुभं भीतिश्च स्यात्। वल्मीके = वल्मीकसमन्विते भूमौ गृहनिर्माणेन, स्वकुले = स्वस्य कुले वंशे, विपत् = विपत्तिरागच्छति। गर्तानां = विवरयुक्तभूमौ इति भावः, विनाशः = सर्वनाशः भवति। कूर्माकारे = भूमौ मध्यस्थलं उन्नतयुक्तः स्याततु कूर्माकारभूमिः, तत्र गृहनिर्माणेन, धनक्षयः = धननाशः स्यात्।

सरलार्थः - या भूमिः खण्डिता शल्ययुता सर्पादियुक्ता वल्मीकसमन्विता नतोन्नतस्थलयुता असमाना निरसा च स्यात्। सा मही दूरादेव परित्याज्या नोचेत् निवासकर्तुः आयुषः धनस्य च क्षयं जानीयात् इति।

या अवनी स्फुटिता खण्डिता च भवति। सा भूमिः वासकर्तुः निधनं करोति। ऊषरा भूमिः धननाशं करोति। शल्ययुता भूमिः नित्यं क्लेशं प्रददाति। असमाना नतोन्नतसमन्विता भूमिः कुलं विनाशयति। या भूमिः मध्योन्नतस्थलयुता कूर्माकारा दृश्यते। सा भूमिः धनविनाशिनी भवतीति।

बोधप्रश्नाः

१६. भूमिः खननात्परं यदि काष्ठं दृश्यते तर्हि किं फलं वर्तते?

१७. पाषाणस्य दर्शनेन किं फलं भवति?

१८. कीदृशी भूमिः निवासयोग्या भवति?

१९. का मही नष्टफलप्रदा भवति?

२०. "आरोहिणी" इत्यस्य शब्दस्य कोऽर्थः?

ग्रन्थस्य मूलपाठः

दिक्प्लवत्वादिफलम्

श्रियं दाहं तथा मृत्युं धनहानिं सुतक्षयम्।
प्रवासं धनलाभं च विद्यालाभं क्रमेण च॥३५॥
विदध्यादचिरेणैव पूर्वादिप्लवतो मही।
मध्यप्लवा मही नेष्टा न शुभा प्लवतत्परा॥३६॥
शम्भुकोणे प्लवा भूमिः कर्तुः श्रीसुखदायिनी।
पूर्वप्लवा वृद्धिकरी धनदा तूत्तरप्लवा॥३७॥

मृत्युशोकप्रदा नित्यमाग्नेयी दक्षिणप्लवा।
गृहक्षयकरी सा च भूमिर्या निर्ऋतिप्लवा॥३८॥
धनहानिकरी चैव कीर्तिदा वरुणप्लवा।
वायुप्लवा तथा भूमिर्नित्यमुद्वेगकारिणी॥३९॥
सौम्यादिप्लवभूतले विरचयेद्विप्रादिकोऽग्रयोऽखिले।
नान्येषां नियमोऽथ यत्र निखिला कुर्युगृहं ह्यस्थिरम्॥४०॥
पूर्वप्लवा वृद्धिकरी उत्तरा धनदा स्मृता।
अर्थक्षयकरीं विद्यात् पश्चिमप्लवना ततः॥४१॥
दक्षिणप्लवना पृथ्वी नराणां मृतिदा भवेत्॥४१-१/२॥

भूमौ वीथ्यादिविचारः

वारुणोच्चसमायुक्ता नीचमाहेन्द्रसंयुता॥४२॥
सा गोवीथिरिति ज्ञेया ऐन्द्रोच्चा नीचवारुणा।
जलवीथिरिति प्रोक्ता वास्तुज्ञानविशारदैः॥४३॥
सोमोच्चयमनीचा च यमवीथीति कथ्यते।
यमोच्चसोमनीचा च गजवीथीति कथ्यते॥४४॥
ईशोच्चं निर्ऋतौ नीचं भूतलं भूतवीथिकम्।
आग्नेयोच्चं वायुनीचं नागवीथी प्रशस्यते॥४५॥
वायूच्चमग्निनीचं यद् वीथिं वैश्वानरीं विदुः।
निर्ऋत्युच्चमीशनीचं धनवीथीत्युदाहृता॥४६॥

पैतामहादिवास्तुफलम्

इन्द्राग्न्यन्तरमुच्चं स्यान्नीचं वरुणवातयोः।
वास्तु पैतामहं विद्यान्नराणां कुरुते शुभम्॥४७॥
याम्याग्न्यन्तरमुच्चं स्यान्नीचं मारुतसोमयोः।
सुपथं नाम तद्वास्तु प्रशस्तं सर्वकर्मणि॥४८॥
सोमेशानन्तरं नीचमुच्चं निर्ऋतिकालयोः।
दीर्घायुर्नाम तद्वास्तु प्रशस्तं कुलवर्द्धनम्॥४९॥
ईशानेन्द्रान्तरं नीचमुच्चं वरुणरक्षसोः।
पुण्यकं नाम तद्वास्तु द्विजानां च शुभावहम्॥५०॥
इन्द्राग्न्योरन्तरं नीचमुच्चं वायुजलेशयोः।
अपथं नाम तद्वास्तु वैराय कलहाय च॥५१॥
कालाग्न्योरन्तरं नीचमुच्चं स्याद्वायुसोमयोः।
रोगकृन्नाम तद्वास्तु नराणां रोगवृद्धिकृत्॥५२॥
निर्ऋत्यन्तकयोर्नीचमुच्चं सोमशिवान्तरम्।
अर्गलं नाम तद्वास्तु ब्रह्महत्यादिनाशकृत्॥५३॥
रुद्रेन्द्रान्तरमुच्चं स्यान्नीचं वरुणरक्षसोः।
श्मशानं नाम तद्वास्तु केवलं कुलनाशनम्॥५४॥
नीचमग्नौभवेदुच्चं निर्ऋतीशानवायुषु।
श्येनकं नाम तद्वास्तु नाशाय मरणाय च॥५५॥
रुद्राग्निवरुणेषूच्चं नीचं स्यान्निर्ऋतौ तथा।
श्वमुखं नाम तद्वास्तु दारिद्र्यं कारयेत् फलम्॥५६॥
नैर्ऋत्याग्निशिवेषूच्च नीचं वह्नीन्द्रयोस्तथा।
ब्रह्मघ्नं नाम तद्वास्तु नेष्टं प्राणभृतां सदा॥५७॥

अग्नौ यदि भवेदुच्चं नीचं निर्ऋतिरुद्रयोः।
वातनिम्नं च तद्वास्तु स्थावरं नाम शोभनम्॥५८॥
उच्चं निर्ऋतिभागे स्यान्नीचं ज्वलनवातयोः।
रुद्रनिम्नं च तद्वास्तु स्थण्डिलं नाम शोभनम्॥५९॥
रुद्रोच्चं यदि निम्नं स्याद्वह्नौ निर्ऋतिवातयोः।
शाण्डुलं नाम तद्वास्तु प्रापयत्यशुभं सदा॥६०॥
नैर्ऋत्याग्निशिवेषूच्चं नीचं चन्द्रमसं प्रति।
द्विजेन्द्राणान्तु सुस्थानमवनी समुदाहृता॥६१॥
नीचमिन्द्रे भवेदुच्चं निर्ऋत्यां पश्चिमानिले।
सुतलं नाम तद्वास्तु राजराष्ट्रविवर्धनम्॥६२॥
सौम्येशपवनेषूच्चं नीचं भवति चेद्यमे।
नाम्ना वास्तु चरं यत्स्याद्वैश्यानां तदभीष्टदम्॥६३॥
नीचं वारुणमुच्चं चेदीशानेन्द्राग्निषु क्रमात्।
श्वमुखं नाम तद्वास्तु शूद्राणां तद्भीष्टदम्॥६४॥
दिग्वशाद्भूमेः नतोन्नतादिफलविचारः
या तु सौम्यप्लवा चैव कुशदर्भैरलङ्कृता।
आज्यगन्धा च सा भूमिर्ब्राह्मणानां प्रशस्यते॥६५॥
पूर्वप्लवा च रक्ता च कुशदर्भैरलङ्कृता।
रक्तगन्धा च या भूमिः क्षत्रियाणां प्रशस्यते॥६६॥
दक्षिणप्लवनोपेता कुशदर्भैरलङ्कृता।
अन्नगन्धा च या भूमिः सा वैश्यानां प्रशस्यते॥६७॥
पश्चिमप्लवनोपेता दूर्वाभिश्च समन्विता।
सुरागन्धा च या भूमिः शूद्राणां समुदाहृता॥६८॥
इन्द्रोन्नतं पुत्रनाशं वह्न्युन्नतमथार्थदम्।
अग्निनीचोऽर्थनाशः स्याद् याम्योन्नतमरोगकृत्॥६९॥
निर्ऋत्युच्चे श्रियो लाभ पुत्रदं वरुणोन्नतम्।
वायून्नतं द्रव्यनाशं सौम्योन्नतमथागदम्॥७०॥
ईशानोच्चं महाक्लेशं वास्तु विद्यादितिक्रमात्॥७१-१/२॥

दिग्वशाच्छुभाशुभवृक्षविचारः

अश्वत्थः पूर्वतो धन्यो दक्षिणस्यामुदुम्बरः।
न्यग्रोधः पश्चिमे श्रेष्ठः प्लक्षोऽप्युत्तरतः शुभः॥७१॥
न्यग्रोधः पूर्वतो वर्ज्यो दक्षिणे प्लक्ष एव च।
अश्वत्थः पश्चिमे भागे ह्युत्तरे चाप्युदुम्बरः॥७२॥
अश्वत्थोऽग्निभयं कुर्यात् प्लक्षः कुर्यात् प्रमादकम्।
न्यग्रोधः शस्त्रसम्पातं कुक्षिरोगमुदुम्बरः॥७३॥

हलाग्रेणोद्धृतप्राप्तवस्तुफलम्

काष्ठेष्टकातुषाङ्गारपाषाणास्थिसरीसृपान्।
हलाग्रेणोद्धृतान् दृष्ट्वा तत्र विद्यादिदं फलम्॥७४॥
काष्ठेष्वग्निभयं विद्यादिष्टकासु धनागमम्।
अङ्गारेषु तथारोगं तुषेष्वेव धनक्षयम्॥७५॥
पाषाणेष्वपि कल्याणं कुलनाशं तथास्थिषु।
सरीसृपेषु सर्वेषु तादृग्भ्यो भयमादिशेत्॥७६॥

प्रशस्ताप्रशस्तभूमिविचारः

अनूषरा स्निग्धवती प्रशस्ता च बहूदका।
तृणापलान्विता या सा मान्या वास्तुविधौ धरा॥७७॥
शस्तौषधिद्रुमलता मधुरा सुगन्धा
स्निग्धा समानसुखदा च मही नराणाम्।
अप्यध्वनि श्रमविनोदमुपागतानां
धत्ते श्रियं किमुत शाश्वतमन्दिरेषु॥७८॥

भूमिदोषाः

स्फुटिता च सशल्या च वल्मीकाऽऽरोणि तथा।
दूरतः परिहर्तव्या कर्त्तुरायुर्धनापहा॥७९॥
स्फुटिता मरणं कुर्यादूषरा धननाशिनी।
सशल्या क्लेशदा नित्यं विषमा शत्रुवर्धिनी॥८०॥
चैत्ये भयं गृहकृतो वल्मीके स्वकुले विपत्।
गर्तायांतु विनाशः स्यात् कूर्माकारे धनक्षयः॥८१॥

२.९ सारांशः

प्रियच्छात्र! भवान् अस्मिन् द्वितीये पाठे सर्वप्रथमं भूमेः अष्टदिक्प्लवत्वफलम् अर्थात् भूमिः विभिन्नदिक्षु नतोन्नता भवेत् तदा तस्य नतोन्नतस्य किं फलं भवेदिति सम्यग् रूपेण अधीतवान्। भूमेः विभिन्नवीथिकानां तथा दिगनुसारं तेषां शुभाशुभफलमपि अत्र विवेचितम्। एवमत्र पैतामहादिविविधवास्तुप्रकारः तथा च तेषां लक्षणं फलञ्चापि भवान् ज्ञातवान्। तदनन्तरं तद्वास्तु वर्णानुसारं केषां जातकानां कृते निवासाय शुभं स्यादित्यपि पठितवान्। कस्यां दिशि भूमेः प्लवता कस्य वर्णस्य कृते शुभं स्यादित्यस्यापि निर्धारणमपि भवान् कर्तुं शक्ष्यति। भूमेः दिग्वशाद् उन्नत-नतफलं, हलाग्रेण उद्धृतानां प्राप्तवस्तूनां फलञ्च ज्ञातवान्। अस्य पाठस्य अध्ययनेन भवान् भूमेः मृत्तिकायाः लक्षणं तथा च तत्स्थानस्य लक्षणं दृष्ट्वा प्रशस्ताप्रशस्तनिर्धारणे सक्षमो जातः। यदि भूमिः खण्डिता शल्ययुक्ता वल्मीकयुक्ता च भवेत्तदा तत्र निवासकृते का हानिः भवति? तदपि इत्यस्मिन् पाठे अधीतवान्। मन्ये पाठस्य अध्ययनेन भवान् भूमिपरीक्षणे निपुणो जातः।

२.१० शब्दावली

१.	प्रवासः	–	परदेशवासः
२.	विदधाति	–	प्रददाति
३.	प्लवा	–	अवनता
४.	विरचयेत्	–	रचना कारयेत्
५.	मृतिदा	–	मृत्युप्रदा
६.	नेष्टा	–	न इष्टप्रदा, अशुभा
७.	अचिरेण	–	शीघ्रमेव
८.	वीथिः	–	शीघ्रमेव
९.	प्रोक्ता	–	उक्ता

१०. ज्ञेया – विज्ञेया

११. कालः – यमः;दक्षिणदिक्स्वामी यमः, अतः दक्षिणदिग् ज्ञेया

१२. इन्द्रः – पूर्वदिक्स्वामी, अतः पूर्वदिग् ज्ञेया

१३. वातः – वायुः, वायव्यदिक्स्वामी

१४. वरुणः – पश्चिमदिक्स्वामी

१५. वह्निः – अग्निः, आग्नेयदिक्स्वामी

१६. नैर्ऋत्यः – निर्ऋतिकोणः

१७. मारुतः – वायुः, वायव्यकोणः

१८. ईशः – रुद्रः, ईशानकोणस्वामी

१९. नीचम् – अवनतम्

२०. उच्चम् – उन्नतम्

२१. सोमः – उत्तरः

२२. अभीष्टदम् – इष्टप्रदम्

२३. सुरा – मद्य

२४. आज्यगन्धा – घृतगन्धा

२५. न्योग्रोधः – वटवृक्षः

२६. हि – निश्चयः

२७. प्लक्षः – पलाशः

२८. तुष – धान्यावरण

२९. सरीसृपादि – सर्पादिजीवाः

३०. कुक्षि – उदरः

३१. हलम् – लाङ्गलम्,

३२. अस्थियुक्तः – शल्ययुक्तः, हड्डी इति हिन्द्याम्

३३. शाश्वतः – नित्यम्, स्थिरः

३४. स्फुटिता – खण्डिता

३५. विषमा – नतोन्नता

३६. कूर्माकारः – कूर्मसदृशः आकारः

३७. उपलान्विता – प्रस्तरान्विता

३८. उदका – जलयुक्ता

३९. चैत्ये – श्मशाने, समाधिस्थले, स्मारकस्थाने

२.११ सन्दर्भग्रन्थः

१. **बृहद्वास्तुमाला - लेखकः- श्रीरामनिहोरद्विवेदी,**
सम्पादकः- ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन वाराणसी।

२.१२ सहायकग्रन्थाः

१. **बृहत्संहिता श्रीवराहमिहिरकृता,**
व्याख्याकारः- पं. अच्युतानन्द झा, चौखम्बा सुरभारती प्रकाशन वाराणसी

२. **वास्तुरत्नावली - श्रीजीवनाथझादैवज्ञ विरचिता,**
टीकाकारः - श्रीमदच्युतानन्दः झा, चौखम्बा अमरभारती प्रकाशन वाराणसी।

३. **मुहूर्तचिन्तामणिः श्रीरामदैवज्ञविरचितः**
प्रकाशकः - चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी।

४. **वास्तुरत्नाकरः श्री विन्ध्येश्वरी प्रसाद द्विवेदी विरचितः,**
चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, प्रकाशक

२.१३ बोधप्रश्नोत्तराणि

१. धनधान्यप्रदा, वृद्धिकारी वा

२. क्षत्रियः

३. वायुप्लवा भूमिः नित्यमुद्वेगकारिणी

४. वैश्यजातीया

५. धननाशिनी

६. यमवीथीति कथ्यते

७. यस्याः भूमेः आग्नेयकोणः अवनतः निर्ऋति-ईशान-वायव्यकोणाश्च समुन्नताः स्युः।

८. कुलनाशको भवति।

९. अयोग्यः

१०. सुस्थानमवनी

११. सा भूमिः क्षत्रिया

१२. वैश्य-जातीया

१३. पुत्रं नाशयति।

१४. शस्त्रभयं करोति

१५. उदुम्बरः

१६. अग्निभयं प्रददाति

१७. कल्याणम्

१८. या मधुरा-सुगन्धा-विभिन्नौषधिवृक्षयुक्ता स्यात्।

१९. या स्फुटिता-शल्ययुक्ता-विषमा-नतोन्नतस्थलयुक्ता

२०. नतोन्नता

२.१४ अभ्यासप्रश्नाः

१. भूमेः दिग्वशात्प्लवत्वफलं प्रतिपादयत?

२. या भूमिः वरुणोच्चसमायुक्ता नीचमाहेन्द्रसंयुता भवेत् सा का वीथीति निरूपयत?

३. द्विजेन्द्राणां कृते कीदृशी भूमिः सुखदा भवति?

४. दिग्वशात् वृक्षाणां शुभाशुभत्वफलं प्रतिपादयत?

५. का भूमिः दूरतः परिहर्तव्या?

६. वास्तुशास्त्रानुसारं कीदृशी भूमिः निवासयोग्या भवेदिति वर्णयत?

तृतीयः पाठः - भूमिलक्षणादिविचारः

पाठसंरचना

३.१ प्रस्तावना
३.२ उद्देश्यम्
३.३ गजपृष्ठादिभूमिलक्षणविचारः
३.३.१ सफलं गजपृष्ठभूमिलक्षणम्
३.३.२ कूर्मपृष्ठभूमिलक्षणम्
३.३.३ दैत्यपृष्ठभूमिलक्षणम्
३.३.४ नागपृष्ठभूमिलक्षणम्
बोधप्रश्नाः
३.४ आयताद्याकारानुसारेण भूमिविचारः
३.४.१ आयताद्याताकारानुसारेण भूमिफलम्
३.४.२ आयताकारभूमिलक्षणम्
३.४.३ चतुरस्रभूमिलक्षणम्
३.४.४ वृत्ताकारभूमिलक्षणम्
३.४.५ भद्रासताकारभूमिलक्षणम्
३.४.६ चक्राकारभूमिलक्षणम्
३.४.७ विषमाकारलक्षणम्
३.४.८ त्रिकोणाकारभूमिलक्षणम्
३.४.९ शकटाकारभूमिलक्षणम्
३.४.१० दण्डाकारभूमिलक्षणम्
३.४.११ शूर्पाकारभूमिलक्षणम्
३.४.१२ गोव्याघ्रबन्धनाकारभूमिलक्षणम्
३.४.१३ धनुषाकारभूमिलक्षणम्
३.४.१४ वासयोग्या भूमिः
३.५ जाग्रतादिभूमिज्ञानविधिः
३.५.१ जाग्रतादिभूमिज्ञानम्
३.५.२ भूमिशयनविचारः
३.५.३ जीवितादिभूमिज्ञानम्
३.५.४ प्रश्नाज्जीवितादिभूमिज्ञानम्
३.५.५ प्रकारान्तरेण जीवितभूमिज्ञानम्
बोधप्रश्नाः
३.६ भूमेः खननादिविचारः
३.६.१ भूमेः खननाधिकारः
३.६.२ खातविधिः (राहुमुखविचारः)
३.७ भूमिपरीक्षणादिविचारः
३.७.१ विश्वकर्मप्रकाशे भूमिसंशोधनविधिः
३.७.२ वास्तुरत्ने भूमिसंशोधनविधिः
३.७.३ नारायणभट्टमते भूमिसंशोधनविधिः
बोधप्रश्नाः
३.८ खातमध्ये पाषाणादिप्राप्तिफलविचारः भूमिपूजा च
३.८.१ खातमध्ये पाषाणादिप्राप्तिफलम्

३.८.२ भूमिपूजाविधिः
३.९ पिण्डाद् भित्तिविचारः
३.९.१ पिण्डाद् बहिरन्तर्वा भित्तिः कर्त्तव्येति विचारः
३.९.२ नारायणभट्टमते भित्तिविचारः
बोधप्रश्नाः
ग्रन्थस्य मूलपाठः
३.१० सारांशः
३.११ शब्दावली
३.१२ सन्दर्भग्रन्थः
३.१३ सहायकग्रन्थाः
३.१४ बोधप्रश्नोत्तराणि
३.१५ अभ्यासप्रश्नाः

३.१ प्रस्तावना

प्रियच्छात्र! बृहद्वास्तुमालायाः तृतीये पाठे भवतः स्वागतम्। इतः पूर्वं द्वितीये पाठे भवान् दिक्प्लत्वविचारप्रसङ्गे भूमेः अष्टदिक्प्लवत्वफलं, विभिन्नवीथ्यादिफलं, पैतामहादि-विविधवास्तुफलं, भूमेः नतोन्नतादिफलं, भूमेः जलप्लवत्व-रस-गन्ध-स्वाद-वर्णानुसारेण ब्राह्मण-क्षत्रिय-वैश्य-शूद्रजातित्वनिर्धारणं, तथा दिग्वशाच्छुभाशुभवृक्षाणां फलनिर्णयः, हलाग्रेणोद्धृतप्राप्त वस्तूनां फलं, स्फुटित-शल्ययुक्त-वल्मीकयुक्तस्थलविचारश्चेति सम्यग्रूपेण अधीतवान्। तृतीयपाठस्य नाम भूमिलक्षणादिविचारः। अस्मिन् पाठे भूमिलक्षणविचारप्रसङ्गे भवान् गजपृष्ठ-कूर्मपृष्ठ-नागपृष्ठ-दैत्यपृष्ठभूमिविचारः पठिष्यति, तथा आयताद्याकारानुसारेण भूमिलक्षणं, गर्गादि-ऋषीणाम् मतानुसारेण वासयोग्यभूमेः निर्धारणम्, भूमेः जाग्रत-शयन-जीवितादिविचारः, प्रथमखातखननस्याधिकारनिर्णयश्चेति विषयान् ज्ञास्यति। राहुमुखपुच्छाधारेण कस्मिन् मासे? कस्यां दिशि? खातः समुचितः इत्यपि पठिष्यति। अनन्तरं विभिन्नवास्तुग्रन्थानुसारं भूमेः परीक्षणविधीनामध्ययनमपि करिष्यति। अस्मिन्नैव क्रमे खातमध्ये पाषाणादिप्राप्तवस्तूनां फलं ज्ञास्यति। भूमिः पूजाविधिः, पिण्डाद् बहिरन्तर्वा भित्तिः स्थापनविचारादयः अपि अस्मिन् पाठे प्रतिपादिताः भविष्यन्ति।

३.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- गजपृष्ठादिभूमिलक्षणविचारे कुशलो भविष्यति।
- आयताद्याकारानुसारेण भूमिविचारे समर्थो भविष्यति।
- सफलं भूमेः शयन-जाग्रत-जीवितादिविचारं ज्ञास्यति।
- भूमेः खननस्याधिकारिविषये निर्णेतुं शक्ष्यति।
- राहुमुखपुच्छाधारेण खातनिर्माणविधिं ज्ञास्यति।
- भूमिसंशोधने परीक्षणे च दक्षो भविष्यति।
- खाते खननसमये प्राप्तवस्तूनां फलादेशे प्रवीणो भविष्यति।
- पिण्डाद्बहिरन्तेर्वा भित्तिः कुत्र स्थापनीयेति ज्ञास्यति।

३.३ गजपृष्ठादिभूमिलक्षणविचारः

भूमेः विभिन्नदिशि उन्नतावनतानुसारेण निवासस्य योग्या अयोग्या वा भवति। प्राचीनाचार्यैः उन्नतावनतानुसारेण भूखण्डस्य गजपृष्ठादिसंज्ञा प्रकल्पिता। अत्र वयं गजपृष्ठादिभूमिलक्षणविचारं पठिष्यामः।

३.३.१ सफलं गजपृष्ठभूमिलक्षणम्

दक्षिणे पश्चिमे चैव नैर्ऋत्ये वायुकोणके।
एभिरुच्चा यदा भूमिर्गजपृष्ठाऽभिधीयते॥८२॥
गजपृष्ठे भवेद्वासः स लक्ष्मीधनपूरितः।
आयुर्वृद्धिकरो नित्यं जायते नात्र संशयः॥८३॥

अन्वयः - यदा भूमिः दक्षिणे पश्चिमे नैर्ऋत्ये वायुकोणके च एव एभिः उच्चा (स्यात्)। (सा) गजपृष्ठा (भूमिः) इति अभिधीयते॥

(यस्य) गजपृष्ठे वासः भवेत् स लक्ष्मीधनपूरितः आयुवृद्धिकरो च नित्यं जायते अत्र न संशयः।

प्रतिपदार्थः - यदा = यत्र, भूमिः = मही, दक्षिणे = दक्षिणदिशि, पश्चिमे = पश्चिमदिशि नैर्ऋत्ये = दक्षिणपश्चिमकोणे, वायुकोणके = पश्चिमोत्तरकोणे च एव = अव्ययशब्दः, एभिः = एताभिः, उच्चा = उन्नता, दृश्यते, (सा) गजपृष्ठा = गजपृष्ठभूमिः इति अभिधीयते = कथ्यते।

गजपृष्ठे = गजपृष्ठभूमौ, वासः = यस्य नरस्य निवासः, भवेत् = स्यात्, स = निवासकर्ता, नित्यं = सर्वदा निरन्तरं, लक्ष्मीधनपूरितः = श्रीधनैः समन्वितः, आयुर्वृद्धिकरः = तस्य आयुष्यमपि वर्धते इति भावः, जायते = प्रजायते, अत्र = अस्मिन् विषये, न = नहि संशयः = सन्देहावसरः।

सरलार्थः - या भूमिः दक्षिणे पश्चिमे निर्ऋतिकोणे वायुकोणे च उच्चा भवेत्, सा भूमिः गजपृष्ठभूमिः इति कथ्यते। तस्यां गजपृष्ठभूमौ निवासेन वासकर्तुः श्रीधनैः समन्वितो भवति। एवमत्र तस्य आयुष्यवृद्धिरपि भवति।

३.३.२ कूर्मपृष्ठभूमिलक्षणम्

मध्येऽत्युच्चं भवेद्यत्र नीचं चैव चतुर्दिशम्।
कूर्मपृष्ठा भवेद् भूमिस्तत्र वासो विधीयते॥८४॥
कूर्मपृष्ठे भवेद्वासो नित्योत्साहसुखप्रदः।
धनधान्यं भवेत्तस्य निश्चितं विपुलं धनम्॥८५॥

अन्वयः - यत्र भूमिः मध्ये अति उच्चं च चतुर्दिशं नीचम् एव भवेत्, (सा) कूर्मपृष्ठा (भूमिः) भवेत्, तत्र वासः विधीयते।

(यदि) कूर्मपृष्ठे वासो नित्योत्साहसुखप्रदो भवेत्। (तथा च) तस्य निश्चितं विपुलं धनधान्यं च भवेत्॥

प्रतिपदार्थः - यत्र = यस्मिन् स्थाने, भूमिः = मही, मध्ये = मध्यभागे, अति-उच्चम् = अत्यन्तम् उन्नतम्, चतुर्दिशं = चर्तुर्षु दिक्षु (पूर्व-दक्षिण-पश्चिम-उत्तरेषु),

च नीचम् = अवनतम् एव भवेत् = स्यात्। (तादृशी भूमिः) कूर्मपृष्ठा = कूर्मपृष्ठसंज्ञका भूमिः, भवेत् = स्यात्, तत्र = तस्मिन् स्थाने, वासः = निवासः, विधीयते = शुभप्रदो भवतीति भावः।

कूर्मपृष्ठे = कूर्मपृष्ठभूमौ, वासः = निवासः, भवेत् = स्यात्, तदा स वासः नित्यं = सर्वदा अनवरतम्, उत्साहसुखप्रदः = उत्साहजनकः आनन्दप्रदायकश्च भवति। तथा तस्य = निवासकर्तुः, निश्चितं = निस्सन्देहः, विपुलं = बहुलं, धनधान्यं = द्रव्यान्नादिकं च भवेत्।

सरलार्थः – या भूमिः मध्यभागे अत्युच्चा पूर्वादिचतुर्दिक्षु च निम्ना स्यात् सा भूमिः कूर्मपृष्ठभूमिः इति कथ्यते। तस्मिन् कूर्मपृष्ठे निवासः आनन्दप्रदायको भवति। यदि कूर्मपृष्ठक्षेत्रे निवासः भवेत्तर्हि स वासः निरन्तरः उत्साहजनकः सुखप्रदश्च भवति। एवमत्र निवासेन निवासकर्ता निश्चितं विपुलधनधान्यादिकम् अर्जयतीति।

३.३.३ दैत्यपृष्ठभूमिलक्षणम्

पूर्वाग्निशम्भुकोणेषु उन्नतिश्च यदा भवेत्।
पश्चिमे च यदा नीचं दैत्यपृष्ठोऽभिधीयते॥८६॥
दैत्यपृष्ठे भवेद्वासो लक्ष्मीर्नायाति मन्दिरे।
धनपुत्रपशूनां च हानिरेव न संशयः॥८७॥

अन्वयः – पूर्वाग्निशम्भुकोणेषु यदा च (भूमेः) उन्नतिः भवेत्। यदा च पश्चिमे नीचं (स्यात्तदा) दैत्यपृष्ठोऽभिधीयते।

(यदा) दैत्यपृष्ठे वासः भवेत् (तदा) मन्दिरे लक्ष्मीः न आयाति। धनपुत्रपशूनां च हानिः एव (स्यात्) न संशयः (कार्यः)।

प्रतिपदार्थः – पूर्वाग्निशम्भुकोणेषु = प्राची-आग्नेय-ईशानकोणेषु, यदा= यस्मिन् स्थले च, उन्नतिः भवेत् = भूमिः उच्चा स्यात्। यदा = यत्र, च पश्चिमे = पश्चिमस्यां दिशि नीचम् = अवनतं स्यात्तदा सा दैत्यपृष्ठा = दैत्यपृष्ठभूमिः इति अभिधीयते = कथ्यते।

यदा दैत्यपृष्ठे = दैत्यपृष्ठभूमौ, वासः = निवासः, भवेत् = स्यात् तदा तस्मिन् मन्दिरे = निर्मितगृहे, लक्ष्मीः = श्रीः, धनस्याधिष्ठात्री देवी, न = नहि, आयाति = आगच्छति। तथा तत्र धनपुत्रपशूनां = लक्ष्मीपुत्रपशूनां च, हानिः = विनाशः स्यात्। अत्र न संशयः = सन्देहः न कार्यः।

सरलार्थः – यदि वास्तुभूमिः पूर्व-आग्नेय-ईशानकोणेषु समुन्नता तथा च पश्चिमे निम्ना भवेत् तदा तस्य दैत्यपृष्ठसंज्ञा। तत्र निवासेन गृहे लक्ष्मीः नागच्छति अर्थात् निवासकर्ता द्ररिद्रो भवतीत्याशयः। एवमेव निस्सन्देहः धनपुत्रपशूनां च विनाशो भवेदिति।

३.३.४ नागपृष्ठभूमिलक्षणम्

पूर्वपश्चिमयोर्दीर्घो दक्षिणोत्तर उच्चकः।
नागपृष्ठं विजानीयात् कर्तुरुच्चाटनं भवेत्॥८८॥
नागपृष्ठे यदा वासो मृत्युरेव न संशयः।
पत्नीहानिः पुत्रहानिः शत्रुवृद्धिः पदे पदे॥८९॥

अन्वयः – (यदि भूखण्डः) पूर्वपश्चिमयोः दीर्घो दक्षिणोत्तरे च उच्चकः (स्यात्तदा तद्भूक्षेत्रं तु) नागपृष्ठं विजानीयात्। (तत्र निवासे सति) कर्तुः उच्चाटनं भवेत्।

यदा नागपृष्ठे वासो (भवेत्तदा) मृत्युरेव (भवति)। पत्नीहानिः पुत्रहानिः पदे पदे च शत्रुवृद्धिः (स्यादिति विषये) न संशय।

प्रतिपदार्थः - पूर्वपश्चिमयोः = प्राचीप्रतीचिदिशोः दीर्घः = दीर्घतायुक्तः, दक्षिणोतरे = याम्यसौम्यदिशोः च उच्चकः = समुन्नतो भवेत्तदा सा नागपृष्ठा = नागपृष्ठभूमिः इति विजानीयात् = जानीयात्। तस्मिन् स्थाने कर्तुः = निवासकर्तुः, उच्चाटनम् = मनसि स्थैर्यस्याभावः विक्षोभश्च जात इत्याशयः, भवेत् = स्यात्।

यदा नागपृष्ठे = नागपृष्ठक्षेत्रे, वासः = निवासः भवेत्तदा मृत्युः = मरणम्, एव = हि भवति। पत्नीहानिः = स्त्रीहानिः, पुत्रहानिः = सुतनाशः पदे पदे = क्षणे क्षणे इति भावः, शत्रुवृद्धिः = रिपुवृद्धिः भवति। इत्यत्र न संशयः = नहि सन्देहावसरः ।

सरलार्थः - यद्भूखण्डः पूर्वपश्चिमयोः दिशोः दीर्घः तथा च दक्षिणोत्तरयोः दिशोः उच्चतायुक्तो भवेत्। तादृशी मही नागपृष्ठनाम्ना प्रसिद्धा। तस्मिन् नागपृष्ठक्षेत्रे निवासः कृते सति वासकर्तुः मरणं भवति। अपि च स्त्रीपुत्रादिकानां नाशः प्रतिक्षणं च शत्रुभयं भवति।

बोधप्रश्नाः

१. का भूमिः आयुषः धनस्य च वर्धयति?

२. कस्याः भूमेः मध्यभागोऽत्युच्चः चतुर्दिक्षु च नीचं स्यात्?

३. नागपृष्ठभूमेः किं लक्षणम्?

४. दैत्यपृष्ठभूमिः निवासयोग्या भवति न वा इति प्रतिपादयत?

५. नागपृष्ठभूमेः निवासेन का हानिः?

३.४ आयताद्याकारानुसारेण भूमिविचारः

भूमिः विभिन्नाकारप्रकारयुक्ता भवति। यः यस्मिन् भूखण्डे भवनं निर्माणाय इच्छति। सः तस्मिन् भूखण्डे गृह-भवनादिरचनया प्रागेव तां भूमिं परीक्षयेद्यत् मही कीदृशी आकारयुक्ता अस्ति। अर्थात् भूखण्डः आयात-भद्रासन-वृत्त-चक्र-त्रिकोण-शकटाद्याकारेषु केनाकारेण समन्वितोऽस्तीति। यतः भूमेः आकार-प्रकाराद्यनुसारेण तस्याः शुभाशुभफलानि भवन्ति। अत्र वयं अस्मिन्विषये पठिष्यामः।

३.४.१ आयताद्याकारानुसारेण भूमिफलम्

आयते सिद्धयस्सर्वाश्चतुरस्त्रे धनागमः।
वृत्ते तु बुद्धिवृद्धिः स्याद्भद्रं भद्रासने भवेत्॥९०॥
चक्रे दारिद्र्यमित्याहुर्विषमे शोकलक्षणम्।
राजभीतिस्त्रिकोणे स्याच्छकटे तु धनक्षयः॥९१॥
दण्डे पशुक्षयं प्राहुः शूर्पे वासे गवां क्षयः।
गोव्याघ्रबन्धने पीडा धनुः क्षेत्रे भयं महत्॥९२॥

अन्वयः - आयते सर्वाः सिद्धयः चतुरस्त्रे धनागमः वृत्ते तु बुद्धिवृद्धिः स्यात्। भद्रासने भद्रं भवेत्, चक्रे दारिद्र्यं, विषमे शोकलक्षणम् इति आहुः। त्रिकोणे राजभीतिः, शकटे तु धनक्षयः, दण्डे पशुक्षयं, शूर्पे वासे गवां क्षयः प्राहुः। गोव्याघ्रबन्धने पीडा धनुः क्षेत्रे महद् भयं भवेत्।

प्रतिपदार्थः - आयते = आयताकारक्षेत्रे सर्वाः सिद्धयः= समस्ताः सिद्धयः स्युः अर्थात् समस्तकार्याणि सिद्धानि भवन्तीत्याशयः, चतुरस्रे = चतुष्कोणाकारे वर्गाकारभूखण्डे, धनागमः = धनस्यागमनं स्यात्, वृत्ते = वृत्ताकारक्षेत्रे, तु = निश्चयरूपेण, बुद्धिवृद्धिः = बुद्धेः वर्धनं, स्यात् = भवेत्। भद्रासने = भद्राकारभूखण्डे (मतान्तरेण अष्टदलाकारक्षेत्रं वा), भद्रं = कल्याणं, भवेत् = स्यात्। चक्रे = चक्राकारक्षेत्रे, दारिद्र्यं = दरिद्रता, विषमे = विषमाकारस्थले विषमचतुर्भुजे असमतलक्षेत्रे वा, शोकलक्षणं = दुःखस्य प्राप्तिः स्यादिति, आहुः = वास्तुशास्त्रस्याचार्याः कथितवन्तः। त्रिकोणे = त्रिभुजाकारक्षेत्रे, राजभीतिः =राजदण्डस्य भयं, शकटे = शकटाकारभूखण्डे, तु, धनक्षयः = वित्तनाशो भवेत्, दण्डे = दण्डाकारक्षेत्रे, पशुक्षयं = पशुनाशः स्यात्, शूर्पे = शूर्पाकारक्षेत्रे गवां = धेन्वादिपशूनां, क्षयः = नाशः स्यात्, गोव्याघ्रबन्धने = गवाकारक्षेत्रे व्याघ्राकारक्षेत्रे कारागारस्थले च, पीडा = कष्टो भवेत्। धनुः = धनुषाकारः चापाकारो वा, क्षेत्रे = स्थले महद्भयं = अत्यधिकभीतिः भवेत्।

सरलार्थः -

अस्य श्लोकस्य अर्थः चक्रमाध्यमेन प्रस्तूयते -


भूम्याकारः	तत्फलम्
आयतः	सर्वसिद्धिः
चतुरस्रः	धनागमः
वृत्ताकारः	बुद्धिवर्धनम्
भद्राकारः	भद्रः
चक्राकारः	दारिद्र्यम्
विषमे	शोकः
त्रिकोणे	राजभीतिः
शकटे	धनक्षयः
दण्डे	पशुक्षयः
शूर्पे	गवां क्षयः
गोव्याघ्रबन्धने	पीडा
धनुषि	भयम्

३.४.२ आयताकारभूमिलक्षणम्-


आयताकारक्षेत्रं द्विप्रकारकं भवति समायतचतुर्भुजक्षेत्रं विषमायत- चतुर्भुजक्षेत्रञ्चेति। समायत-चतुर्भुजक्षेत्रं शुभं विषमायतचतुर्भुजक्षेत्रञ्च अशुभं स्यात्। यस्य भूखण्डस्य सम्मुखस्थौ भुजौ परस्परसमानौ भवतः तथा चतुष्कोणाः अपि समानाः भवन्ति तद्वास्तुक्षेत्रं नाम समायतचतुर्भुजक्षेत्रमित्युच्यते। परन्तु यदि सम्मुखस्थद्वौ भुजौ असमानौ भवतः कोणाः अपि विषमाः स्युः तदा तद्विषमायतचतुर्भुजक्षेत्रमित्युच्यते। यदि मिथौ द्वौ द्वौ भुजौ समानौ परन्तु

कोणौ विषमौ भवेतां तदापि विषमायतचतुर्भुजक्षेत्रमिति कथ्यते। तस्मिन् समायताकारक्षेत्रे निवासेन वासकर्तुः समस्तकार्याणि सिध्यन्ति।

समायतक्षेत्रस्वरूपम्




विषमायतक्षेत्रस्वरूपम्




३.४.३ चतुरस्त्रभूमिलक्षणम्

चतुरस्रक्षेत्रं तु समचतुर्भुजक्षेत्रं विषमचतुर्भुजक्षेत्रञ्चेति द्विप्रकारकं भवति। यस्य भूखण्डस्य चत्वारः भुजाः परस्परसमानाः तद्भूखण्डं समचतुर्भुजक्षेत्रं परन्तु यदि चत्वारः भुजाः विषमाः तद्विषमचतुर्भुजक्षेत्रमिति उच्यते। आयताकार-चतुरस्रयोः मध्ये विशेषान्तरं नास्ति तत्र आयते भुजानां दैर्घ्यविस्तारत्वं प्राप्यते। चतुरस्रक्षेत्रे निवासे सति सर्वदा धनस्य आगमः भवेदिति।

समचतुरस्रक्षेत्रस्वरूपम्




विषमचतुरस्रक्षेत्रस्वरूपम्



३.४.४ वृत्ताकारभूमिलक्षणम्

यद्वास्तुक्षेत्रं वृत्ताकारः दृश्यते तद् वृतक्षेत्रमिति निगद्यते। तस्मिन् वृत्ताकारक्षेत्रे निवासेन वासकर्तुः प्रतिक्षेत्रम् अभ्युदयो भवति। भारतीयसंसदभवनमपि वृत्ताकारक्षेत्रे निर्मितमस्ति।


वृत्ताकारः



३.४.५ भद्रासनाकारभूमिलक्षणम्

यस्य क्षेत्रस्य दैर्घ्यविस्तारमाने समाने भवतः तथा तस्य मध्यभागः समतलो भवेत्। तस्य भूखण्डस्य नाम भद्रासनम् इति कथ्यते। तस्मिन् भद्राकारक्षेत्रे निवासेन गृहस्वामिनः कल्याणं भवति। मतान्तरेण अष्टदलकमलाकारक्षेत्रमेव भद्रासनम्।


भद्रासनक्षेत्रम्



३.४.६ चक्राकारभूमिलक्षणम्

या भूमिः अनेककोणयुक्ता अनेकभुजयुक्ता स्यात् रथचक्रमिव दृश्यते तद्वास्तुक्षेत्रं नाम चक्रमित्युच्यते। तस्मिन् चक्राकारक्षेत्रे निवासेन द्ररिद्रता न गच्छति अर्थात् सर्वदा धनाभावेन जीवनं यापनं भविष्यतीति आचार्याः वदन्ति।


चक्रकारचक्रम्



३.४.७ विषमाकारलक्षणम्

यस्याः भूमेः भुजाः विषमाः, भूमिश्च नतोन्नतयुक्ता स्यात्। सा विषमा भूमिः इति कथ्यते। तस्मिन् विषमाकारक्षेत्रे यदि निवासः भवति तर्हि बहुदुःखं समायाति।


विषमाकारः



३.४.८ त्रिकोणाकारभूमिलक्षणम्

यस्मिन् भूखण्डे त्रयः कोणाः स्युः तत् त्रिकोणमित्युच्यते। तदपि समकोणत्रिभुज-विषमकोणत्रिभुजभेदात् द्विविधं भवति।पुनः विषमकोणत्रिभुजस्यापि समबाहु-समद्विबाहु-विषमबाहुभेदात् त्रयो भेदाः भवन्ति। तस्मिन् त्रिकोणाकारभूखण्डे निवासेन सर्वदा राजभयं भवति।


त्रिकोणाकारक्षेत्राणि



३.४.९ शकटाकारभूमिलक्षणम्

यस्य भूखण्डस्य पृष्ठभागः स्थूलः चतुरस्राकारश्च तथा अग्रभागः दीर्घं सूचीसन्निभं स्यात् तच्छकटम् इत्युच्यते। तच्छकटाकारक्षेत्रे निवासेन निश्चयो हि धननाशः भवति। सामान्यतः क्षेत्रमिदं शकटयानसदृशं भवतीति।

शकटाकारभूमिः



३.४.१० दण्डाकारभूमिलक्षणम्

यस्यः भूखण्डस्य आकारः काष्ठखण्डसमः लोहदण्डसमो वा अतिदीर्घकारः अल्पविस्तारयुक्तश्च भवेत्। तद् दण्डाकारक्षेत्रमिति विजानीयात्। तस्मिन् दण्डाकारक्षेत्रे निवासेन वासकर्तुः पशुक्षयं भवति।


दण्डाकारः



३.४.११ शूर्पाकारभूमिलक्षणम्

यद्वास्तुक्षेत्रं शूर्पवत् भवेत् तत् शूर्पाकारक्षेत्रमिति कथ्यते। तस्मिन् शूर्पाकारक्षेत्रे निवासे सति गृहस्वामिनः गवां क्षयं भवति।


शूर्पाकारक्षेत्रम्




३.४.१२ गोव्याघ्रबन्धनाकारभूमिलक्षणम्

गवाकारक्षेत्रे व्याघ्राकारक्षेत्रे कारागारस्थले च निवासो भवेत् तदा वासकर्ता सर्वदा पीडामनुभवति। अतः तत्र निवासो न विधेयः।


गवाकारभूमिलक्षणम्



व्याघ्राकारभूमिलक्षणम्




कारागारभूमिलक्षणम्



३.४.१३ धनुषाकारभूमिलक्षणम्

युद्धक्षेत्रे व्यवहृतधनुसदृशः चापाकारभूमिः भवति। तस्मिन् भूखण्डे निवासे सति निवासकर्तुः महद्भयं भवतीति।

धनुषाकारक्षेत्रम्



३.४.१४ वासयोग्या भूमिः

मनसश्चक्षुषोर्यत्र सन्तोषो जायते भुवि।
तस्यां कार्यं गृहं सर्वैरिति गर्गादिसम्मतम्॥९३॥

अन्वयः - यत्र (यस्यां) भुवि मनसश्चक्षुषोः सन्तोषो जायते तस्यां (भुवि) सर्वैः गृहं कार्यम् इति गर्गादिसम्मतम्।

प्रतिपदार्थः - यत्र भुवि= यस्मिन् क्षेत्रे मनसः = स्वान्तस्य, चक्षुषोः = लोचनयोः सन्तोषो = हर्षोत्पन्नः जायते = भवेत्। तस्यां = तादृशौ भूम्युपरि सर्वैः = सर्वैजनैः गृहं = भवननिर्माणं कार्यं = कार्यम् इति गर्गादि = गर्गादिमुनिभिः सम्मतं = स्वीकृतम्।

सरलार्थः - यत्र भूम्युपरि गमनेन मनसः चक्षुषश्च आनन्दानुभवं भवति तादृग्भूम्युपरि गृह- भवननिर्माणेन निवासेन वा सर्वदा कल्याणं भवति। अतः एतादृश्यां भूमौ गृह-भवनादिनिर्माणं करणीयमिति गर्गादिमुनीनां मतम्।

३.५ जाग्रतादिभूमिज्ञानविधिः

भूमिः निवासाय योग्या अस्ति न वेति ज्ञातुं प्राचीनाचार्यैः जाग्रतादिभूमिज्ञानविधिः निरूपितः। यदि भूमिः जागर्ति तदैव तत्र गृहनिर्माणमादेश्यम्। अत्र वयं जाग्रतादि-भूमिज्ञानविधिं पठिष्यामः।

३.५.१ जाग्रतादिभूमिज्ञानम्

कर्ता ग्रामदिशश्चैव स्वरयुक्तं तु कारयेत्।
वह्निभिस्तु हरेद्भागं शेषाङ्के फलमादिशेत्॥९४॥
एके जागर्ति भूमिश्च द्वितीये समता गतिः।
तृतीये राक्षसी चैव मृत्युरेतन्न संशयः॥९५॥

अन्वयः - (गृहनिर्माणेच्छुकः) कर्ता ग्रामदिशश्चैव स्वरयुक्तं तु कारयेत्। वह्निभिः हरेद्भागं शेषाङ्के तु फलमादिशेत्। एके भूमिः जागर्ति, द्वितीये च समता गतिः, तृतीये राक्षसी चैव एतन्मृत्युः न संशयः ।

प्रतिपदार्थः - कर्ता = गृहनिर्माणकर्ता, ग्राम = निवासोपयुक्तग्रामः, दिशः = पूवादिदिशः (यस्यां दिशि कर्ता गृहनिर्माणमिच्छति) च = एवं, स्वरयुक्तं = एतेषां स्वराङ्कान् संयुक्तं, कारयेत् = कुर्यात्। तत्र वह्निभिः = त्रिभिः संख्याभिः, हरेद्भागं = विभाजनं कृत्वा, शेषाङ्के = प्राप्तशेषानुसारेण तु फलं = गृहनिर्माणे सति शुभाशुभफलम्, आदिशेत् = निर्दिशेत्।

एके = एकशेषे, भूमिः = मही जागर्ति = जागरणावस्थायामस्तीति भावः, द्वितीये = द्विशेषे च, समता गतिः = समावस्थायामस्ति अर्थात् मध्यमफलप्रदा स्यात्। तृतीये = त्रिशेषे तु, राक्षसी = दैत्यभूमिः अर्थात् भूमिः सुप्तावस्थायामिति ज्ञेयम्, च एतन्मृत्युः = राक्षसीभूमौ तु गृहनिर्माणेन मरणं भवतीति, न संशयः = इति विषये सन्देहावसरः नास्ति अर्थात् अवश्यमेव भविष्यति।

सरलार्थः - अस्मिन् श्लोके भूमेः जाग्रताद्यवस्थाः अर्थात् शयन-जागरण-समतादिविषयाः विवेचिताः सन्ति। गृहनिर्माणकर्तुः नामाक्षरस्वराङ्कः, अभीष्टग्रामस्य नगरस्य वा स्वराङ्कः। यस्यां दिशि निवासकर्तुमिच्छति तस्याः दिशः स्वराङ्कश्च एतान् संयोज्य त्रिभिः अङ्कैः विभज्य शेषाङ्कात् शुभाशुभफलं निर्दिशेत्। एवशेषे भूमिः जाग्रतावस्थायां ज्ञेया, तदा गृहनिर्माणं शुभम्। द्विशेषे समावस्थायां भूमिः भवति तदा गृहनिर्माणं तु मध्यमफलप्रदं भवति। एवं त्रिशेषे सति भूमिः सुप्तावस्थायां भवति, तदा तस्याः दैत्यभूमिरिति संज्ञा कथिता। तस्यां भूमौ निवासे सति वासकर्ता नूनमेव मृत्युं प्राप्नोति।

३.५.२ भूमिशयनविचारः

प्रद्योतनात्पञ्चनगाङ्कसूर्य-नवेन्दुषड्विंशमितेषु भेषु।
शेते मही नैव गृहं विधेयं तडागवापीखननं न शस्तम्॥९६॥

अन्वयः - प्रद्योतनात् पञ्च-नग-अङ्क-सूर्य-नवेन्दु-षड्विंशमितेषु भेषु मही शेते, (अतः) गृहं नैव विधेयं, तडागवापीखननं न शस्तम्।

प्रतिपदार्थः - प्रद्योतनात् = सूर्यनक्षत्रात्, पञ्च = 5, नग = सप्तपर्वताः अतः 7, अङ्क = 9, सूर्य = द्वादशादित्याः अतः 12, नवेन्दु = एकोनविंशतिः 19, षड्विंशति = 26, मितेषु = परिमितेषु, भेषु = नक्षत्रेषु, मही = भूमिः, शेते = शयनं करोति। अतस्तदा गृहं = गेहं, नैव = नहि एव, विधेयं = कार्यम्। तडागः = जलाशयविशेषः ह्रदः, वापी = सरोवरः, खननं = खननादिकार्यं, न, शस्तं = प्रशस्तम्।

सरलार्थः - श्लोकेऽस्मिन् सूर्याधिष्ठितनक्षत्राधारेण भूमेः शयनविषये वर्णितमस्ति। सूर्यः यस्मिन् नक्षत्रे अवस्थितो भवेत् तन्नक्षत्रात् 5, 7, 9, 12, 19 एवं च 26 मितेषु नक्षत्रेषु भूमिः शयनं करोति। तस्मिन् समये गृहनिर्माणं तडाग-वापीखननादिकार्यं न प्रशस्तं भवति। अतः तदा तादृशं कार्यं न करणीयम्।

३.५.३ जीवितादिभूमिज्ञानम्

व्यासविस्तारयोरैक्यं ग्रामाक्षरसमन्वितम्।
चतुर्गुणं नामयुक्तं शिवनेत्रेण भाजितम्॥९७॥
एकेन भूमेर्जीवः स्याद् द्वाभ्यां च समता भवेत्।
शून्यशेषे तु शून्यं स्यादित्युक्तं रुद्रयामले॥९८॥

अन्वयः - भूमेः व्यासविस्तारयोः ऐक्यं ग्रामाक्षरसमन्वितं (कार्यं तत्) चतुर्गुणं (कृत्वा) नाम (अक्षर) युक्तं, शिवनेत्रेण भाजितम् (भवेत्तदा) एकेन जीवः स्यात्, द्वाभ्यां च समता भवेत्, शून्यशेषे तु शून्यं स्यात् इति रुद्रयामले उक्तम्।

प्रतिपदार्थः- भूमेः = गृहनिवासार्थं चयनितभूखण्डस्य, व्यासविस्तारयोः = दैर्घ्यविस्तारयोः मानं च ऐक्यं = योगं, ग्रामाक्षरसमन्वितं = ग्रामनामाक्षरांकेन संयुक्तं स्यात्। तद्योगफलं चतुर्गुणं = 4 संख्यया संगुण्य, नामयुक्तं = कर्तुः नामाक्षरांकेन संयुक्तं कार्यम्। तदनन्तरं

शिवनेत्रेण = अङ्कत्रयेण, भाजितं = विभाजितं स्यात्। एकेन = एकशेषेण, जीवः = जीवितभूमिः स्यात्, द्वाभ्यां = द्विशेषेण, च समता = समभूमिः, भवेत् = स्यात्। शून्यशेषे = शून्यावशेषे तु शून्यं तु = एव, फलं स्यादिति = भवेदिति रुद्रयामले = रुद्रयामलनामकतन्त्रे, उक्तं = कथितमस्ति।

सरलार्थः - गृहनिर्माणकर्ता यस्मिन् भूखण्डे वासगृहस्य निर्माणं कर्तुमिच्छति तत्कार्यारम्भात्पूर्वं तद्वास्तुक्षेत्रं मृतं जीवितं वेति ज्ञात्वा तदनन्तरं तस्मिन् स्थाने वास्तुकार्यं करणीयमिति वास्तुशास्त्राचार्याणां मतम्। भूखण्डस्य दैर्घ्यमानं विस्तारमानं च संयोज्य तस्मिन् ग्रामाक्षरांकमानमपि योजयेत्। अनन्तरं तम् अङ्कं चतुर्गुणं कृत्वा वास्तुकर्तुः नामाक्षरं पुनः तत्र समन्वितं कार्यम्। तत्पश्चात् योगफलंत्रिभिः अङ्कैः विभज्य शेषाङ्कात् शुभाशुभफलं विचारयेत्। यदि भागशेषः एको भवेत्तदा भूमिः जीविता स्यात्। द्विशेषे भूमिः समा अर्थात् मध्यमफलप्रदा भवेत्। एवमेव यदि भागशेषं शून्यं भवेत्तदा तद्भूमौ निवासफलं शून्यं भवतीति रुद्रयामालतन्त्रे उल्लिखितमस्ति।

३.५.४ प्रश्नाज्जीवितादिभूमिज्ञानम्

भूम्यक्षरं चतुर्गुण्यं तिथिवारं च मिश्रितम्।
त्रिभिर्भागः प्रदातव्यः शेषेण फलमादिशेत्॥९९॥
एकेन जीविता भूमिर्द्विशेषे भूः समा मता।
त्रिशेषे मृतभूमिः स्यादित्युक्तं चादियामले॥१००॥

अन्वयः - भूम्यक्षरं चतुर्गुण्यं तिथिवारं च मिश्रितं, त्रिभिर्भागः प्रदातव्यः शेषेण फलम् आदिशेत्। एकेन जीविता भूमिः द्विशेषे समा मता, त्रिशेषे च मृतभूमिः स्यात् इति आदियामले उक्तम्।

प्रतिपदार्थः - भूम्यक्षरं = ग्रामस्य नामाक्षरसंख्यामिति भावः, चतुर्गुण्यं = चतुस्संख्यया गुणनं कृत्वा तिथिवारं = तिथिसंख्या वासरसंख्या, च, मिश्रितं = संयोजनीयम्। त्रिभिः = त्र्यङ्कैः, भागः प्रदातव्यः = विभजेदिति भावः, शेषेण = प्राप्तशेषाङ्केन, फलं = भूमेः शुभाशुभफलम् आदिशेत् = निर्दिशेत्। एकेन = एकशेषेण, जीविता भूमिः = मही निवासयोग्या इति वाच्या। द्विशेषे = द्विसंख्यावशेषे समा मता = भूः समा अर्थात् मध्यमफलप्रदा इति वक्तव्या। त्रिशेषे = त्रिसंख्यावशिष्टे तु, च, मृतभूमिः = निवासायोग्या भूः इति, स्यात् = भवेत्। इति आदियामले, उक्तं = कथितम्।

सरलार्थः - प्रश्नाधारेण भूमेः जीवित-मृतादिविषये ज्ञातुम् आदियामलग्रन्थोक्तविधिमत्र कथ्यते। कोऽपि जनः स्वसौविध्यानुसारं यस्मिन् ग्रामे नगरे वा निवासाय भवनस्य निर्माणमिच्छति। तद्ग्रामस्य नगरस्य वा यन्नाम वर्तते। तन्नाम्नः प्रथमाक्षरस्याङ्कः भूम्यक्षरम् इत्युच्यते। तदक्षरं चतुर्भिः संख्यकैः संगुण्य प्रतिपदादितिथिमध्ये या तिथिः प्रश्नदिने वर्तते, तस्याः तिथेः संख्या, एवं च प्रश्नदिनस्य वारस्य अङ्कं संयोज्य त्रिभिः अङ्कैः विभज्य अवशेषात् शुभाशुभफलं विचारयेत्। यदि शेष एकाङ्को भवेत्तदा जीवितभूमिः इति वाच्या। यदि अवशेषः द्वयङ्कः स्यात्तदा समा भूमिः कथिता एवमेव यदि शेषाङ्कः 3 भवेत्तदा मृतभूमिरिति उक्ता।

३.५.५ प्रकारान्तरेण जीवितभूमिज्ञानम्

यत्र वृक्षाः प्ररोहन्ति सस्यं हर्षात्प्रवर्द्धते।
सा भूमिर्जीविता वाच्या मृता चातोऽन्यथा भवेत्॥१०१॥

अन्वयः - यत्र वृक्षाः प्ररोहन्ति सस्यं हर्षात् प्रवर्द्धते, सा भूमिः जीविता वाच्या अतः अन्यथा च मृता भवेत्।

प्रतिपदार्थः - यत्र = यस्मिन् स्थले, वृक्षाः = द्रुमाः, प्ररोहन्ति = जीवन्ति, प्रवर्धन्ते इति भावः, सस्यं = कृषिगतान्नादिकं कुश-काश-लतादिकं च, हर्षात् = आनन्दात्, प्रवर्द्धते = वर्द्धते, सा भूमिः = तादृशी अवनी, जीविता = जीवितभूमिः, वाच्या = कथितव्या। अतः = इत्यतिरिच्य, अन्यथा च मृता भवेत् = उपयुक्तलक्षणविपरीता भूमिः निवासाय अयोग्या इति भावः।

सरलार्थः - यस्मिन् भूखण्डे वृक्षाः सम्यग् रूपेण प्ररोहन्ति। भूमिः विभिन्नौषधिसस्यादियुक्ता मनोहरा च स्यात्। तादृशी भूमिः जीवितभूमिरिति कथिता, इत्यतिरिच्या अन्याभूमिः निवासाय न योग्या भवेदिति।

बोधप्रश्नाः

६. आयाताकारः भूखण्डः कति प्रकारको वर्तते?

७. विषमाकारभूमिलक्षणं कीदृशं भवेदिति लिखत?

८. वासयोग्यभूमेः लक्षणं निरूपयत?

९. वह्नि इति शब्दात् कोऽङ्कः ग्राह्यः?

१०. भूजीवितादिज्ञानप्रश्ने यदि भागानन्तरं द्विशेषः स्यात् तर्हि तस्य किं फलं भवति?

३.६ भूमेः खननादिविचारः

वास्तुशास्त्रे समस्तकार्यारम्भात्पूर्वं तत्स्थानस्य क्षेत्रस्य वा परिमापनम् अनिवार्यरूपेण करणीयम् इति निगदितमस्ति। नोचेत् तत्कार्यस्य सम्पादनं सम्पूर्णं न भवतीति। यथोक्तं समराङ्गसूत्रधारेण–

हेतुः समस्तवास्तूनामाधारः सर्वकर्मणाम्।
मानोन्मानविभागादिनिर्णयैकनिबन्धनम्॥

प्राचीनकाले एतत्परिमापनं सर्वदा गृहपतेः हस्तमानस्य आधारेण तस्यानुपस्थितौ ज्येष्ठपत्न्याः हस्तमानाधारेण भवति स्म। अधुना तु इंच-मीटरादिप्रमापकमानानि प्रचलितानि सन्ति।

हस्तप्रमाणम्

षडक्षतसदृशम् एकं राज्याङ्गुलं, सप्ताक्षतसदृशं वैष्णवशैवाङ्गुलम्, अष्टयवोदरसदृशं सामान्याङ्गुलं भवतीति। स्व-स्व-प्रमाणानुसारं चतुर्विंशत्यङ्गुले एकहस्तमानं भवति। एवमेव हस्तचतुष्टयेन एकधनुः भवेदिति। उक्तं यथा–

षडक्षतै राज्यमिहाङ्गुलं भवेत्सप्ताक्षतैर्वैष्णवमैशमङ्गुलम्।
यवोदरैरष्टभिरत्र तत्करो जिनाङ्गुलैस्तैश्च धनुश्चतुष्करम्॥

एतदङ्गुलाधारेण क्रमशः ज्येष्ठ-मध्य-कनिष्ठेति प्रकारत्रयेण हस्तमानं भवतीति भावः।

३.६.१ भूमेः खननाधिकारः

स्वामिहस्तप्रमाणेन ज्येष्ठपत्नीकरेण वा।
हस्तमात्रं खनेद् भूमिं नृणां प्रोक्तं पुरातनैः॥१०२॥

जलान्तं प्रस्तरान्तं वा पुरुषान्तमथापि वा।
क्षेत्रं संशोध्य चोधृत्य शल्यं सदनमारभेत्॥१०३॥

अन्वयः - नृणां स्वामिहस्तप्रमाणेन वा ज्येष्ठपत्नीकरेण हस्तमात्रं भूमिं खनेद् (एवं) पुरातनैः प्रोक्तम्। अथ जलान्तं वा प्रस्तरान्तं वा पुरुषान्तम् अपि क्षेत्रं संशोध्य शल्यं च उद्धृत्य सदनम् आरभेत्।

प्रतिपदार्थः - स्वामिहस्तप्रमाणेन = गृहपतेः हस्तमानस्याधारेण, वा = अथवा, ज्येष्ठपत्नीकरेण = तस्यानुपस्थितौ गृहेशस्य बहुपत्नीत्वे सति ज्येष्ठभार्यायाः हस्तप्रमाणेन, हस्तमात्रं = एककरमात्रं भूमिं = पृथ्वीं, खनेद् = खननं कारयेत्, एवमेव पुरातनैः = प्राचीनाचार्यैः, नृणां = मनुष्याणां कृते, प्रोक्तं = कथितम्।

अथ = अनन्तरं, जलान्तं = खनने जलदर्शनपर्यन्तं, वा = अथवा, प्रस्तरान्तं = शिलाप्राप्तिपर्यन्तम्, अपि वा = अथवा, पुरुषान्तम् = एकपुरुषपरिमाणं यावत्, क्षेत्रं = भूमिं, संशोध्य = शोधयित्वा, शल्यं चोद्धृत्य = अस्थिप्रभृतिशल्यादिपदार्थान् च निष्कास्य, सदनं = भवनं गृहं वा, आरभेत् = प्रारम्भयेत्।

सरलार्थः - गृहस्वामिहस्तप्रमाणेन अथवा तस्यानुपस्थितौ तस्य ज्येष्ठपत्न्याः हस्तमानस्याधारेण च एकहस्तं यावत् भूमिं खननं कार्यम्। तदनन्तरं तत्स्थानस्य भूमिं जलस्तरपर्यन्तं, शिलाप्राप्तिपर्यन्तम् अथवा एकपुरुषपरिमाणं यावत् खनित्वा, क्षेत्रं संशोध्य तत्र प्राप्तास्थिप्रभृतिशल्यादिपदार्थान् दूरीकृत्य ततोऽनन्तरं तस्मिन् स्थले गृहनिर्माणकार्यं प्रारम्भं कुर्यात्।

३.६.२ खातविधिः (राहुमुखविचारः)

देवालये गेहविधौ जलाशये राहोर्मुखं शम्भुदिशो विलोमतः।
मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात्पृष्ठविदिक् शुभा भवेत्॥१०४॥
वृषार्कादित्रिकं वेद्यां सिंहादिं गणयेद् गृहे।
देवालये च मीनादिं तडागे मकरादिकम्॥१०५॥

अन्वयः - देवालये गेहविधौ जलाशये शम्भुदिशो विलोमतः मीनार्कसिंहार्कमृगार्कतस्त्रिभे राहोर्मुखं स्यात्। खाते मुखात् पृष्ठविदिक् शुभा भवेत्। वेद्यां वृषार्कदित्रिकं गृहे सिंहादिं देवालये मीनादिं तडागे च मकरादिकं गणयेत् (तत्र राहुमुखं स्यात्)।

प्रतिपदार्थः - देवालये = देवमन्दिरादिविषयककार्यारम्भे, गेहविधौ = गृहनिर्माणारम्भे, जलाशये = वापीकूपतडागादिनिर्माणारम्भे, शम्भुदिशो = ईशानदिशः, विलोमतः = वैपरीत्येन, मीनार्क-सिंहार्क-मृगार्कतस्त्रिभे राहोर्मुखं स्यात् = देवमन्दिरारम्भे मीनमेषवृषराशिस्थिते सूर्ये ईशानकोणे, मिथुनकर्कसिंहराशिस्थिते सूर्ये वायव्यकोणे, कन्यातुलावृश्चिकराशिस्थिते सूर्ये नैर्ऋत्यकोणे, धनुमकरकुम्भराशिस्थिते सूर्ये आग्नेयकोणे राहोर्मुखं ज्ञेयम्। एवमेव गृहनिर्माणारम्भे सिंहकन्यातुलाराशिस्थिते सूर्ये ईशानकोणे, वृश्चिकधनुमकरराशिस्थिते सूर्ये वायव्यकोणे, कुम्भमीनमेषराशिस्थिते सूर्ये नैर्ऋत्यकोणे, वृषमिथुनकर्कराशिस्थिते सूर्ये आग्नेयकोणे च राहोर्मुखं विजानीयात्। तथा एव जलाशयारम्भे मकरकुम्भमीनराशिस्थिते सूर्ये ईशानकोणे, मेषवृषमिथुनराशिस्थिते सूर्ये वायव्यकोणे, कर्कसिंहकन्याराशिस्थिते सूर्ये नैर्ऋत्यकोणे, तुलावृश्चिकधनुराशिस्थिते सूर्ये आग्नेयकोणे च राहोराननं विज्ञेयम्। खाते = भूमौ खातखनने, मुखात्=राहोः मुखात्, पृष्ठविदिक्=पूर्वकोणः, शुभा भवेत्।

वेद्यां = वेदिकानिर्माणे, वृषार्कादित्रिकं = वृषमिथुनकर्कराश्यवस्थिते सूर्ये ईशानकोणे, सिंहकन्यातुलाराशिस्थिते सूर्ये वायव्यकोणे, वृश्चिकधनुमकरराशिस्थिते सूर्ये नैर्ऋत्यकोणे,

गृहारम्भे चिन्तनीयविषयाः

कुम्भमीनमेषराशिस्थिते सूर्ये आग्नेयकोणे, गृहे = गृहारम्भसमये, सिंहादिं = सिंहकन्यातुला–राशिस्थिते सूर्ये ईशानकोणे, वृश्चिकधनुमकरराशिस्थिते सूर्ये वायव्यकोणे, कुम्भमीनमेषराशिस्थिते सूर्ये नैर्ऋत्यकोणे, वृषमिथुनकर्कराशिस्थिते सूर्ये आग्नेयकोणे च, देवालये = देवालयारम्भे, मीनादिं = मीनमेषवृषराशिस्थिते सूर्ये ईशानकोणे, मिथुनकर्कसिंहराशिस्थिते सूर्ये वायव्यकोणे, कन्यातुलावृश्चिकराशिस्थिते सूर्ये नैर्ऋत्यकोणे, धनुमकरकुम्भराशिस्थिते सूर्ये आग्नेयकोण, तडागे = तडागादिनिर्माणसमये, मकरादिकं = मकरकुम्भमीनराशिस्थिते सूर्ये ईशानकोणे, मेषवृषमिथुनराशिस्थिते सूर्ये वायव्यकोणे, कर्कसिंहकन्याराशिस्थिते सूर्ये नैर्ऋत्यकोणे, तुलावृश्चिकधनुराशिस्थिते सूर्ये आग्नेयकोणे च, राहुमुखं गणयेत् = राहुमुखं जानीयादितिभावः।

सरलार्थः – देवमन्दिरादिविषयककार्यारम्भे मीनमेषवृषराशिस्थिते सूर्ये ईशानकोणे, मिथुनकर्कसिंहराशिस्थिते सूर्ये वायव्यकोणे, कन्यातुलावृश्चिकराशिस्थिते सूर्ये नैर्ऋत्यकोणे, धनुमकरकुम्भराशिस्थिते सूर्ये आग्नेयकोणे राहोर्मुखं ज्ञेयम्। एवमेव गृहनिर्माणारम्भे सिंहकन्यातुलाराशिस्थिते सूर्ये ईशानकोणे, वृश्चिकधनुमकरराशिस्थिते सूर्ये वायव्यकोणे, कुम्भमीनमेषराशिस्थिते सूर्ये नैर्ऋत्यकोणे, वृषमिथुनकर्कराशिस्थिते सूर्ये आग्नेयकोणे च राहोर्मुखं विजानीयात्। तथा एव जलाशयारम्भे मकरकुम्भमीनराशिस्थिते सूर्ये ईशानकोणे, मेषवृषमिथुनराशिस्थिते सूर्ये वायव्यकोणे, कर्कसिंहकन्याराशिस्थिते सूर्ये नैर्ऋत्यकोणे, तुलावृश्चिकधनुराशिस्थिते सूर्ये आग्नेयकोणे च राहोराननं विज्ञेयम्। वेदिकानिर्माणारम्भे तु वृषमिथुनकर्कराश्यवस्थिते सूर्ये ईशानकोणे, सिंहकन्यातुलाराशिस्थिते सूर्ये वायव्यकोणे, वृश्चिकधनुमकरराशिस्थिते सूर्ये नैर्ऋत्यकोणे, कुम्भमीनमेषराशिस्थिते च सूर्ये आग्नेयकोणे राहोर्मुखं जानीयादिति। भूमौ खातखनने राहोः मुखात्, पृष्ठकोणः शुभो भवेदर्थात् यदि ऐशान्ये राहुमुखं स्यात्तर्हि अग्निकोणे तस्य पृष्ठविदिक् भवति। तस्मिन् स्थाने खातारम्भः शुभदः भवति। यदि वायव्यां राहुमुखं स्यात्तदा नैर्ऋत्यां तस्य पृष्ठं भवेत्। तत्र नैर्ऋत्यां प्रथमखातारम्भः शुभप्रदः भवति। यदि नैर्ऋत्यां राहुमुखं स्यात्तर्हि तस्य पुच्छ ऐशान्यां भवति पृष्ठः वायव्यां दिशि भवेत् तस्मिन् स्थाने प्रथमखातारम्भः शुभफलदः भवति। एवमेव यदि अग्निकोणे राहुमुखं भवेत्तदा ईशानकोणे खातारम्भः करणीयः इत्यर्थः।

३.७ भूमिपरीक्षणादिविचारः

भूमौ भवननिर्माणकार्यारम्भात्पूर्वं तत्क्षेत्रस्य परीक्षणमवश्यं करणीयम् अन्यथा हानिर्भवति। एतदर्थमत्र नैकविधभूमिपरीक्षणविधयः निरूपिताः सन्ति।

३.७.१ विश्वकर्मप्रकाशे भूमिसंशोधनविधिः

खातं भूमिपरीक्षणे करमितं तत्पूरयेत्तन्मृदा।
हीने हीनफलं समे समफलं लाभो रजोवर्द्धने।
तत्कृत्वा जलपूर्णमाऽऽशतपदं गत्वा परीक्ष्यं पुनः।
पादोनाऽर्द्धविहीनकेऽथनिभृते मध्याधमेष्टाम्बुभिः॥१०६॥
निखनेद्धस्तमात्रेण पुनस्तेनैव पूरयेत्।
पांशुनाधिकमध्योनश्रेष्ठमध्याधमाः क्रमात्॥१०७॥

अन्वयः – भूमिपरीक्षणे करमितं खातं (कृत्वा) तन्मृदा (पुनः) तत्पूरयेत्। हीने हीनफलं समे समफलं रजोवर्द्धने लाभः (च स्यात्)। अथ पुनः तत् (खातं) जलपूर्णं कृत्वा आशतपदं गत्वा परीक्ष्यम्। अथ अम्बुभिः पादोन (जले) मध्या, अर्द्धविहीनके (जले) अधमा, निभृते (जले) च इष्टा (भूमिः स्यात्)। (भूमिं)हस्तमात्रेण निखनेत् ,पुनः तैनेव पूरयेत्। क्रमात् पांशुनाधिके श्रेष्ठा, मध्ये मध्या, ऊने अधमा (भवेत्)।

प्रतिपदार्थः – भूमिपरीक्षणे = भूमेः शुभाशुभपरीक्षणसमये, करमितं = हस्तपरिमितमर्थादैकहस्तप्रमाणमात्रं विस्तृतं दीर्घं गहनं च, खातं = गर्तं खनेत्। पुनः तन्मृदा = तस्मात् परं निस्सृतमृत्तिकातः एव, तत्पूरयेत् = तं गर्तं पूरणीयम्। हीने = खातपूरणे सति यदि मृत्तिका न्यूना स्यादिति भावः, हीनफलं = न्यूनफलमर्थात् गृहनिर्माणायाशुभं जानीयात्, समे = समानपरिमिते सति, समफलं = मध्यफलं, रजो वर्द्धने = मृत्तिकावर्द्धिते सति अर्थात् खातपूरणानन्तरं यदि मृत्तिकावशिष्यते, लाभः = गृहनिर्माणं शुभं लाभश्च प्राप्यते। अथ = अनन्तरं, पुनः = पुनरेकवारं, तत् = खातं जलपूर्णं कृत्वा = जलेन परिपूर्य, आशतपदं = शतपदं यावत्, गत्वा परीक्ष्यं = गत्वा पुनरागत्य खातः परीक्षणीयः, परीक्षणानन्तरम्, अम्बुभिः = जलैः, पादोने = चतुर्थांशमिते अल्पे जले, मध्यमा = भूमिः मध्यमफलयुक्ता भवेत्। अर्द्धविहीनके = अर्द्धाल्पे जले, अधमा = भूमिः निकृष्टा अनिष्टफलप्रदा स्यात्। निभृते = खाते जलपूर्णे, इष्टा = भूमिः शुभा गृहनिर्माणयोग्या च भवेदिति।

पुनः = पुनरेकवारं, हस्तमात्रेण = करमात्रेण, निखनेत् = भूमिखननं कार्यं, तत् = खातं, तेनैव = पुनः निस्सृतमृत्तिकात एव, पूरयेत् = परिपूर्णयेत्, क्रमात् अधिकपांशुना श्रेष्ठा = खातपूरणे रजोवर्द्धने सति भूमिः निवासाय उत्तमा, मध्यपांशुना मध्या = यदि मृत्तिका समा स्यात्तदा मध्यमफलदा, ऊनपांशुना अधमा = खातपूरणे मृत्तिकान्यूना स्यात् तदा निवासाय अयोग्या अशुभफलदा च भवति।

सरलार्थः – गृहनिर्माणकर्ता स्वहस्तप्रमाणेन एकहस्तपरिमितं दीर्घं विस्तृतं गहनं च खातं खनित्वा तस्मात् खातात् मृत्तिकां निष्कास्य पुनः तं खातं तन्मृदा पूरयेत्। यदि खातपूरणे मृतिका अवशिष्यते अर्थात् रजोवर्द्धनं भवेत्तदा निवासाय तत्क्षेत्रम् उत्तमं ज्ञेयं। यदि खातपूरणे सति मृत्तिका समाना अर्थात् नाधिका न च न्यूना स्यात्तदा भूमिः मध्यमफलप्रदा भवति। एवं यदि पूरणे मृदा न्यूना असम्पूर्णा अर्थात् खातं पूरितं न भवेत्तदा तत्स्थानं गृहनिर्माणकर्तुः कृते अशुभं भवति। पुनः तस्मात् खातात् मृत्तिका निष्कास्य जलपूर्णं कारयेत्। तत्पश्चात् तत्स्थानात् शतपदं गत्वा पुनरागत्य खातं परीक्ष्यम्। यदि खातं जलपूर्णं स्यात्तदा उत्तमलाभः भवेत्। यदि चतुर्थांशमितं जलमल्पं दृश्यते तदा मध्यमफलं स्यात्। यदि अर्द्धादपि हीनं जलं खाते स्यात्तदा अनिष्टफलं भवेदिति।

३.७.२ वास्तुरत्ने भूमिसंशोधनविधिः

कर्तुश्च हस्तप्रमितं खनित्वा खातं पयोभिः परिपूरितं चेत्।
वसेत्सुतार्थी परिपूरितं स्याच्छुष्के भवेत् तत्क्षणमेव नाशः॥१०८॥
स्थिरे जले वै स्थिरता गृहस्य स्याद्दक्षिणावर्तजलेन सौख्यम्।
क्षिप्रं जलं शोषयतीह खातो मृत्युर्हि वामेन जलेन कर्तुः॥१०९॥
अथवा सर्वधान्यानि वापयेच्च समन्ततः।
यत्र नैव प्ररोहन्ति तां प्रयत्नेन वर्जयेत्॥११०॥

अन्वयः – कर्तुः हस्तप्रमितं खातं खनित्वा पयोभिः परिपूरितं चेत् तत् परिपूरितं (स्यात् तदा तत्र) सुतार्थी वसेत्, शुष्के चेत् तत्क्षणमेव नाशः भवेत्। जले स्थिरे वै गृहस्य स्थिरता स्यात्, दक्षिणावर्तजलेन सौख्यम्। इह खातः क्षिप्रं जलं शोषयति, वामेन जलेन वा कर्तुः हि मृत्युः (स्यात्)। अथवा सर्वधान्यानि च समन्ततः वापयेत्। यत्र (अङ्कुरः) न एव प्ररोहन्ति तां प्रयत्नेन वर्जयेत्।

प्रतिपदार्थः – कर्तुः = गृहनिर्माणकर्तुः, हस्तप्रमितं = हस्तप्रमाणेन, खातं = गर्तं, खनित्वा, तत् = तं खातं, पयोभिः = जलैः, परिपूरितं = परिपूर्णं कुर्यात्। यदि तत् (खातः)

परिपूरितं = परिपूर्णं, स्यात् = भवेत् तदा तत्र सुतार्थी = पुत्रेच्छुकः, वसेत् = निवसेत्। चेत् = यदि, जले शुष्के= खातः जलं शोषयित्वा तत्र जलाभावः दृश्यते तदा, नाशः = विनाशः भवेत् = स्यात्। जले = नीरे, स्थिरे = क्षोभरहिते निश्चिते, वै, गृहस्य = भवनस्य, स्थिरता = स्थैर्यं, स्यात् = भवेत्। दक्षिणावर्तजलेन = जलस्य दक्षिणावर्तभ्रमणेन, सौख्यं = गृहे सुखं कल्याणं च भवति। इह = अत्र, खातः = गर्तः, क्षिप्रं = शीघ्रमेव, जलं = नीरं, शोषयति = शोषणं करोति। अथवा वामेन = वामावर्तेन, जलेन = नीरेण, कर्तुः = भवननिर्माणकर्तुः, हि = निश्चयेन, मृत्युः = मरणं भवति, अथवा सर्वधान्यानि = समस्तानि यवगोधूमादिधान्यानि समन्ततः = सर्वत्र एव, वापयेत् = वपनं कारयेत्। यत्र = यस्मिन् स्थाने, न = नहि, प्ररोहन्ति = धान्यांकुराः न प्रभवन्ति, तां = तां भूमिं, प्रयत्नेन = प्रयासेन, वर्जयेत् = परिवर्जयेत्।

सरलार्थः - पूर्वोक्तप्रकारेण गृहनिर्माणकर्ता स्वहस्तप्रमाणेन एकहस्तमितं दैर्घ्ययुक्तम् एकहस्तविस्तारयुक्तं तथा च करमितैव गभीरं खातं निखनेत्। ततः परं तस्मात् खातं जलेन पूर्णं कुर्यात्। जलपूर्णानन्तरं यदि खातः जलेन परिपूरितं दृश्यते तदा पुत्रकल्याणकामनार्थी तस्मिन् स्थाने निवासं कुर्यात्। यदि एकस्मिन् क्षणे जलं शुष्कं भवेत्तदा तत्र निवासेन शीघ्रमेव वासकर्तुः नाशो भवेत्। यदि जलपूर्णसमये जलं स्थिरं भवेत्तदा तद्भवनस्य स्थिरता ज्ञेया। यदि जलं दक्षिणावर्तं परिभ्रमति तदा तस्मिन् स्थले वासकर्तुः सौख्यं भवेत्। यदि जलं वामवर्तं परिभ्रमति अथवा जलस्य शीघ्रमेव शोषणं दृश्यते तदा तत्र निवासेन निवासकर्तुः मरणं भवति।

अथवा गृहनिर्माणकर्ता यस्मिन् क्षेत्रे निवासं कर्तुम् इच्छति तस्मिन् स्थाने सप्तधान्यानि वापयेत्। भूखण्डस्य मध्ये यत्र अङ्कुरः शीघ्रं प्ररोहन्ति तत्स्थानं निवासयोग्यं स्यात् अर्थात् तस्मिन् क्षेत्रे भूखण्डे वा गृहनिर्माणकार्यं कारयेत्। एवं यत्र अङ्कुराः न प्ररोहन्ति तद्वास्तुक्षेत्रं गृह-भवनयोः निर्माणयोग्यः न स्यात् अर्थात् तत्स्थानं परित्यजेत्।

३.७.३ नारायणभट्टमते भूमिसंशोधनविधिः

श्वभ्रं हस्तमितं खनेदिह जलं पूर्णं निशास्ये न्यसेत्।
प्रातर्दृष्टजलं स्थलं सदजलं मध्यं त्वसत्स्फाटितम्॥१११॥

अन्वयः - निशास्ये हस्तमितं श्वभ्रं खनेत्, इह जल पूर्णं न्यसेत्। प्रातः जलं दृष्टम् अजलं सत्, स्थलं तु मध्यं, स्फाटितम् असत् (फलं भवति)।

प्रतिपदार्थः - निशास्ये = रात्रिमुखे अर्थात् सायंकाले, हस्तमितं = करमितं, श्वभ्रं खनेत् = खातं निखनेत्। इह = अस्मिन् खाते, जलं = नीरं, पूर्णं न्यसेत् = परिपूरयेत्। यदि तस्मिन् खाते प्रातः = प्रभातकाले जलं = नीरं दृष्टं = दृश्यते, तदा सत् = शुभं भवेत्। यदि स्थलं = खातः जलरहितः दृश्यते, तु = निश्चयेन मध्यं = मध्यमफलं स्यात्। चेत् = यदि जलं न भूत्वा स्फाटितं = जलाभावेन सह छिन्नभिन्नं विवरयुक्तं च भवेत्, असत् = अशुभफलं भवति।

सरलार्थः - नारायणभट्टमतानुसारं भूमिपरीक्षणविधिं प्रस्तूयते। सायंकाले स्वहस्तेन एकहस्तपरिमितं समचतुरस्रं गर्तं कृत्वा तं खातं जलेन पूरयेत्। प्रातः उत्थाय खातः परीक्षणीयः। यदि तस्मिन् गर्ते जलं भवेत्तदा तत् क्षेत्रं शुभं स्यात्। एवं यदि तत्र जलं न भवेत्तदा मध्यमफलं भवति। किन्तु यदि गर्ते जलं न भूत्वा स्फाटितं भवेत्तदा तद् क्षेत्रं न शुभं भवेदिति।

बोधप्रश्नाः

११. कति अङ्गुलात्मकम् एकहस्तमानं भवति?

१२. गृहारम्भसमये सिंहराशिस्थसूर्ये कुत्र राहोर्मुखं स्यात्?

१३. यदि ऐशान्ये राहुमुखं स्यात्तर्हि कुत्र तस्य पृष्ठविदिक् भवेत्?

१४. रजोवर्द्धने किं फलं भवति?

१५. भूमिपरीक्षणसमये यदि जलं न भूत्वा मृत्तिका स्फाटितं स्यात्तदा कि फलं भवेत्?

३.८ खातमध्ये पाषाणादिप्राप्तिफलविचारः भूमिपूजा च

गृहनिर्माणाय खातखननसमये खातमध्ये यादृशानि शुभाशुभवस्तूनि प्राप्यन्ते तादृशानि शुभाशुभफलान्यपि भवन्ति। अत्र खनने प्राप्तद्रव्याणां शुभाशुभफलं भूमिपूजाविधिश्च प्रतिपादितः।

३.८.१ खातमध्ये पाषाणादिप्राप्तिफलम्

खन्यमाने यदा भूमौ पाषाणं प्राप्यते तदा।
धनायुश्चिरता वै स्यादिष्टकासु धनागमः॥११२॥
कपालाङ्गारकेशादौ व्याधिना पीडितो भवेत्।
खाते यदाश्मा लभते हिरण्यं तथेष्टकायां च समृद्धिरत्र।
द्रव्यं च रम्याणि सुखानि धत्ते ताम्रादिधातुर्यदि तत्र वृद्धिः॥११३॥
पिपीलिकाषोडशपक्षनिद्रा भवन्ति चेत्तत्र वसेन्न कर्ता।
तुषास्थिचीराणि तथैव भस्मान्यण्डानि सर्पा मरणप्रदाः स्युः॥११४॥
वराटिका दुःखकलिप्रदात्री कार्पास एवाति ददाति दुःखम्।
काष्ठं प्रदग्धं त्वतिरोगभीतिर्भवेत्कलिः खर्परदर्शनेन॥११५॥
लोहेन कर्तुर्मरणं निगद्यं विचार्य वास्तु प्रदिशन्ति धीराः।

अन्वयः - यदा भूमौ खन्यमाने पाषाणं प्राप्यते तदा धनायुश्चिरता स्यात् इष्टकासु वै धनागमः, कपालाङ्गारकेशादौ (कर्तुः)व्याधिना पीडितो भवेत्। यदा खाते अश्मा लभते तथा हिरण्यं (प्राप्यते)। अत्र इष्टकायां च समृद्धिः (स्यात्) यदि द्रव्यं (मिलति तदा) रम्याणि सुखानि च धत्ते। (यदि) ताम्रादिधातुः लभते (तदा तेषां) वृद्धिः स्यात्। चेत् पिपीलिका षोडशपक्षनिद्रा भवन्ति (तदा) कर्ता तत्र न वसेत् तथा तुषास्थिचीराणि भस्मान्यण्डानि सर्पा एव मरणप्रदाः स्युः, वराटिका एव दुःखकलिप्रदात्री, कार्पास अति दुःखं ददाति। प्रदग्धं काष्ठं तु अतिरोगभीतिः। खर्परदर्शनेन कलिः भवेत्। लोहेन कर्तुः मरणं निगद्यं (अतः) धीराः वास्तु विचार्य प्रदिशन्ति।

प्रतिपदार्थः - यदा = यस्मिन् समये, भूमौ = भूखण्डे, खन्यमाने = निखननसमये पाषाणं = शिला प्रस्तरं, प्राप्यते = लभ्यते। तदा = तस्मिन् समये, धनायुश्चिरता = वित्तस्य आयुषः वृद्धिः, स्यात् = भवेत्, इष्टकासु = इष्टिकासु, धनागमः = धनलाभः, कपालाङ्गारकेशादौ = मुण्ड-खर्पर-अंगार-केशादिविजातीयपदार्थाः लभ्यन्ते तदा कर्त्तुः, व्याधिना = रोगेण, पीडितः = कष्टप्राप्तः, भवेत् = स्यात्।

यदा = यस्मिन् समये, खाते = गर्ते, अश्मा = पाषाणखण्डं, लभते = प्राप्यते,(तदा) हिरण्यं = सुवर्णस्य प्राप्तिः भवेत्। अत्र = अस्मिन् स्थले, इष्टकायाम् = इष्टिकायां,(प्राप्तिः स्यात् तदा), च समृद्धिः = धनधान्यवृद्धिः स्यात्।

यदि = चेत्, द्रव्यं = रजतादिमुद्रा लभते तर्हि, रम्याणि = रुचिकराणि सुमनोहराणि सुखानि = आनन्दानि च, धत्ते = विधत्ते। एवं यदि तत्र = तस्मिन् स्थाने, ताम्रादिधातुः = ताम्रादिधातुः मिलति, तर्हि, वृद्धिः = धनपुत्रादिवृद्धिः भवति।

चेत् = यदि, पिपीलिका = कीटविशेषः (चींटी इति हिन्द्याम्), षोडशपक्षनिद्रा = मण्डूकसर्पादयः भवन्ति = सन्ति, तत्र = तस्मिन् स्थाने, कर्ता = निवासकर्ता, न = नहि वसेत् = निवसेत्। तथा = तेन प्रकारेण तुषास्थिशल्यचीराणि = धान्यावरण(भूसा)-अस्थिशल्य-जीर्णवस्त्राणि, भस्मानि = दग्धवस्तुअवशेषविशेषाणि भस्मानि, अण्डानि = अण्डपिण्डादीनि सर्पाः = नागाः लभ्यन्ते तदा, मरणप्रदाः = मृत्युप्रदायकाः, स्युः = भवेयुः। यदि = चेत् वराटिका = कौडी इति हिन्द्याम्, दुःखकलिप्रदात्री = शोक-कलहादिं प्रददाति, कार्पासः = कपास इति हिन्द्याम्, अतिदुःखम् = अतिशयदुःखं, ददाति = प्रददाति। प्रदग्धम् = दग्धं काष्ठं = दारु, तु = निश्चयेन, अतिरोगभीतिः = अधिकरोगभयं प्रयच्छति। खर्परदर्शनेन = साधुजनानां भिक्षापात्रविशेषः, तस्य दर्शनेन, कलिः = कलहो भवति। लोहेन = लोहधातुना, कर्तुः = निवासकर्तुः, मरणं, निगद्यं = कथितमस्ति। धीराः = धैर्ययुक्तजनाः, वास्तु = गृहक्षेत्रं, विचार्य = विचारं कृत्वा, प्रदिशन्ति = कथयन्ति।

सरलार्थः - वास्तुक्षेत्रं संशोधनाय कृते खाते यदि प्रस्तरं मिलति तर्हि सुवर्णलाभो भवति। यदि इष्टकायाः प्राप्तिर्भवेत्तदा समृद्धिरैश्वर्यप्राप्तिः आयुषः वृद्धिश्च भवति। यदि रजतादिवस्तूनि प्राप्यते तदा रम्याणि सुखानि प्राप्यन्ते। यदि तस्मिन् स्थले ताम्रादिधातुदर्शनं भवेत्तदा धनपुत्रादिवृद्धिः भवति। यदि पिपीलिका कीटा मण्डूकादयश्च प्राप्यन्ते तर्हि वासकर्ता तस्मिन् स्थाने न निवसेत्। यदि तत्र धान्यावरण-अस्थि-जीर्णवस्त्रादीनि भस्मानि अण्डानि सर्पाश्च भवेयुः तदा ते निवासकर्तुः मरणप्रदाः भवन्ति। यदि वराटिका (कौडी) लभेत्तदा अतिदुःखं भवति। यदि तत्र प्रदग्धं काष्ठं स्यात्तदा निश्चयेन अतिरोगभीतिः भवेत्। यदि खन्यमाने सति तत्र कपालदर्शनं भवेत्तदा कलहः स्यात्। यदि तस्मिन् स्थाने लोहदर्शनं भवेत्तदा निश्चयेन कर्तुः मरणं भवति। एवमेव बुद्धिमन्तः जनाः वास्तुक्षेत्रं विचार्य गृहारम्भं कारयेत्।

३.८.२ भूमिपूजाविधिः

परीक्षितायां भुवि विघ्नराजं समर्चयेच्चण्डिकया समेतम्।
क्षेत्राधिपं चाष्टदिगीशदेवान् पुष्पैश्च धूपैर्बलिभिः सुखाय॥११६॥

अन्वयः - परीक्षितायां भुवि चण्डिकया समेतं विघ्नराजं क्षेत्राधिपम् अष्टदिगीशदेवान् च सुखाय पुष्पैः धूपैर्बलिभिः च समर्चयेत्।

प्रतिपदार्थः - पूर्वोक्तिविधिना परीक्षितायां = परीक्षाकृतायां, भुवि = भूमौ, चण्डिकया = भगवतिगौर्या, समेतं = साकं, विघ्नराजं = गणपतिं, क्षेत्राधिपं = क्षेत्रपालम्, अष्टदिगीशदेवान् = अष्टदिक्पालान् च, सुखाय = मङ्गलकामनाय कल्याणाय वा, पुष्पैः = सुवासितकुसुमैः, धूपैः = सुगन्धितधूपैः बलिभिः = नैवेद्यादिपूर्वकैश्च, समर्चयेत् = सम्पूजयेत्।

सरलार्थः - पूर्वोक्तनियमानुसारं भूमिपरीक्षणानन्तरं तत्र कलशस्थापनपूर्वकं गौरीं, गणपतिं, क्षेत्रपालदेवान् अष्टदिक्पालान् च स्वकल्याणाय सुगन्धितपुष्पधूपैः अभ्यर्च बलिं च दत्वा पूजनं कुर्यात्।

३.९ पिण्डाद् भित्तिविचारः

कस्मिन् निर्माणे वास्तुक्षेत्रस्य बहिः अन्तः वा भित्ति कर्त्तव्येति विचारः अत्र पठिष्यामः वयम्।

३.९.१ पिण्डाद् बहिरन्तर्वा भित्तिः कर्त्तव्येति विचारः

पाषाणे सर्वतो बाह्यमिष्टकायां तदर्द्धकम्॥११७॥
मृतिकायां पिण्डमात्रमित्युक्तं रुद्रयामले।
पाषाणीभित्तिका ग्राह्या सर्वदा कारिकामते॥११८॥

अन्वयः – पाषाणे सर्वतो बाह्यम् इष्टिकायां तद् अर्द्धकं, मृत्तिकायां च पिण्डमात्रम् इति रुद्रयामले उक्तम्। कारिकामते सर्वदा पाषाणीभितिका ग्राह्या (इति)।

प्रतिपदार्थः – पाषाणे = प्रस्तरैः गृहनिर्माणे सति, सर्वतो = समन्तात्, बाह्यम् = गृहपिण्डाद् बाह्यतः भित्तिं संस्थापयेत्। इष्टकायाम् = इष्टिकायां गृहनिर्माणसमये, तत् = तस्मात्, अर्द्धभागं = गृहपिण्डाद् अर्द्धभागे भित्तिः स्थाप्यते। अत्र = अस्मिन् विषये मृत्तिकायां = मृत्तिकाभिः गृहनिर्माणे, पिण्डं = गृहवास्तुक्षेत्रं यत्र भवति तत्र भित्तिं संस्थापयेत् इति, रुद्रयामले = रुद्रयामलनामकग्रन्थे, उक्तं = कथितम्। कारिकामते = कारिकामतानुसारेण पाषाणीभित्तिका = प्रस्तरनिर्मिता भित्तिका, सर्वदा = सदा एव शुभफलप्रदा चिरस्थिरा च भवतीति भावः,अतः, ग्राह्या = ग्रहणयोग्या च भवति।

सरलार्थः – गृहस्य मुख्याधारः भित्तिः, आधारः, कुड्यं वा वर्तते यस्योपरि च्छदि स्थापनं भवति। आङ्गलभाषायां ऽसस इति कथ्यते। सामान्यतः प्रस्तरमाध्यमेन यदि भित्तेः स्थापनं भवति तर्हि तस्य गृहस्य स्थितिः अधिकदिनं यावत् तिष्ठति। प्रस्तरगृहनिर्माणसमये भित्तिस्थापनं गृहपिण्डाद् बहितः सर्वदा कारयेत्। इष्टिकागृहनिर्माणे भित्तेः स्थापनं गृहपिण्डमध्यभागात् स्थापयेत्। मृत्तिकायां गृहनिर्माणसमये आधारस्थापनं यत्र गृहपिण्डं वर्तते, तस्मिन् स्थाने एव भवति।

३.९.२ नारायणभट्टमते भित्तिविचारः

ज्ञात्वैवं निखनेद् गृहाधिकभुवं नत्वा जलान्तस्तरो-
यावद्वापुरुषस्ततः कपिशिरस्तुल्याश्मभिः पूरयेत्॥११९॥

अन्वयः – एवं ज्ञात्वा गृहाधिकभुवं नत्वा जलान्तस्तरः आपुरुषो वा (प्रमाणं) यावत् (भूमिः) निखनेत् ततः कपिशिरस्तुल्य-अश्मभिः पूरयेत्।

प्रतिपदार्थः – एवं = अनेन प्रकारेण, ज्ञात्वा = विज्ञाय, गृहाधिकभुवं = गृहनिर्माणयुक्तस्थलेन अधिकं भूमिं, नत्वा = प्रणम्य, जलान्तस्तरः = जलागमस्थानं, आपुरुषः = एकपुरुषप्रमाणं यावत् = पर्यन्तं, भूमिं निखनेत् = खननं कारयेत्, ततः = तस्मात् परं, कपिशिरः = वानरशिरः, तुल्यैः = समानैः अश्मभिः = पाषाणैः, तस्मिन् खाते पूरयेत्।

सरलार्थः – निवासोपयुक्तस्थलस्य निर्णयं कृत्वा पूर्वोक्तविद्ध्यनुसारं भूमिसंशोधनान्तरं भूमिं प्रणम्य, जलदर्शनपर्यन्तम् एकपुरुषप्रमाणं वा यावत् भूमिं खनित्वा मृत्तिकां निष्कास्य तस्मात् वानरशिरतुल्यप्रस्तरैः तत्खातं पूरयेदिति।

बोधप्रश्नाः

१६. यदि खाते इष्टिकाप्राप्तिः भवेत्तदा तस्य किं फलं भवति?

१७. कस्य दर्शनेन अतिरोगभयं भवतीति उक्तमस्ति?

१८. प्रस्तरगृहस्य भित्तिः कुत्र संस्थापयेत्?

१९. कदा भूमेः पूजनं करणीयम्?

२०. भित्तिः अस्य शब्दस्य पर्यायशब्दाः के?

ग्रन्थस्य मूलपाठः

दक्षिणे पश्चिमे चैव नैर्ऋत्ये वायुकोणके।
एभिरुच्या यदा भूमिर्गजपृष्ठाऽभिधीयते॥८२॥
गजपृष्ठे भवेद्वासः स लक्ष्मीधनपूरितः।
आयुर्वृद्धिकरो नित्यं जायते नात्र संशयः॥८३॥
मध्येऽत्युच्चं भवेद्यत्र नीचं चैव चतुर्दिशम्।
कूर्मपृष्ठा भवेद् भूमिस्तत्र वासो विधीयते॥८४॥
कूर्मपृष्ठे भवेद्वासो नित्योत्साहसुखप्रदः।
धनधान्यं भवेत्तस्य निश्चितं विपुलं धनम्॥८५॥
पूर्वाग्निशम्भुकोणेषु उन्नतिश्च यदा भवेत्।
पश्चिमे च यदा नीचं दैत्यपृष्ठोऽभिधीयते॥८६॥
दैत्यपृष्ठे भवेद्वासो लक्ष्मीर्नायाति मन्दिरे।
धनपुत्रपशूनां च हानिरेव न संशयः॥८७॥
पूर्वपश्चिमयोर्दीर्घो दक्षिणोत्तर उच्चकः।
नागपृष्ठं विजानीयात् कर्तुरुच्चाटनं भवेत्॥८८॥
नागपृष्ठे यदा वासो मृत्युरेव न संशयः।
पत्नीहानिः पुत्रहानिः शत्रुवृद्धिः पदे पदे॥८९॥
आयते सिद्धयस्सर्वाश्चतुरस्त्रे धनागमः।
वृत्ते तु बुद्धिवृद्धिः स्याद्भद्रं भद्रासने भवेत्॥९०॥
चक्रे दारिद्र्यमित्याहुर्विषमे शोकलक्षणम्।
राजभीतिस्त्रिकोणे स्याच्छकटे तु धनक्षयः॥९१॥
दण्डे पशुक्षयं प्राहुः शूर्पे वासे गवां क्षयः।
गोव्याघ्रबन्धने पीडा धनुः क्षेत्रे भयं महत्॥९२॥
मनसश्चक्षुषोर्यत्र सन्तोषो जायते भुवि।
तस्यां कार्यं गृहं सर्वैरिति गर्गादिसम्मतम्॥९३॥
कर्ता ग्रामदिशश्चैव स्वरयुक्तं तु कारयेत्।
वह्निभिस्तु हरेद्भागं शेषाङ्के फलमादिशेत्॥९४॥
एके जागर्ति भूमिश्च द्वितीये समतागतिः।
तृतीये राक्षसी चैव मृत्युरेतन्न संशयः॥९५॥
प्रद्योतनात्पञ्चनगाङ्कसूर्य-नवेन्दुषड्विंशमितेषु भेषु।
शेते मही नैव गृहं विधेयं तडागवापीखननं न शस्तम्॥९६॥
व्यासविस्तारयोरैक्यं ग्रामाक्षरसमन्वितम्।
चतुर्गुणं नामयुक्तं शिवनेत्रेण भाजितम्॥९७॥
एकेन भूमेर्जीवः स्याद् द्वाभ्यां च समता भवेत्।
शून्यशेषे तु शून्यं स्यादित्युक्तं रुद्रयामले॥९८॥
भूम्यक्षरं चतुर्गुण्यं तिथिवारं च मिश्रितम्।
त्रिभिर्भागः प्रदातव्यः शेषेण फलमादिशेत्॥९९॥
एकेन जीविता भूमिर्द्विशेषे भूः समानता।
त्रिशेषे मृतभूमिः स्यादित्युक्तं चादियामले॥१००॥

यत्र वृक्षाः प्ररोहन्ति सस्यं हर्षात्प्रवर्द्धते।
सा भूमिर्जीविता वाच्या मृता चातोऽन्यथा भवेत्॥१०१॥
स्वामिहस्तप्रमाणेन ज्येष्ठपत्नीकरेण वा।
हस्तमात्रं खनेद् भूमिं नृणां प्रोक्तं पुरातनैः॥१०२॥
जलान्तं प्रस्तरान्तं वापुरुषान्तमथापि वा।
क्षेत्रं संशोध्य चोधृत्य शल्यं सदनमारभेत्॥१०३॥
देवालये गेहविधौ जलाशये
राहोर्मुखं शम्भुदिशो विलोमतः।
मीनार्कसिंहार्कमृगार्कतस्त्रिभे
खाते मुखात् पृष्ठविदिक् शुभा भवेत्॥१०४॥
वृषार्कादित्रिकं वेद्यां सिंहादिं गणयेद् गृहे।
देवालये च मीनादिं तडागे मकरादिकम्॥१०५॥
खातं भूमिपरीक्षणे करमितं तत्पूरयेत्तन्मृदा।
हीने हीनफलं समे समफलं लाभो रजोवर्द्धने॥१०६॥
तत्कृत्वा जलपूर्णमाऽऽशतपदं गत्वा परीक्ष्यं पुनः।
पादोनाऽर्द्धविहीनकेऽथनिभृते मध्याधमेष्टाम्बुभिः॥१०६॥
निखनेद्धस्तमात्रेण पुनस्तेनैव पूरयेत्।
पांशुनाधिकमध्योनश्रेष्ठमध्याधमाः क्रमात्॥१०७॥
कर्तुश्च हस्तप्रमितं खनित्वा खातं पयोभिः परिपूरितं चेत्।
वसेत् सुतार्थी परिपूरितं स्याच्छुष्के भवेत् तत्क्षणमेव नाशः॥१०८॥
स्थिरे जले वै स्थिरता गृहस्य स्याद्दक्षिणावर्ताजलेन सौख्यम्।
क्षिप्रं जलं शोषयतीह खातो मृत्युर्हि वामेन जलेन कर्तुः॥१०९॥
अथवा सर्वधान्यानि वापयेच्च समन्ततः।
यत्र नैव प्ररोहन्ति तां प्रयत्नेन वर्जयेत्॥११०॥
श्वभ्रं हस्तमितं खनेदिह जलं पूर्णं निशास्ये न्यसेत्।
प्रातर्दृष्टजलं स्थलं सदजलं मध्यं त्वसत्स्फाटितम्॥१११॥
खन्यमाने यदा भूमौ पाषाणं प्राप्यते तदा।
धनायुश्चिरता वै स्यादिष्टकासु धनागमः॥११२॥
कपालाङ्गारकेशादौ व्याधिना पीडितो भवेत्।
खाते यदाश्मा लभते हिरण्यं तथेष्टकायां च समृद्धिरत्र।
द्रव्यं च रम्याणि सुखानि धत्ते ताम्रादिधातुर्यदि तत्र वृद्धिः॥११३॥
पिपीलिकाषोडशपक्षनिद्रा भवन्ति चेत्तत्र वसेन्न कर्ता।
तुषास्थिचीराणि तथैव भस्मान्यण्डानि सर्पा मरणप्रदाः स्युः॥११४॥
वराटिका दुःखकलिप्रदात्री कार्पास एवाति ददाति दुःखम्।
काष्ठं प्रदग्धं त्वतिरोगभीतिर्भवेत्कलिः खर्परदर्शनेन॥११५॥
लोहेन कर्तुर्मरणं निगद्यं विचार्य वास्तु प्रदिशन्ति धीराः।
परीक्षितायां भुवि विघ्नराजं समर्चयेच्चण्डिकया समेतम्।
क्षेत्राधिपं चाष्टदिगीशदेवान् पुष्पैश्च धूपैर्बलिभिः सुखाय॥११६॥
पाषाणे सर्वतो बाह्यमिष्टकायां तदर्द्धकम्॥११७॥
मृत्तिकायां पिण्डमात्रमित्युक्तं रुद्रयामले।
पाषाणीभित्तिका ग्राह्या सर्वदा कारिकामते॥११८॥

ज्ञात्वैवं निखनेद् गृहाधिकभुवं नत्वा जलान्तस्तरो-
यावद्वापुरुषस्ततः कपिशिरस्तुल्याश्मभिः पूरयेत्॥११९॥

३.१० सारांशः

प्रियच्छात्र! भवान् अस्मिन् पाठे गजपृष्ठादिभूमीनां लक्षणं तथा तेषां शुभाशुभफलानां विषये सम्यग् रूपेण अधीतवान्। तदनन्तरम् आयत-चतुरस्र-वृत-भद्रासन-चक्र-विषमाकार-त्रिकोणाकार-शकटाकार-दण्डाकार-शूर्पाकार-धनुषाकारादिविभिन्नाकारप्रकाराणां भूमीनां तेषां शुभाशुभफलानां च विषयेऽपि पठितवान्। अत्र भवान् भूमेः जीवित-समता-मृतादिनिर्धारणे योग्यो जातः। देवगृह-निवासभवन-जलाशयारम्भे राहोर्मुखवशात् खातारम्भः कुत्र भवति? इत्यपि ज्ञातवान्। तदनन्तरं विभिन्नग्रन्थाधारेण भूमेः संशोधनाय परीक्षणविधिमपि पठितवान्। भूमेः खातखननसमये तत्र प्राप्तवस्तूनां यथा-पाषाण-इष्टिका-मण्डूक-वराटिका-अस्थि-तुष-भस्म-अण्ड-सर्प-पिपीलिका-अर्द्धदग्धकाष्ठ-लोह-ताम्रादिधातूनाम् आधारेण तत्स्थानं गृहनिर्माणकर्तुः कृते शुभप्रदायकं वा अशुभप्रदं भविष्यति इत्यपि ज्ञातवान्। तस्मात् परं पाषाण-इष्टिका-मृत्तिका-माध्यमेन गृहनिर्माणसमये भित्तेः स्थापनं कुत्र कार्यम्? इत्यपि पठितवान्। प्रसंगवशाद् भूमिपूजनविधौ कान् देवान् पूजयेदित्यपि भवान् पाठेऽस्मिन् अधीतवान्। मन्ये पाठस्यास्य अध्ययनेन भवान् भूमिसंशोधनविषयान् सम्यग्रूपेण ज्ञातवान्।

३.११ शब्दावली

१.	मन्दिरे	=	गृहे भवने वा
२.	कर्तुः	=	निवासकर्तुः
३.	चतुरस्रः	=	चतुरस्राकारः
४.	विषमः	=	विषमाकारः
५.	धनुः	=	धनुषाकारः
६.	शकटः	=	शकटाकारः
७.	वह्निभिः	=	अग्निभिः, त्रयाग्नयः अतः त्रिभिः
८.	व्यासः	=	दैर्घ्यः
९.	नगाः	=	पर्वताः सप्त अतः 7
१०.	अङ्काः	=	नव
११.	सूर्यः	=	द्वादशादित्याः अतः 12
१२.	नवेन्दु	=	ऊनविंशति
१३.	स्वरयुक्तं	=	स्वराङ्कयुक्तं
१४.	एकत्रं	=	एकीकृत्य
१५.	हर्षात्	=	प्रसन्नात्
१६.	प्रवर्द्धते	=	वर्द्धनं भवेत्
१७.	नृणां	=	राज्ञां

१८.	पुरातनैः	=	प्राचीनजनैः
१९.	सदनम्	=	गृहम्
२०.	शल्यम्	=	अस्थि
२१.	उद्धृत्य	=	निष्कासनं कृत्वा
२२.	गेहं	=	गृहं भवनं वा
२३.	विलोमतः	=	वैपरीत्यात्
२४.	शम्भुः	=	शिवः, ईशानकोणः
२५.	गणयेत्	=	गणनां कारयेत्
२६.	करमितं	=	हस्तमितं
२७.	रजः	=	धूलिः, मृत्तिका
२८.	परीक्ष्य	=	परीक्षणं कृत्वा
२९.	मृदा	=	मृत्तिका
३०.	पांशुना	=	धूलिना
३१.	पयः	=	जलम्
३२.	वर्जयेत्	=	वर्जनं कारयेत् त्यजेत् वा
३३.	निशास्ये	=	सायंकाले
३४.	अश्मा	=	प्रस्तरम्
३५.	द्रव्यं	=	वस्तु
३६.	हिरण्यं	=	सुवर्णं
३७.	तुषः	=	धान्यावरणम्
३८.	मृदा	=	मृत्तिका
३९.	वराटिका	=	कौड़ी
४०.	खर्परः	=	कपालसदृशपात्रम्, भिक्षापात्रं वा
४१.	धीराः	=	धैर्यशालिनः
४२.	निगद्यं	=	कथितम्
४३.	अर्चयेत्	=	पूजयेत्
४४.	अस्थि	=	शल्यम्
४५.	भुवि	=	भूमौ
४६.	भित्तिः	=	कुड्यः, दीवार इति हिन्द्याम्
४७.	पिण्डः	=	गृहक्षेत्रफलम्

४८. ग्राह्या = ग्रहणं कुर्यात्

४९. बाह्या = बहितः

५०. तुल्यः = समानः

५१. ज्ञात्वा = विज्ञाय

३.१२ सन्दर्भग्रन्थः

१. **बृहद्वास्तुमाला-पण्डित श्री रामनिहोर द्विवेदी,**
चौखम्बा सुरभारती प्रकाशन वाराणसी, संस्करणः 2012।

३.१३ सहायकग्रन्थाः

१. **वराहमिहिरकृतबृहत्संहिता**
प्रकाशकः - चौखम्बा विद्याभवन वाराणसी।

२. **वास्तुरत्नावली - पण्डित श्री जीवनाथझा दैवज्ञ विरचिता,**
चौखम्बा अमरभारती प्रकाशन तृतीय संस्करण 1981

३. **मुहूर्त्तचिन्तामणिः - पण्डितश्री रामदैवज्ञविरचित,**
प्रकाशकः - तेजकुमार बुक डिपो (प्रा.) लिमिटेड,
दशवां संस्करण सन् २००४।

३.१४ बोधप्रश्नोत्तराणि

१. गजपृष्ठभूमिः

२. कूर्मपृष्ठभूमिः

३. या भूमिः पूर्वपश्चिमयोर्दीर्घः दक्षिणोत्तर उच्चकः स्यात्

४. अयोग्या

५. नागपृष्ठभूमेः निवासेन कर्तुः मरणं भवति।

६. द्विप्रकारो भवति

७. यस्याः भूमेः चत्वारभुजाः असमानाः विषमाः नतोन्तरस्थलयुक्ता च स्यात्।

८. यस्यां भूमौ गमनकृते सति मनसः चक्षुषः च सन्तोषः सुखानुभूतिं च भवति।

९. त्रयः

१०. समानता

११. चतुर्विंशत्यङ्गुलात्मकम्

१२. ऐशान्ये

१३. अग्निकोणे

१४. लाभो रजोवर्द्धने

१५. अशुभफलं भवति

१६. समृद्धिः

१७. प्रदग्धकाष्ठं

१८. पिण्डाद् बहिः

१९. भूमिपरीक्षणानन्तरं

२०. कुड्यः आधारो वा

३.१५ अभ्यासप्रश्नाः

१. सफलं कूर्मपृष्ठभूमेः लक्षणं प्रतिपादयत।

२. "गोव्याघ्रबन्धने पीडा धनुः क्षेत्रे भयं महत्" अस्य श्लोकस्य सारांशं लिखत।

३. वासयोग्यभूमेः निर्णयः कथं क्रियते? स्पष्टयत।

४. प्रश्नाज्जीवितादिभूमिज्ञानं कथं क्रियते? निरूपयत।

५. विश्वकर्मप्रकाशानुसारं भूमिसंशोधनविधिं लिखत?

६. भूमिपूजनं कथं भवति? प्रतिपादयत।

७. नारायणभट्टमते भित्तिस्थापनविचारं प्रकटयत।

चतुर्थः पाठः – गृहनिर्माणे इष्टिकादिविचारः

पाठसंरचना

४.१ प्रस्तावना
४.२ उद्देश्यम्
४.३ गृहनिर्माणायेष्टिकादिविचारः
४.३.१ गृहनिर्माणायेष्टिकाविचारः
४.३.२ इष्टिकाचक्रम्
४.३.३ वह्निदीपनचक्रम्
बोधप्रश्नाः
४.४ शिलान्यासादिविचारः
४.४.१ शिलान्यासविधिः
४.४.२ स्तम्भस्थापनम्
बोधप्रश्नाः
४.५ गृहे ग्राह्याग्राह्यकाष्ठविचारः
४.५.१ निषिद्धकाष्ठानि
४.५.२ ग्राह्यकाष्ठानि
४.५.३ त्याज्यकाष्ठानि
४.५.४ वराहमिहिरमतानुसारेण त्याज्यकाष्ठानि
बोधप्रश्नाः
४.६ वृक्षच्छेदनादिविचारः
४.६.१ वृक्षच्छेदनमुहूर्ताः
४.६.२ वृक्षच्छेदनपूर्वं भूतादिप्रार्थना
४.७ वास्तौ खातादिकृत्यम्
४.७.१ खाते निक्षेपवस्तूनि
४.७.२ वास्तुकृत्यम्
बोधप्रश्नाः
४.८ स्तम्भादिविचारः
४.८.१ स्तम्भादिनामानि
४.८.२ गृहोच्चतामानम्
४.९ दिक्षु गृहस्योच्चनीचत्वादिफलम्
बोधप्रश्नाः
ग्रन्थस्य मूलपाठः
४.१० सारांशः
४.११ शब्दावली
४.१२ सन्दर्भग्रन्थः
४.१३ सहायकग्रन्थाः
४.१४ बोधप्रश्नोत्तराणि
४.१५ अभ्यासप्रश्नाः

४.१ प्रस्तावना

अयि छात्र!भवतः चतुर्थपाठे स्वागतम्। इतः पूर्वं भवता बृहद्वास्तुमालायां बहवः विषयाः पठिताः। यथा गृहनिर्माणप्रयोजनम्, जीर्णोद्धारफलम्, वर्गज्ञानम्, काकिणीविचारः,

अष्टोत्तरीयादिग्दशा, भूमेर्लक्षणानि तस्याः प्लवत्वफलम्, विभिन्नानां भूमीनां लक्षणानि, तासां फलम्, शल्यज्ञानमित्यादयः। एतेषां विषयाणां ज्ञानं गृहनिर्माणात् पूर्वमत्यावश्यकं भवति, एतेषां विषयाणामध्ययनेन ज्ञानं जातं यत् गृहनिर्माणं कस्मिन्नगरे कर्तव्यम्? कीदृशी भूमिः शुभा भवति? यत्र निवसनेन जीवनं सुखमयं भवेत्। भूमेः प्लवत्वेनापि जातकस्य जीवने समागतानां सुख-दुःखानां ज्ञानं भवति। एवमेव भूमेरधः स्थितानां शल्यानां ज्ञानं तथा तेषां निष्कासनं परमावश्यकं भवति। अन्यथा शल्यः आजीवनं दुःखं कलहं च ददातीति।

इदानीमस्मिन् पाठे भवननिर्माणयोजनान्तर्गतं भवने प्रयुक्तसामग्रीविषये पठिष्यामः। भवननिर्माणे निर्माणसामग्री उत्तमा भवेदिति दृष्ट्या वास्तुशास्त्रे भवननिर्माणार्थम् इष्टिकानां प्रस्तराणां च विचारः प्राप्यते। अधुना अस्मिन् पाठे इष्टिकाविचारः शिलान्यासविचारः गृहनिर्माणे काष्ठविचारः गृहनिर्माणाय काष्ठग्रहणाय वृक्षचयनादिविचारः खाते निक्षेपवस्तुविचारः, स्तम्भलक्षणविचारः गृहस्योच्चतानिर्धारणविचारश्चेति विषयाः भवान् पठिष्यति। मन्ये अस्य पाठस्याध्ययनेन भवान् गृहनिर्माणाय प्रयुक्तसामग्रीविषये खातादिकृत्ये च दक्षो भविष्यति।

४.२ उद्देश्यम्

अस्य पाठस्य पठनानन्तरं भवान् –

- इष्टिकालक्षणपूर्वकं तस्य निर्माणादिमुहूर्तविषये सम्यग्रूपेण ज्ञास्यति।
- शिलान्यासाय दिशानिर्धारणे दक्षो भविष्यति।
- प्रासादादिषु स्तम्भारोपणविधिं ज्ञातुं सक्षमो भविष्यति।
- गृहे ग्राह्याग्राह्यकाष्ठानां निर्धारणं कर्तुं शक्ष्यति।
- गृहनिर्माणे काष्ठप्रयोगस्य विषये ज्ञास्यति।
- गृहकार्यार्थं वृक्षच्छेदनविधिं मुहूर्त्तज्ञानपूर्वकं ज्ञातुं शक्ष्यति।
- प्रथमखाते निक्षेपवस्तूनां विषये वक्तुं शक्ष्यति।
- वास्तुकृत्ये कुशलो भविष्यति।
- स्तम्भनामपूर्वकं गृहादीनामुच्चमानविषये ज्ञातुं शक्ष्यति।
- पूर्वादिदिक्षु गृहस्योच्चनीचत्वफलं ज्ञास्यति।

४.३ गृहनिर्माणायेष्टिकादिविचारः

गृहनिर्माणकार्ये इष्टिका प्रमुखनिर्माणसामग्री वर्तते। इष्टिकानामाकार- प्रकारानुसारेण गृहनिर्माणे प्रयुक्ताः इष्टिकाः शुभाशुभफलं प्रयच्छन्ति। अतः इष्टिकाविषये निम्नलिखितप्रकारेण बृहद्वास्तुमालायां वर्णनमुपलभ्यते।

४.३.१ गृहनिर्माणायेष्टिकाविचारः

विजया मङ्गला चैव निर्मला सुखदेति च।
चतुर्धा चेष्टकाः प्रोक्ता गृहे च वरुणालये॥१२०॥
तिथ्यङ्गुलानि विजया मङ्गला सप्तचन्द्रकैः।
पक्षेन्दुभिर्निर्मला स्यात् सुखदा रामपक्षभिः॥१२१॥
प्रमाणमिष्टकायाश्च गर्गाद्यैर्मुनिभिः स्मृतम्।

अन्वयः- गृहे वरुणालये च विजया मङ्गला निर्मला सुखदा च इति चतुर्धा इष्टिकाः

प्रोक्ताः। तिथ्यङ्गुलानि विजया, सप्तचन्द्रकैः मङ्गला, पक्षेन्दुभिः निर्मला, रामपक्षभिः सुखदा स्यात् इति गर्गाद्यैर्मुनिभिः इष्टकायाः प्रमाणं च स्मृतम्।

प्रतिपदार्थः- गृहे च वरुणालये च = गृहनिर्माणार्थं जलाशयादिनिर्माणार्थं च, विजया मंगला चैव निर्मला सुखदेति च = विजयामंगलानिर्मलासुखदेति संज्ञकाः, चतुर्धा= चतुर्विधा, इष्टिकाः = 'ईंट' इत्याख्यपक्वमृत्तिकाखण्डम्, ताः, प्रोक्ताः = कथिताः सन्ति, तिथ्यङ्गुलानि = पंचदशाङ्गुलानि(15), विजया, सप्तचन्द्रकैः= सप्तदशांगुलप्रमाणकैः(17), मंगला, पक्षेन्दु = द्वादशांगुलमिता(12) निर्मला तथा च, रामपक्षभिः=त्रयोविंशतिप्रमाणकैः (23), सुखदा, इति गर्गाद्यैर्मुनिभिः इष्टिकायाः प्रमाणं, स्मृतम् = निगदितमिति भावः।

सरलार्थः-गर्गादिमुनिभिः इष्टिकानां नामानि तथा तेषां प्रमाणं अनेन प्रकारेण भणितम्। तत्र विजया मङ्गला निर्मला सुखदा इति चतुर्धा इष्टिकाः सन्ति। एतेषां प्रयोगः गृहे जलाशये वा कर्त्तुं शक्यते। विजया इष्टिका पञ्चदशाङ्गुलात्मिका भवति। मङ्गला सप्तदशाङ्गुलात्मिका भवति। निर्मला द्वादशाङ्गुलात्मिका भवति। सुखदा त्रयोविंशत्यङ्गुलात्मिका भवति। इति।

४.३.२ इष्टिकाचक्रम्

पञ्चत्रीणि त्रिकं पञ्च सप्त पञ्चावनीयभात्।
सौख्यं मृत्युं क्रमेणैव इष्टकारम्भकर्मसु॥१२२॥

अन्वयः- इष्टिकारम्भकर्मसु अवनीयभात् पञ्च त्रीणि त्रिकं पञ्च सप्त पञ्च क्रमेण सौख्यं मृत्युं (च विजानीयादिति)।

प्रतिपदार्थः- इष्टकारम्भकर्मसु = इष्टिकानिर्माणारम्भकार्येषु, अवनीयभात् = भौमाधिष्ठितनक्षत्रात् पञ्च त्रीणि त्रिकं पञ्च सप्त पञ्च, एते साभिजिदष्टाविंशतिचन्द्रनक्षत्रं यावदग्रिमाग्रिमं क्रमपूर्वकं गणना कृते सति, क्रमेणैव = क्रमशः, सौख्यं = सुखम्, मृत्युं = मरणं च विजानीयादिति

सरलार्थः- गृहनिर्माणकार्ये सर्वप्रथमम् इष्टिकारम्भः कदा करणीय इति अत्र विचार्यते। भौमग्रहाधिष्ठितनक्षत्रात् इष्टिकारम्भदिवसे चन्द्रनक्षत्रं यावत् गणयेत्। प्रथमपञ्चनक्षत्रेषु इष्टिकारम्भो भवति तदा गृहे सौख्यं भवति। तदनन्तरं अग्रिमत्रिषु नक्षत्रेषु इष्टिकारम्भः मृत्युं ददाति। ततश्चाग्रिमेषु त्रिषु नक्षत्रेषु पुनः सौख्यम्। ततः अग्रिमपञ्चनक्षत्रेषु मरणं भवति। ततः अग्रिमसप्तनक्षत्रेषु सौख्यं मिलति। अन्ते अन्तिमपञ्चनक्षत्रेषु इष्टिकारम्भे सति मरणं भवति। एतद्विचार्य इष्टिकारम्भः करणीयः।

इष्टिकारम्भचक्रम्

भौमनक्षत्रात्	5	3	3	5	7	5
गणनाफलम्	सौख्यम्	मृत्युः	सौक्ष्यम्	मृत्युः	सौख्यम्	मृत्युः

४.३.३ वह्निदीपनचक्रम्

सप्तपञ्चमुनिवेदपञ्चभिः शोकलाभरुजभीतिभीसुखम्।
भौमभाच्च गणयेत्सुधीः सदा इष्टकोपरि सुवह्निदीपनम्॥१२३॥

अन्वयः - इष्टिकोपरि सुवह्निदीपनं सदा सुधीः भौमभात् (निम्नलिखितेन प्रकारेण) च गणयेत्। सप्तपञ्चमुनिवेदपञ्चभिः शोकलाभरुजभीतिभी- सुखम् (च जानीयादिति)।

प्रतिपदार्थः-इष्टकोपरि = इष्टिकासुदृढीकरणार्थं तस्याः उपरि, सुवह्निदीपनम् = अग्निस्थापनं, सदा = सर्वदा, सुधीः = बुद्धिमान्नरः, भौमभात् = मंगलग्रहाधिष्ठितनक्षत्रात्, (अग्रिमप्रकारेण च क्रमशः) गणयेत्=गणनां कुर्यात्। सप्त, पंच, मुनि=सप्त, वेद=चत्वारः, पंचभिः क्रमशः शोकः लाभः रुज्भीतिः = रोगभयम्, भीः = भयम्, सुखं च जानीयादिति।

सरलार्थः-इष्टिकोपरि वह्निदीपनं कदा कर्त्तव्यम् इति विषये भौमनक्षत्रात् प्रथम-सप्तनक्षत्रे वह्निदीपनेन शोकः मिलति। तदनन्तरं पञ्चनक्षत्रेषु रोगभयं भवति। अग्रिमचतुर्षु नक्षत्रेषु भयं भवति। अन्तिमपञ्चनक्षत्रेषु वह्निदीपनेन सुखं भवति। अर्थात् उपर्युक्तनक्षत्रेषु अग्निस्थापनेन तत्तत्फलं गृहस्वामी प्राप्नोति।

अग्निदीपनचक्रम्

भौमनक्षत्रात्	7	5	7	4	5
नक्षत्राणि फलम्	शोकः	लाभः	रुज्भीतिः	भीतिः	सुखम्

बोधप्रश्नाः

१. कतिधा इष्टिकाः गर्गाद्यैः कथिताः?

२. 'मङ्गला' संज्ञकेष्टिका कति अङ्गुलात्मिका भवति?

३. 'सुखदा' इष्टिका कति अङ्गुलात्मिका भवति?

४. इष्टिकाचक्रे कस्य ग्रहस्य नक्षत्रात् गणना चन्द्रनक्षत्रपर्यन्तं भवति?

५. भौमनक्षत्रात् केषु नक्षत्रेषु वह्निदीपनचक्रे लाभो भवति?

४.४ शिलान्यासादिविचारः

गृहनिर्माणकाले सर्वप्रथमं शिलान्यासः मुख्यकर्म भवति। तदनन्तरमेव गृहनिर्माणारम्भो भवति। अतः शिलान्यासः शुभमुहूर्ते शुभसमये शुभलग्न एव कर्त्तव्यः। तत्र प्रथमशिला कुत्र स्थापयेदिति विषये अत्र पठामः।

४.४.१ शिलान्यासविधिः

दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत् प्रथमम्।
शेषाः प्रदक्षिणेन स्तम्भाश्चैव प्रतिस्थाप्याः॥१२४॥

अन्वयः- पूजां कृत्वा प्रथमं दक्षिणपूर्वे कोणे शिलां न्यसेत्। शेषाः स्तम्भाश्चैव प्रदक्षिणेन प्रतिस्थाप्याः।

प्रतिपदार्थः- पूजां कृत्वा = गृहारम्भाय गणेशादिपंचांगपूजनं वास्त्वर्चनं च विधाय, प्रथमं = आदौ, दक्षिणपूर्वे कोणे = आग्नेयकोणे, शिलां = प्रथमशिलां, न्यसेत्= स्थापयेत्। शेषाः = अवशिष्टाः शिलाः, स्तम्भाश्चैव= शिलानामुपरि स्तम्भाः, प्रदक्षिणेन = प्रदक्षिणक्रमेण आग्नेय-नैर्ऋत्य- वायव्य-ईशानकोणेषु, प्रतिस्थाप्याः = शिलादीनां स्थापनाः करणीयाः।

सरलार्थः-गृहारम्भे शिलान्यासः महत्त्वपूर्णकार्यमस्ति। गृहारम्भाय गणेशादिपंचांगपूजनं वास्त्वर्चनं च विधाय, सर्वप्रथमं दक्षिणपूर्वकोणे अर्थात् आग्नेयकोणे प्रथमशिला स्थापयेत्। अनन्तरं प्रदक्षिणक्रमेण अर्थात् अग्निकोणानन्तरं नैर्ऋत्यकोणे तदनन्तरं वायव्यकोणे ततश्च ईशानकोणे अवशिष्टशिलानां स्तम्भानां च स्थापना कार्या।

४.४.२ स्तम्भस्थापनम्

प्रासादेषु च हर्म्येषु गृहेष्वन्येषु सर्वदा।
आग्नेय्यां प्रथमं स्तम्भं स्थापयेत्तद्विधानतः॥१२५॥

अन्वयः-सर्वदा प्रासादेषु हर्म्येषु अन्येषु गृहेषु च आग्नेयां प्रथमं स्तम्भं तद्विधानतः स्थापयेत्।

प्रतिपदार्थः-सर्वदा= नित्यं, प्रासादेषु = राजगृहेषु, हर्म्येषु = धनीनामट्टालिकासु, अन्येषु गृहेषु = सामान्यजनादीनां भवनेषु च, आग्नेयां= दक्षिणपूर्वकोणे, प्रथमं स्तम्भं , तद्विधानतः = यथोक्तविधिपूर्वकं स्थापयेत्।

सरलार्थः-स्तम्भस्थापनाऽपि गृहे मुख्यकार्यं वर्तते। शिलानामुपरि स्तम्भानां स्थापनाकार्ये राजमन्दिरेषु अट्टालिकासु सामान्यगृहेषु वा प्रथमस्तम्भारोपणं आग्नेयकोणे विधिपूर्वकं पूजार्चनानन्तरं कर्त्तव्यम्।

सूत्रभित्तिशिलान्यासं स्तम्भस्यारोपणं तथा।
पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह कश्यपः॥

अन्वयः-सूत्रभित्तिशिलान्यासं तथा स्तम्भस्यारोपणं पूर्वदक्षिणयोर्मध्ये कुर्यात् इति कश्यपः आह।

प्रतिपदार्थः-सूत्रभित्तिशिलान्यासं = सूत्रस्य भित्तेः शिलानां च प्रथमस्थापना,तथा स्तम्भस्यारोपणं = स्थूणस्य स्थापना च, पूर्वदक्षिणयोर्मध्ये = आग्नेयकोणे, कुर्यात्= करणीया, इति कश्यपः आह = अनेन प्रकारेण कश्यपमुनिना कथितमस्ति।

सरलार्थः- गृहनिर्माणे सूत्रस्य भित्तेः शिलायाः न्यासः तथा स्तम्भस्यारोपणं सर्वप्रथमं पूर्वदक्षिणकोणे अर्थात् अग्निकोणे एव कर्त्तव्यम् इति कश्यपमुनेः मतमस्ति।

छत्रस्रगम्बरयुतः कृतधूपविलेपनः समुत्थाप्यः।
स्तम्भस्तथैव कार्यो द्वारोच्छ्रायः प्रयत्नेन॥

अन्वयः- छत्रस्रगम्बरयुतः कृतधूपविलेपनः स्तम्भः समुत्थाप्यः तथैव प्रयत्नेन द्वारोच्छ्रायः कार्यः।

प्रतिपदार्थः-छत्रस्रगम्बरयुतः = छत्र-माला-वस्त्रादिभिरलंकृतः, कृतधूपविलेपनः= धूपदीपचन्दनादिभिः पूजितः, स्तम्भः= स्थाणुः, समुत्थाप्यः= आरोपणीयः इति भावः। तथैव = अनेन प्रकारेणैव पूजनोपरान्तं, प्रयत्नेन = प्रयासपूर्वकं, द्वारोच्छ्रायः कार्यः = द्वारशाखारोपणं करणीयम् ।

सरलार्थः-स्तम्भस्य समुत्थापने प्रथमं छत्रमालावस्त्रधूपादिभिः स्तम्भस्य पूजनं करणीयम्। तदनन्तरमेव स्तम्भारोपणं कार्यम्। तथैव द्वारस्य स्थापनाऽपि धूपदीपादिभिः पूजनं कृत्वा करणीया।

बोधप्रश्नाः

६. शिलान्यासः कस्मिन् कोणे कर्त्तव्यः?

७. केन क्रमेण शिलास्थापनं कर्त्तव्यम्?

८. प्रथमं स्तम्भस्थापना कस्मिन् कोणे कर्त्तव्यम्?

९. महर्षि कश्यपमतानुसारेण आग्नेयकोणे प्रथमं किं-किं करणीयम्?

१०. स्तम्भोच्छ्रायस्य समये किं करणीयम्?

४.५ गृहे ग्राह्याग्राह्यकाष्ठविचारः

गृहे काष्ठस्य प्रयोगेण द्वारनिर्माणं गवाक्षानां निर्माणं शयनासनादीनां च निर्माणं भवति। अतः काष्ठं तु सुदृढं शुभदं च स्यादित्यर्थं काष्ठचयनाय वृक्षाणां शुभाशुभत्वं विचार्यते। यतः सर्वेषां वृक्षाणां काष्ठं तेषां गुणधर्मितानुसारेण ग्राह्यं न भवति। अपि च जीर्णकाष्ठान्यपि सुदृढानि न भवन्ति। अतः गृहे प्रयोगाय कीदृशानि काष्ठानि ग्राह्यानि कानि च निषिद्धकाष्ठानि इति विषये अत्र भवान् पठिष्यति।

४.५.१ निषिद्धकाष्ठानि

अन्यवेश्मस्थितं दारु नैवान्यस्मिन् प्रयोजयेत्।
न तत्र निवसेत्कर्त्ता वसन्नपि न जीवति॥

अन्वयः-अन्यवेश्मस्थितं दारु अन्यस्मिन् नैव प्रयोजयेत्। तत्र कर्त्ता न निवसेत्, (यतः) वसन्नपि न जीवति।

प्रतिपदार्थः-अन्यवेश्मस्थितं = अपरेषां गृहप्रयुक्तानामथवा अपरगृहस्थितानां, दारु = काष्ठम्, अन्यस्मिन् = अपरे नूतने गृहे भिन्नभवने वा, नैव, प्रयोजयेत्= स्थापयेत्। तत्र= तस्मिन् भवने, कर्त्ता = गृहस्वामी, न निवसेत्, (यतः) वसन्नपि = यदि निवासं करोति तदा, न जीवति = मृत्युं प्राप्नोति।

सरलार्थः-अन्यस्य गृहे प्रयुक्तकाष्ठं अथवा पुरातनगृहे प्रयुक्तकाष्ठं नूतनगृहे न प्रयोक्तव्यम्, यदि प्रयोगं करोति तदा गृहकर्त्ता तत्र न निवसेत्। यदि तत्र निवासं करोति तदा सः शीघ्र मृत्युं प्राप्नोति।

एवमेव समरांगणसूत्रे -

इष्टकालोष्ठपाषाणमृत्तिकाजीर्णमायसम्।
तृणं पत्रं बुधैः प्रोक्तं दारु नूत्नं गृहाय वै॥

अन्वयः- नूत्नं गृहाय वै बुधैः अजीर्णम् इष्टका-लोष्ठ-पाषाण-मृत्तिका, आयसम् तृणं पत्रं दारु च प्रोक्तम्।

प्रतिपदार्थः - नूत्नं गृहाय वै = नवीनगृहनिर्माणाय, बुधैः = वास्तुशास्त्रविशारदैः पण्डितैः, अजीर्णम्= न पुरातनमर्थात् नूतनमेव, इष्टका, लोष्ठ= लोष्टुः, पाषाण, मृत्तिका, आयसम्= लौहं च, तृणं= घाससरकण्डादिकं, पत्रं= वृक्षपत्रम्, दारु = काष्ठं च प्रोक्तं = कथितमस्ति।

सरलार्थः - नवीनगृहनिर्माणाय अप्रयुक्तेष्टका-लोष्ठ-पाषाण-मृत्तिका-लौह-तृण-वृक्षपत्र-काष्ठादिकं प्रयोक्तव्यमिति कथितमस्ति। अस्मिन्सन्दर्भे शारंगधरवचनम्-

नूतने नूतनं काष्ठं जीर्णे जीर्णं प्रशस्यते।
जीर्णे च नूतनं श्रेष्ठं नो जीर्णं नूतने शुभम्॥

४.५.२ ग्राह्यकाष्ठानि

श्रीपर्णी रोहिणी शाकः सर्जश्च सरलाः शुभाः।
पतङ्गलोध्रशालाख्यास्तालार्जुनकशिंशपाः॥
चन्दनाशोकबदरी मधूकाश्च कदम्बकाः।
प्रशस्ताश्च शमी निम्बो विल्ववर्ज्यं गृहान्तिके॥
गृहे दारुगुणैर्युक्ते गृहकर्मणि युज्यते।
गृहे काष्ठं समं समं श्रेष्ठमलिन्दे विषमं शुभम्॥

अन्वयः-श्रीपर्णी, रोहिणी, शाकः, सर्जः, पतङ्गः, लोध्रः, शालाख्याः, ताल-अर्जुनक-शिंशपाः सरलाः शुभाः। चन्दनम्, अशोकः, बदरी, मधूकः, कदम्बकाः च प्रशस्ताः। शमी, निम्बः, विल्वं गृहान्तिके वर्ज्यम्। गृहे गृहकर्मणि दारुगुणैर्युक्ते युज्यते। गृहे समं काष्ठं श्रेष्ठम्। अलिन्दे विषमं शुभम्।

प्रतिपदार्थः-श्रीपर्णी = कायफलवृक्ष इति हिन्द्याम्, रोहिणी = कुटकीवृक्ष इति हिन्द्याम्, शाकः= सागौनवृक्ष इति हिन्द्याम्, सर्जः = शालवृक्ष इति हिन्द्याम्, पतङ्गः= चन्दनवृक्षजातीयतरुविशेषः , लोध्रः= रक्तपुष्पैः श्वेतपुष्पैर्वा युक्तः वृक्षः लोधाख्यः, शालाख्यः = सखुआ इति हिन्द्याम्, ताल-अर्जुनक-शिंशपाः = तालः ताडवृक्ष इति हिन्द्याम्, अर्जुनवृक्षः प्रसिद्धः शिंशपः शीशमवृक्ष इति हिन्द्याम्, एते, सरलाः = अवक्राः, शुभाः= प्रशस्ताः सन्ति। चन्दनम्, अशोकः, बदरी = बेरवृक्ष इति हिन्द्याम्, मधूकः = महुआ इति हिन्द्याम्, कदम्बकाः च, प्रशस्ताः = गृहनिर्माणे श्रेयस्कराः। शमी, निम्बः = नीमवृक्ष इति हिन्द्याम्, विल्वं=बेलवृक्ष इति हिन्द्याम्, गृहान्तिके= गृहसमीपे अपि वर्ज्यम् = निषिद्धम्। गृहे = गृहनिर्माणे, गृहकर्मणि= द्वारकपाटादिनिर्माणाकार्ये गृहोपस्करादिषु च, दारुगुणैर्युक्ते युज्यते = अवक्र-सुदृढादिगुणयुक्तानि उपर्युक्तशुभवृक्षाणां काष्ठानि प्रयोक्तव्यानि। गृहे = गृहद्वारगवाक्षादिनिर्माणे समं काष्ठं = समाकारं समसंख्यकं समानप्रमाणयुक्तं समसंख्यकवृक्षाणां च दारु, श्रेष्ठम्। अलिन्दे = द्वाराणां पुरतः आवागमनाय रिक्तस्थानविशेषः (आधुनिक दालान, कॉरिडोर अथवा बरामदा), विषमं = विषमाकारं विषमसंख्यकं विषमप्रमाणयुक्तं विषमसंख्यकवृक्षाणां च काष्ठं, शुभम्= श्रेयस्करं भवति।

सरलार्थः-गृहे प्रयुज्यकाष्ठानां विषये कथितमस्ति यत् श्रीपर्णी, रोहिणी, शाकः, सर्जः पतङ्गः, लोध्रः, शालः, तालः, अर्जुनः, शिंशपश्च एते वृक्षाः सरलाः अर्थात् अवक्राः शुभाः अर्थात् एतेषां वृक्षाणां अवक्रकाष्ठानि गृहे ग्राह्यानि। इतोऽपि चन्दनम्, अशोकः, बदरीवृक्षः, मधूकः कदम्बश्चेति, एतेऽपि शुभवृक्षाः सन्ति। किन्तु शमी, निम्बवृक्षः, विल्ववृक्षश्च, एतेषां प्रयोगः गृहे न करणीयः। गृहे द्वारकपाटगवाक्षादीनां निर्माणाय समं काष्ठं प्रयोक्तव्यम् तथा च अलिन्दे (बरामदा, कॉरिडोर)च विषमं काष्ठं प्रयोक्तव्यम्।

४.५.३ त्याज्यकाष्ठानि

प्लक्षोदुम्बरचूताख्या निम्बस्नुहिबिभीतकाः।
दग्धाः कण्टकिनो वृक्षा वटाश्वत्थकपित्थकाः॥
अगस्तशिग्रुतालाख्यास्तिन्तिडीकाश्च निन्दिताः।
अन्ये च गृहनिर्माणे योजनीयाः समाः द्रुमाः॥

अन्वयः-प्लक्ष-उदुम्बर-चूताख्या निम्ब-स्नुहि-बिभीतकाः दग्धाः कण्टकिनः वृक्षाः वट-अश्वत्थ-कपित्थकाः, अगस्त-शिग्रु-तालाख्याः, तिन्तिडीकाश्च, निन्दिताः। अन्ये च समाः द्रुमाः गृहनिर्माणे योजनीयाः।

प्रतिपदार्थः–प्लक्ष–उदुम्बर–चूताख्या= प्लक्षः (पाकडवृक्ष इति हिन्द्याम्) उदुम्बरः (गूलरवृक्ष इति हिन्द्याम्) चूतवृक्षः आम्रवृक्षः एते, निम्ब–स्नुहि–बिभीतकाः= निम्बः (नीमवृक्ष इति हिन्द्याम्)स्नुहिः (सेहुडवृक्ष इति हिन्द्याम्), बिभीतकश्च (बहेडावृक्ष इति हिन्द्याम्) एते वृक्षाः, दग्धाः= अग्निज्वलितवृक्षाः, कण्टकिनः वृक्षाः= कण्टकयुक्ताः तरवः, वट–अश्वत्थ–कपित्थकाः= वटवृक्षःन्यग्रोधः (बरगदवृक्ष इति हिन्द्याम्) अश्वत्थः(पीपलवृक्ष इति हिन्द्याम्)कपित्थकश्च (कैथवृक्ष इति हिन्द्याम्) एते वृक्षाः, अगस्त–शिग्रु–तालाख्याः= अगस्तवृक्षः शिग्रुः (सहिजन इति हिन्द्याम्) तालश्च (ताडवृक्ष इति हिन्द्याम्) एते वृक्षाः, तिन्तिडीकाश्च= इमलीवृक्ष इति हिन्द्याम्,, निन्दिताः= इमे वृक्षाः गृहनिर्माणकार्ये अप्रशस्ताः त्याज्याश्च सन्ति। अन्ये च = उपर्युक्तानामतिरिक्तं, अपरे प्रशस्ताः,समाः = सरलाः समाकाराः, द्रुमाः = वृक्षाः, गृहनिर्माणे = द्वारकपाटगवाक्षादिनिर्माणकार्ये अथवा तृणमये काष्ठमये गृहे, योजनीयाः = प्रयोगार्हाः सन्तीति भावः।

सरलार्थः–गृहनिर्माणे त्याज्यवृक्षाः के इति अत्र विवेचिताः सन्ति। प्लक्षः, उदुम्बरः, चूतः (आम्रवृक्षः) निम्बः, स्नुहिः, बिभीतकः, दग्धाः वृक्षाः कण्टकिनः वृक्षाः, वटवृक्षः, अश्वत्थः, कपित्थः, अगस्तः, शिग्रुः, तालः, तिन्तिडिका च इमे वृक्षाः निन्दिताः सन्ति। अर्थात् एतेषां वृक्षाणां काष्ठं गृहे न प्रयोक्तव्यम् अन्यथा अशुभफलं भविष्यति। उपर्युक्तनिन्दितवृक्षान् विहाय अन्ये प्रशस्तवृक्षाः गृहनिर्माणे प्रयोक्तव्याः भवन्ति।

४.५.४ वराहमिहिरमतानुसारेण त्याज्यकाष्ठानि

पितृवनमार्गसुरालयवल्मीकोद्यानतापसाश्रमजाः।
चैत्यसरित्संगमसंभवाश्च घटतोयसिक्ताश्च॥
कुब्जानुजातवल्ली निपीडिता वज्रमारुतोपहताः।
श्वपतिहस्तिनिपीडितशुष्काग्निप्लुष्टमधुनिलयाः॥
तरवो वर्जयितव्याः शुभदाः स्युः स्निग्धपत्रकुसुमफलाः।
सुरदारुचन्दनसमामधूकतरवः शुभाद्विजातीनाम्॥
क्षत्रस्यारिष्टास्त्वश्वत्थखदिरविल्वादिवृद्धिकराः।
वैश्यानां जीवकखदिरसिन्दुकस्यन्दनाश्च शुभफलदाः॥
तिन्दुककेसरसर्जार्जुनोत्थशालाश्च शूद्राणाम्।
सर्वेषां वा शस्ताः सर्वे वृक्षाश्च निन्दिता ये न॥

अन्वयः–पितृवन–मार्ग–सुरालय–वल्मीक–उद्यान–तापसाश्रमजाः, चैत्य–सरितसंगमसंभवाः च, घटतोयसिक्ताः च, कुब्जानुजातवल्ली निपीडिताः वज्रमारुतोपहताः, श्वपति–हस्तिनिपीडित–शुष्क–अग्निप्लुष्ट–मधुनिलयाः, तरवः वर्जयितव्याः। स्निग्धपत्रकुसुमफलाः शुभदाः स्युः। द्विजातीनां सुरदारु– चन्दनसमा–मधूकतरवः शुभाः। क्षत्रस्य अरिष्टाः तु अश्वत्थ–खदिर– विल्वादिवृद्धिकराः। वैश्यानां जीवक–खदिर–सिन्दुक–स्यन्दनाः च शुभफलदाः। शूद्राणां तिन्दुक–केसर–सर्ज–अर्जुनोत्थ–शालाः शुभफलदाः। सर्वे वृक्षा सर्वेषां शस्ताः न निन्दिताय वा।

प्रतिपदार्थः–पितृवन–मार्ग–सुरालय–वल्मीक–उद्यान–तापसाश्रमजाः= पितृवनमर्थात् श्मशानस्थानं, मार्गः पथः, सुरालयः देवमन्दिराणि, वल्मीकस्थलम् उद्यानमर्थात् उपवने तत्र, तापसाश्रमस्थलमर्थात् तपस्यारतानां मुनीनामाश्रमस्थानम्, एतेषु स्थलेषु समुत्पन्नाः वृक्षाः, चैत्यसरितसंगमसंभवाः = चैत्यनाम जैनबौद्धादिनामुपासनास्थलानि स्मारकस्थानानि वा, सरितसंगमः नदीमेलनस्थलम् एतेषु स्थलेषु समुद्भवाः वृक्षाश्च, घटतोयसिक्ताः च = कुम्भजलेन अभिसिंचिताः वृक्षाश्च,, कुब्जानुजातवल्ली निपीडिताः= लताद्याच्छादितस्थानोत्पन्नाः लतादिभिश्च उपहताः

वृक्षा:, वज्रमारुतोपहता: =मेघोत्पन्नविद्युता निपीडिता वायुना च नष्टा: वृक्षा:, श्वपति-हस्तिनिपीडिता: = श्वपति: चाण्डाल: तेन निपीडितवृक्षा:, हस्ति: गज: तेन उपहता: वृक्षा:, शुष्क-अग्निप्लुष्ट-मधुनिलया: तरव: = शुष्का: नीरसवृक्षा:, अग्निप्लुष्टा: अग्निदग्धा: वृक्षा:, मधुनिलया: मधुमक्षिकानामावासयुक्ता: वृक्षा:, वर्जयितव्या: = एते वृक्षा: गृहनिर्माणे प्रयोगार्हा: न सन्ति। स्निग्धपत्रकुसुमफला: = येषां वृक्षाणां पत्राणि पुष्पाणि फलानि च सौम्यानि शुभानि च सन्ति ते, शुभदा:= गृहनिर्माणे प्रयोगार्हा:, स्यु:। द्विजातीनां = विप्राणां कृते, सुरदारु- चन्दनसमा- मधूकतरव:= सुरदारु अर्थात् देवदारुसंज्ञकवृक्षा:, चन्दनस्य समा: सरला: वृक्षा:, मधूकवृक्षाश्च (महुआ इति हिन्द्याम्), शुभा: = प्रशस्ता: श्रेयस्करा: च। क्षत्रस्य = क्षत्रियजनानां कृते, अरिष्टा: = अरिष्टसंज्ञका: वृक्षा: (रीठा इति हिन्द्याम्, केचन मतेन तु निम्बवृक्ष: अरिष्टवृक्ष:), तु अश्वत्थ-खदिर- विल्वादिवृद्धिकरा:= अश्वत्थवृक्षा:(पीपल इति हिन्द्याम्) खदिरवृक्षा:(खैरवृक्ष इति हिन्द्याम्), विल्ववृक्षाश्च (बेलवृक्ष इति हिन्द्याम्) एते शुभा: वंशादिवृद्धिकराश्च भवन्ति। वैश्यानां = वैश्यजातीयजनानां कृते, जीवक-खदिर-सिन्दुक-स्यन्दना: च = जीवकवृक्षा: खदिरवृक्षा:(खैर इति हिन्द्याम्), सिन्दुवारवृक्षा:, तिनिशवृक्षाश्च, शुभफलदा: = शुभा: अभीष्टफलदाश्च भवन्ति। शूद्राणां= शूद्रजातीयजनानां कृते, तिन्दुक- केसर-सर्ज-अर्जुनोत्थ-शाला:= तिन्दुकवृक्षा: (तेंदूवृक्ष इति हिन्द्याम्) केसरवृक्षा: (बकुलवृक्ष इति हिन्द्याम्, कश्चिन्मतेन पुन्नागवृक्ष: एव केसरवृक्ष:) सर्जवृक्षा: (शीशमवृक्ष इति हिन्द्याम्) अर्जुनवृक्षा: शालवृक्षाश्च, शुभफलदा:= श्रेयस्करा: भवन्ति। वा सर्वे वृक्षा: = ब्राह्मणादीनां कृते कथिता: उपर्युक्ता: सर्वे शुभा: वृक्षा:, सर्वेषां शस्ता:= सर्वेषां मनुष्याणां कृते प्रशस्ता:, ये निन्दिता: न = ये निन्दिता: वृक्षा: ते गृहनिर्माणार्थं निषिद्धा: सन्ति।

सरलार्थ:- ग्राह्याग्राह्यकाष्ठानां सन्दर्भे वराहमिहिरमतमस्ति यत्- श्मशाने मार्गे, देवालये, वल्मीकस्थाने, उद्याने, तपस्विनामाश्रमस्थाने, चैत्यस्थाने अर्थात् बौद्धमन्दिरे जैनमन्दिरे वा, नदीसंगमस्थले समुत्पन्नानां वृक्षाणां काष्ठानि गृहनिर्माणे निषिद्धानि । एवमेव कुम्भजलेन सिंचितवृक्षा:, लतादिभि: आच्छादिता: वृक्षा:, विद्युता वायुना च निहता: वृक्षा:, स्वयमेव निपतिता:, गजेन पातिता:, शुष्का: वृक्षा:, अग्निना दग्धवृक्षा:, मधुमक्षिकागृहयुक्तवृक्षाश्च एतादृशानां वृक्षाणां काष्ठान्यपि वर्जितानि भवन्ति। तत: केषां वृक्षाणां काष्ठानि प्रयोगे विधेयानि? तदा कथ्यते यत्- येषां वृक्षाणां पत्राणि स्निग्धानि भवन्ति, अपि च फलपुष्पयुक्ता: वृक्षा: गृहे प्रयोक्तव्या:। देवदारुवृक्षा:, चन्दनवृक्षा:, मधूकवृक्षाश्च ब्राह्मणानां कृते शुभा: भवन्ति। क्षत्रियाणां कृते अरिष्टा:, अश्वत्थवृक्षा:, खदिरा:, बिल्ववृक्षाश्च वृद्धिकरा: उन्नतिदायका: भवन्ति। वैश्यानां कृते खदिरवृक्षा:, सिन्दुकवृक्षा: (सिन्दुवारनामाख्या: वृक्षा:), स्यन्दनाश्च (तिनिशनामाख्या: वृक्षा:) शुभफलदा: भवन्ति। शूद्राणां कृते तिन्दुका: (तेन्दुवृक्षा:) केसरवृक्षा:, अर्जुनवृक्षाश्च शुभफलदा: भवन्ति। अथवा ये उपरि कथिता: प्रशस्तवृक्षा: सन्ति ते सर्वेभ्य: प्रशस्ता: सन्ति। तथा ये अप्रशस्ता: कथितास्ते सर्वेभ्य: अप्रशस्ता: त्याज्या: सन्ति।

बोधप्रश्ना:

११. नूतनगृहे कानि निषिद्धकाष्ठानि?

१२. केचन पञ्चग्राह्यकाष्ठानां नामानि लिखत।

१३. नारदमतेन केचन पञ्चत्याज्यकाष्ठानां नामानि लिखत।

१४. केभ्य: स्थानेभ्य: काष्ठानि न स्वीकरणीयानि?

१५. समं विषमं काष्ठं च कुत्र-कुत्र ग्राह्यम्?

४.६ वृक्षच्छेदनादिविचारः

गृहे काष्ठस्य बहु उपयोगः भवति। काष्ठस्य पूर्तिः वृक्षैः भवति। अतः वृक्षाणां छेदनन्तु आवश्यकं भवति। वृक्षाणां छेदनं शुभमुहूर्त्ते भवेत् तदैव काष्ठस्य शुभता स्यात्। अतः वृक्षच्छेदनमुहूर्त्तस्य आवश्यकता भवति। वृक्षे तु खगादीनां दृश्यादृश्यभूतानां आवासो भवति। अतः तेषां प्रीत्यर्थं आवासपरित्यागनिवेदनाय च बलिप्रदानपूर्वकं प्रार्थना भारतीयसंस्कृतेः महानता अस्ति। अत्र वयं वृक्षच्छेदनमुहूर्त्तपूर्वकं वृक्षप्रार्थनाविधिं चापि पठिष्यामः।

४.६.१ वृक्षच्छेदनमुहूर्त्ताः

कृष्णपक्षे चतुर्दश्यां रेवतीरोहिणीयुते।
यदा तदा गुरौ लग्ने गृहार्थं तु हरेद्द्रुमान्॥
शुक्रे लग्ने गुरौ केन्द्रेष्वगेराशौ गृहोपरि।
तृणादिभिः समाच्छाद्यो न चैवाग्निभयं भवेत्॥

अन्वयः-यदा कृष्णपक्षे चतुर्दश्यां रेवतीरोहिणीयुते लग्ने गुरौ तदा गृहार्थं द्रुमान् हरेत्। लग्ने शुक्रे केन्द्रषु अगे राशौ गुरौ (तदा) गृहोपरि तृणादिभिः समाच्छाद्यो चैव अग्निभयं न भवेत्।

प्रतिपदार्थः-यदा = यस्मिन् दिने,कृष्णपक्षे चतुर्दश्यां = कृष्णपक्षस्य चतुर्दशीतिथिः स्यादिति भावः, रेवतीरोहिणीयुते = चन्द्रः रेवतीनक्षत्रे रोहिणी नक्षत्रे वा स्यात्, लग्ने गुरौ = प्रथमभावे बृहस्पतिः स्थितः स्यात्, तदा = तस्मिन् दिने लग्ने च, गृहार्थं = गृहनिर्माणाय, द्रुमान् = वृक्षान्, हरेत् = छिन्द्यात्। लग्ने शुक्रे = प्रथमभावे शुक्रः स्थितः स्यादिति भावः, केन्द्रेषु = प्रथमचतुर्थसप्तमदशमभावेषु, अगे राशौ = स्थिरे राशौ अर्थाद् वृषसिंहवृश्चिककुम्भराशिषु अन्यतमे राशौ, गुरौ = बृहस्पतौ (तदा) गृहोपरि = भवनस्योपरि, तृणादिभिः=सरकण्डादिघासैः काष्ठादिभिश्च, समाच्छाद्यो चैव= यदि आच्छादनादिकं क्रियते तदा, अग्निभयं न भवेत् = अग्निना गृहं नष्टं न भवतीति भावः।

सरलार्थः-यस्मिन् दिने कृष्णपक्षस्य चतुर्दश्यां तिथौ चन्द्रः रेवतीनक्षत्रे रोहिणीनक्षत्रे वा स्याद् अपि च लग्ने गुरुः भवेत् तदा गृहनिर्माणाय वृक्षच्छेदनं कर्त्तव्यम्। वृक्षच्छेदनसमये लग्ने शुक्रो भवेत् तथा च गुरुः स्थिरराशौ केन्द्रेषु भवेत् तदा तृणकाष्ठादिभिः गृहाच्छादनेन गृहे अग्निभयं न भवति।

४.६.२ वृक्षच्छेदनपूर्वं भूतादिप्रार्थना

यानीह भूतानि वसन्ति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम्।
अन्यत्र वासं परिकल्पयन्तु क्षमन्तु ते चाद्य नमोऽस्तु तेभ्यः॥

अन्वयः-यानि भूतानि इह वसन्ति तानि विधिवत्प्रयुक्तं बलिं गृहीत्वा अन्यत्र वासं परिकल्पयन्तु, ते च अद्य क्षमन्तु तेभ्यः नमोऽस्तु।

प्रतिपदार्थः-यानि भूतानि = ये प्राणिनः (शरीरधारिणः प्रेतपिशाचादयः अपि), इह = अस्मिन् (वृक्षे इति भावः), वसन्ति = आवासस्थलं परिकल्प्य निवसन्ति, तानि = भूतानि, विधिवत्प्रयुक्तं = विधिपूर्वकं दत्तं, बलिं = भोजनादिकं, गृहीत्वा = स्वीकृत्य, अन्यत्र = अपरे वृक्षे, वासं = आवासस्थलं, परिकल्पयन्तु= चिन्तयन्तु (रचयन्तु इति भावः), ते = वृक्षस्थाः जन्त्वादयः, च अद्य = अस्मिन् दिने, क्षमन्तु = आवासहरणरूपापराधार्थं क्षमाप्रदानं कुर्वन्तु, तेभ्यः= वृक्षस्थभूतेभ्यः, नमोऽस्तु = सादरं प्रणमनमस्ति।

सरलार्थः-वृक्षछेदनात् पूर्वदिवसि वृक्षसमक्षे गत्वा खगादीनां भूतानां प्रार्थना कार्या यत् - ये ये प्राणिनः अस्य वृक्षस्योपरि निवसन्ति ते मया विधिवद्दत्तं बलिं गृहीत्वा अन्यत्र गच्छेयुः। ते मम क्षमां कुर्वन्तु। तेभ्यः मम नमस्कारः।

४.७ वास्तौ खातादिकृत्यम्

गृहे सर्वं शुभं भूयादिति धिया निर्माणकाले प्रथमखाते कानिचन शुभवस्तूनि खाते स्थापनीयानि। कानि च तानि वस्तूनि? अपि च कदा वास्त्वारम्भः करणीयः इति विषये अत्र भवान् पठिष्यति।

४.७.१ खाते निक्षेपवस्तूनि

मृदिष्टका-स्वर्ण-रत्न-धान्य-शैवालसंयुतम्।
ताम्रपात्रस्थितं सर्वं खातमध्ये नियोजयेत्।।

अन्वयः-खातमध्ये मृदिष्टका-स्वर्ण-रत्न-धान्य-शैवालसंयुतं सर्वं ताम्रपात्रस्थितं नियोजयेत्।

प्रतिपदार्थः-खातमध्ये= शिलान्यासकाले गर्तमध्ये, मृदिष्टका = नदीसंगमादिसप्तमृत्तिका इष्टिका च, स्वर्ण-रत्न-धान्य-शैवालसंयुतं = स्वर्णं सुवर्णं कनकं वा, रत्नम् मणिः (पंचरत्नानि तु कनकं हीरकं नीलं पद्मरागश्च मौक्तिम्), धान्यम् = यवगोधूमादिसप्तधान्यानि, शैवालः जलीयघासः, एते, सर्वं = सर्वाणि वस्तूनि, ताम्रपात्रस्थितं = ताम्रपात्रे निधाय, नियोजयेत्=स्थापयेत्।

सरलार्थः-गृहनिर्माणकाले प्रथमखाते शुभानि वस्तूनि स्थापनीयानि। खाते ताम्रपात्रे मृत्तिका इष्टिका स्वर्णादिरत्नानि सप्तधान्यानि शैवालादिकानि सर्वशुभवस्तूनि संस्थाप्य खाते स्थापनीयानि। अनन्तरमेव निर्माणकार्यं तस्योपरि कर्त्तव्यम्।

४.७.२ वास्तुकृत्यम्

ध्रुवं दृष्ट्वाथवा स्मृत्वा कर्त्तव्यं वास्तुरोपणम्।
सूर्यारवर्ज्यदिवसे रात्रौ त्यक्त्वा महानिशम्।।
मध्याह्ने तु कृतं यत्तु वास्तुकर्तुर्विनाशदम्।
निशीथे वाऽथवा सन्ध्योर्वास्तु वा नैव कारयेत्।।

अन्वयः-ध्रुवं दृष्ट्वा अथवा स्मृत्वा सूर्यारवर्ज्यदिवसे रात्रौ महानिशां त्यक्त्वा वास्तुरोपणं कर्त्तव्यम्। यत्तु मध्याह्ने कृतं (तत्) तु वास्तुकर्तुर्विनाशदम्। अथवा निशीथे सन्ध्योः वा वास्तु नैव कारयेत्।

प्रतिपदार्थः-ध्रुवं = रात्रौ ध्रुवतारकां, दृष्ट्वा = अवलोक्य, अथवा =विकल्पेन , स्मृत्वा = दिवसे संस्मृत्य, सूर्यारवर्ज्यदिवसे = रविवार-भौमवारवर्जिते कस्मिन्नपि दिवसे, रात्रौ महानिशां त्यक्त्वा = मध्यरात्रिकालं विवर्ज्य वास्तुरोपणं = शिलान्यासपूर्वकं स्तम्भारोपणादिकार्यं, कर्त्तव्यम्। यत्तु मध्याह्ने कृतं = यदि दिनार्धसमये वास्तुकार्यं क्रियते, (तत्) तु वास्तुकर्तुर्विनाशदम् = गृहकर्तुः विनाशाय भवति । अथवा निशीथे = मध्यरात्रिकाले, सन्ध्योः=प्रातः-सायंसन्ध्याकालयोः, वा वास्तु नैव कारयेत्= गृहारम्भः न करणीयः इति भावः।

सरलार्थः-अत्र वास्तुरोपणस्य (खातमध्ये शिलान्यासपूर्वकं स्तम्भारोपणादिकार्यस्य) शुभकालः उच्यते। गृहनिर्माणन्तु स्थिरं कार्यं वर्तते अतः रात्रौ ध्रुवतारकां दृष्ट्वा अथवा दिने

ध्रुवं स्मृत्वा रविभौमवासरातिरिक्तं अन्यवासरे मध्यरात्रिं च विवर्ज्य गृहारम्भः प्रकर्त्तव्यः। मध्याह्ने वास्तुरोपणं गृहकर्तुः विनाशाय भवति। एतत्कार्यं मध्यरात्रौ अथवा प्रातः-सायंसन्ध्याकालयोरपि न करणीयम्।

बोधप्रश्नाः

१६. वृक्षच्छेदनं कयोः चन्द्रनक्षत्रयोः करणीयम्?

१७. वृक्षच्छेदनात् पूर्वं किं करणीयम्?

१८. खाते कानि-कानि वस्तूनि निक्षिपेत्?

१९. कां तारकां दृष्ट्वा स्मृत्वा वा वास्तुकृत्यं करणीयम्?

२०. कयोः वासरयोः वास्तुकृत्यं न करणीयम्?

४.८ स्तम्भादिविचारः

गृहस्याधाराः स्तम्भाः भवन्ति। अर्थात् सम्पूर्णगृहं स्तम्भानामुपरि स्थितो भवति। तत्र स्तम्भानाम् आकृतिवशात्तेषां संज्ञा प्राचीनाचार्यैः कृता। अत्र स्तम्भादीनां नामानि पठामः।

४.८.१ स्तम्भादीनां नामानि

समचतुरस्रो रुचको वज्रोष्टास्रिर्द्विवज्रको द्विगुणः।
द्वात्रिंशता तु मध्ये प्रलीनको वृत्त इति वृत्तः।

अन्वयः-समचतुरस्रो रुचकः, अष्टास्रिः वज्रः, द्विगुणः द्विवज्रकः,मध्ये द्वात्रिंशता प्रलीनकः, वृत्तः तु वृत्तः इति।

प्रतीपदार्थः-समचतुरस्रो रुचकः,= समानचतुष्कोणीयः स्तम्भः रुचकसंज्ञकः, अष्टास्रिः वज्रः = अष्टकोणीयः स्तम्भः वज्रसंज्ञकः, द्विगुणः द्विवज्रकः= द्विगुणितः अष्टास्रिः अर्थात् षोडशकोणीयः स्तम्भः द्विवज्रसंज्ञकः, मध्ये द्वात्रिंशता प्रलीनकः = द्वात्रिंशत्कोणीयः प्रलीनकसंज्ञकः, वृत्तः तु वृत्तः = वर्तुलाकारः स्तम्भः वृत्तसंज्ञक इति।

सरलार्थः-समचतुरस्राकारः स्तम्भः रुचकाख्यः। अष्टकोणीयः स्तम्भः वज्रनाम भवति। ततः द्विगुणितः अर्थात् षोडशकोणीयः स्तम्भः द्विवज्रको भवति। द्वात्रिंशत्कोणीयः स्तम्भः प्रलीनकाख्यो भवति। तथा स्तम्भस्य मध्यभागः वृत्ताकारः भवति तदा वृत्ताख्यः स्तम्भो भवति। इति।

४.८.२ गृहोच्चतामानम्

विस्तारषोडशांशः सचतुर्हस्तो भवेद् गृहोच्छ्रायः।
द्वादशभागेनोनो भूमौ भूमौ समन्तात्॥

अन्वयः-विस्तारषोडशांशः सचतुर्हस्तः गृहोच्छ्रायो भवेत्। द्वादशभागेन ऊनो भूमौ समन्तात् भूमौ।

प्रतिपदार्थः-विस्तारषोडशांशः = गृहस्य विस्तृतिमानस्य षोडशभागः, सचतुर्हस्तः= चतुर्हस्तमितं मानं संयुक्ते सति, गृहोच्छ्रायो = गृहस्य भूतलतः उच्छ्रायमानं भवेदर्थात् भूतलस्थभवनस्योच्छ्रायमानम् (उच्चतामानं)भवति। द्वादशभागेन = भूतलस्थभवनस्य मानतः द्वादशांशः, ऊनः= न्यूनः, भूमौ = प्रथमतलस्थभवनस्योच्छ्रायमानं भवति। समन्तात् भूमौ =

एवमेव द्वितीयतृतीयादितलस्थभवनानामपि उच्छ्रायमानमपि ज्ञेयमिति भावः।

सरलार्थः-अत्र गृहस्योच्चतामानं कथ्यते। गृहस्य विस्तारस्य षोडशांशे चतुर्हस्तमितं योजनीयम्। अनेन भूतलस्थस्य भवनस्य उच्चता भविष्यति। प्रथमतलस्थभवनस्य उच्चता भूतलस्थभवनमानतः द्वादशभागाल्पो भवेत्। एवमेव अग्रिमाग्रिम तलानामुच्चता ज्ञेया। अस्मिन् प्रसंगे आचार्यवराहमिहितानुसारेण भित्तिमानज्ञानं कथ्यते-

व्यासात्षोडशभागः सर्वेषां सद्मनां भवति भित्तिः।
पक्वेष्टकाकृतानां दारुकृतानान्तु न विकल्पः॥

अर्थात् पक्वेष्टिकानां निर्मितानां सर्वभवनानां भित्तिमानं गृहक्षेत्रफलस्य विस्तारस्य षोडशांशमितं भवेत्। काष्ठमयगृहनिर्माणे भित्त्युच्चताविषये न कश्चिन्नियमविशेषः इति।

४.९ दिक्षु गृहस्योच्चनीचत्वादिफलम्

गृहस्योच्चतामानानन्तरं चतुर्षु दिक्षु गृहस्य उच्चनीचत्वफलविषये वर्णनं लभ्यते। पूर्वादिदिक्षु यदि गृहं नतं स्यादथवा उच्चं स्यात्तर्हि तस्मिन् गृहे निवासेन किं फलं स्यादिति वयमत्र पठामः।

स्यादुन्नतिः पूर्वनते नराणां वास्तौ धनं दक्षिणभागतुङ्गे।
क्षयो धनानां विनते प्रतीच्यामुच्चे विनाशो ध्रुवमुत्तरे तु॥
प्रागुत्तरोन्नते धनसुतक्षयः सुतवधश्च दुर्गन्धे।

अन्वयः-वास्तौ पूर्वनते नराणाम् उन्नतिः, दक्षिणभागतुङ्गे धनम्, प्रतीच्यां विनते धनानां क्षयः, उत्तरे उच्चे तु ध्रुवं विनाशः स्यात्, प्रागुत्तरोन्नते धनसुतक्षयः दुर्गन्धे सुतवधश्च।

प्रतिपदार्थः-वास्तौ = गृहे, पूर्वनते = पूर्वदिशि अवनते, नराणाम् उन्नतिः= गृहनिवासिनां वृद्धिः, दक्षिणभागतुङ्गे= गृहस्य दक्षिणदिशि उच्चे सति, धनम् = वित्तलाभः, प्रतीच्यां विनते = पश्चिमदिशि अवनते, धनानां क्षयः= धननाशः, उत्तरे उच्चे तु = गृहस्य उत्तरदिशि उन्ते सति, ध्रुवं विनाशः स्यात्= निश्चयपूर्वकं नाशो भवति। प्रागुत्तरोन्नते = पूर्वदिशि उत्तरदिशि च गृहमुच्चं स्यात्तदा, धनसुतक्षयः=धनस्य पुत्रस्य च नाशो भवति। दुर्गन्धे = दुर्गन्धियुक्ते गृहे, सुतवधश्च= पुत्रवधः ज्ञेयः।

सरलार्थः-यदि गृहं पूर्वदिशि अवनतं स्यात्तदा गृहकर्तुः उन्नतिः भवति। यदि दक्षिणदिशि गृहमुच्चं स्यात्तदा धनलाभो भवति। यदि पश्चिमदिशि गृहमवनतं भवेत्तदा धनानां क्षयः निर्धनता वा भवेत्। यदि उत्तरदिशि गृहमुच्चं भवति तदा निश्चयेन गृहकर्त्तुः विनाशमुपगच्छति। पूर्वदिशि उत्तरदिशि च यदि गृहमुच्चं भवेत् तदा क्रमेण धनसुतयोः क्षयो भवति। गृहे दुर्गन्धे सति सन्ततिनाशः ज्ञेयः।

बोधप्रश्नाः

२१. समचतुरस्रस्य स्तम्भस्य नाम किम्?

२२. भूतलभवनस्योच्चतामानेन कियद्भागेन ऊनः प्रथमतलस्थ-भवनस्योच्चता भवति?

२३. गृहोच्छ्रायमानं कियद् भवेत्?

२४. पूर्वनतस्य गृहस्य किं फलम्?

२५. प्रतीच्यामवनते गृहे किं फलम्?

विजया मङ्गला चैव निर्मला सुखदेति च।
चतुर्धा चेष्टकाः प्रोक्ता गृहे च वरुणालये॥
तिथ्यङ्गुलानि विजया मङ्गला सप्तचन्द्रकैः।
पक्षेन्दुभिर्निर्मलास्यात् सुखदा रामपक्षभिः॥
प्रमाणमिष्टकायाश्च गर्गाद्यैर्मुनिभिः स्मृतः।
पञ्चत्रीणि त्रिकं पञ्च सप्त पञ्चावनीयभात्।
सौख्यं मृत्युः क्रमेणैव इष्टकारम्भकर्मसु॥
सप्तपञ्चमुनिवेदपञ्चभिः शोकलाभरुजभीतिभीसुखम्।
भौमभाच्च गणयेत्सुधीः सदा इष्टकोपरि सुवह्निदीपनम्॥
दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत् प्रथमम्।
शेषाः प्रदक्षिणेन स्तम्भश्चैव प्रतिस्थाप्याः॥
प्रासादेषु च हर्म्येषु गृहेष्वन्येषु सर्वदा।
आग्नेय्यां प्रथमं स्तम्भं स्थापयेत्तद्विधानतः॥
सूत्रभित्तिशिलान्यासं स्तम्भस्यारोपणं तथा।
पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह कश्यपः॥
छत्रस्रगम्बरयुतः कृतधूपविलेपनः समुत्थाप्यः।
स्तम्भस्तथैव कार्यो द्वारोच्छ्रायः प्रयत्नेन॥
अन्यवेश्मस्थितं दारु नैवान्यस्मिन् प्रयोजयेत्।
न तत्र निवसेत्कर्त्ता वसन्नपि न जीवति॥
श्रीपर्णी रोहिणी शाकः सर्जश्च सरलाः शुभाः।
पतङ्गलोध्रशालाख्यास्तालार्जुनकशिंशपाः॥
चन्दनाशोकबदरीकमधूकाश्च कदम्बकाः।
प्रशस्ताश्च शमी निम्बो विल्ववर्ज्यं गृहान्तिके॥
गृहे दारुगुणैर्युक्ते गृहकर्मणि युज्यते।
गृहे काष्ठं समं श्रेष्ठमलिन्दे विषमं शुभम्॥
प्लक्षोदुम्बरचूताख्या निम्बस्नुहिबिभीतकाः।
दग्धः कण्टकिनो वृक्षा वटाश्वत्थकपित्थकाः॥
अगस्तशिग्रुतालाख्यास्तिन्तिडीकाश्च निन्दिताः।
अन्ये च गृहनिर्माणे योजनीयाः समाः द्रुमाः॥
पितृवनमार्गसुरालयवल्मीकोद्यानतापसाश्रमजाः।
चैत्यसरित्संगमसंभवाश्च घटतोयसिक्ताश्च॥
कुब्जानुजातवल्ली निपीडिता वज्रमारुतोपहताः।
श्वपतिहस्तिनिपीडितशुष्काग्निप्लुष्टमधुनिलयाः॥
तरवो वर्जयितव्याः शुभदाः स्युः स्निग्धपत्रकुसुमफलाः।
सुरदारुचन्दनसमामधूकतरवः शुभाद्विजातीनाम्॥
क्षत्रस्यारिष्टास्त्वश्वत्थखदिरविल्वादिवृद्धिकराः।
वैश्यानां जीवकखदिरसिन्दुकस्यन्दनाश्च शुभफलदाः॥
तिन्दुककेसरसर्जार्जुनोत्थशालाश्च शूद्राणाम्।
सर्वेषां वा शस्ताः सर्वे वृक्षाश्च निन्दिताः ये न॥
कृष्णपक्षे चतुर्दश्यां रेवतीरोहिणीयुते।
यदा तदा गुरौ लग्ने गृहार्थं तु हरेद्द्रुमान्॥

शुक्रे लग्ने गुरौ केन्द्रेष्वगेराशौ गृहोपरि।
तृणादिभिः समाच्छाद्यो न चैवाग्निभयं भवेत्॥
यानीह भूतानि वसन्ति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम्।
अन्यत्र वासं परिकल्पयन्तु क्षमन्तु ते चाद्य नमोऽस्तु तेभ्यः॥
मृदिष्टका-स्वर्ण-रत्न-धान्य-शैवालसंयुतम्।
ताम्रपात्रस्थितं सर्वं खातमध्ये नियोजयेत्॥
ध्रुवं दृष्ट्वाथवा स्मृत्वा कर्त्तव्यं वास्तुरोपणम्।
सूर्यारवर्ज्यदिवसे रात्रौ त्यक्त्वा महानिशम्॥
मध्याह्ने तु कृतं यत्तु वास्तुकर्तुर्विनाशदम्।
निशीथे वाऽथवा सन्ध्योर्वास्तु वा नैव कारयेत्॥
समचतुरस्रो रुचको वज्रोष्टाभिर्द्विवज्रको द्विगुणः।
द्वात्रिंशता तु मध्ये प्रलीनको वृत्त इति वृत्तः।
विस्तारषोडशांशः सचतुर्हस्तो भवेद् गृहोच्छ्रायः।
द्वादशभागेनोनो भूमौ भूमौ समन्तानाम्॥
स्यादुन्नतिः पूर्वनते नराणां वास्तौ धनं दक्षिणभागतुङ्गे।
क्षयोधनानां विनते प्रतीच्यामुच्चैर्विनाशो ध्रुवमुत्तरे तु॥
प्रागुत्तरोन्नते धनसुतक्षयः सुतवधश्च दुर्गन्धे।

४.१० सारांशः

बृहद्वास्तुमालायाः अस्मिन् पाठे भवननिर्माणयोजनान्तर्गतं भवने प्रयुक्तसामग्रीविषये ज्ञानं जातम्। भवननिर्माणे निर्माणसामग्री उत्तमा भवेदिति दृष्ट्या वास्तुशास्त्रे भवननिर्माणार्थम् इष्टिकानां प्रस्तराणां च विचारः प्राप्यते। अस्मिन् क्रमे गृहनिर्माणे इष्टिकाविचारः भवता पठितः। वस्तुतः गृहनिर्माणे शिलान्यासः मुख्यसोपानं वर्तते। शिलान्यासस्य कः विधिः? कथं च शिलान्यासः करणीयः? इति जिज्ञासायाः समाधानरूपे शिलान्यासविचारः मनोयोगेन भवान् अधीतवान्। पुनश्चाग्रे स्तम्भस्थापना कथं करणीया? स्तम्भानां कति भेदाः? कानि च तेषां नामानि? इत्यपि भवता ज्ञातम्। गृहनिर्माणे केषां वृक्षाणां काष्ठं ग्राह्यम्? केषां काष्ठानां त्यागः करणीय इति विषये भवान् सम्यग्रूपेण ज्ञातवान्। गृहनिर्माणकरणार्थं काष्ठग्रहणाय वृक्षचयनादिविचारे शुभमुहूर्त्तानां परिज्ञानं जातम्। अस्मिन्नैव क्रमे वृक्षस्थितभूतानां प्रीत्यर्थं बलिदानपूर्वकं प्रार्थना कथं करणीया? इत्यपि भवान् पठितवान्। तदनन्तरं खाते किं-किं स्थापनीयं येन गृहं सर्वदा सौख्ययुक्तं भवेदिति जिज्ञासायां खाते निक्षेपवस्तुविचारः भवता पठितः। अनन्तरं वास्तुकृत्यं कदा करणीयम्? येन गृहं चिरकालपर्यन्तं तिष्ठेदिति ज्ञानमप्यभवत्। ततः स्तम्भलक्षणविचारः, भवनस्योच्छ्रायविचारः गृहस्योच्चतानिर्धारणविचारश्चेति विषयाः भवान् सम्यग्रूपेण ज्ञातवान्। अन्ते विभिन्नदिक्षु गृहस्यावनते सति शुभाशुभविचारपुरस्सरं दुर्गन्धियुक्तगृहे पुत्रवधो भवतीति गृहस्य स्वच्छताविषये अपि प्रेरणा प्राप्ता। मन्ये अस्य पाठस्याध्ययनेन भवान् गृहनिर्माणाय प्रयुक्तसामग्रीविषये खातादिकृत्ये च निपुणो जातः।

४.११ शब्दावली

१.	अवनीयभात्	-	भौमनक्षत्रात्।
२.	रुजभीतिः	-	रोगभयम्।
३.	हर्म्येषु	-	विशालगृहेषु, अट्टालिकासु।
४.	स्रक्	-	माला।

५.	वेश्म	–	गृहम्।
६.	दारु	–	काष्ठम्।
७.	चैत्यः	–	देवालयः, जैनमन्दिरम्, स्मारकस्थलम्।
८.	ऊनः	–	न्यूनः।
९.	तुङ्गे	–	उच्चे।
१०.	वरुणालयः	–	जलाशयः।
११.	लोष्ठः	–	मृत्तिका।
१२.	द्रुमाः	–	वृक्षाः।
१३.	तापसाः	–	तपस्विनः।
१४.	शस्ताः	–	प्रशस्ताः, शुभाः।

४.१२ सन्दर्भग्रन्थः

१. **बृहद्वास्तुमाला, सम्पादकः डॉ. ब्रह्मानन्दत्रिपाठी,**
चौखम्बा सुरभारती प्रकाशन वाराणसी।

४.१३ सहायकग्रन्थाः

१. **वराहमिहिरकृतबृहत्संहिता**
प्रकाशकः – चौखम्बा विद्याभवन वाराणसी।

२. **वास्तुरत्नावली – पण्डित श्री जीवनाथझा दैवज्ञ विरचिता,**
चौखम्बा अमरभारती प्रकाशन तृतीय संस्करण १९८१।

३. **मुहूर्त्तचिन्तामणिः – पण्डितश्री रामदैवज्ञविरचित,**
प्रकाशकः – तेजकुमार बुक डिपो (प्रा.) लिमिटेड, दशवां संस्करण सन् २००४।

४.१४ बोधप्रश्नोत्तराणि

१. चतुर्धा इष्टिकाः भवन्ति।

२. 'मङ्गला' नाम्नी इष्टिका सप्तदशाङ्गुलात्मिका भवति।

३. 'सुखदा' नाम्नी इष्टिका त्रयोविंशत्यङ्गुलात्मिका भवति?

४. इष्टिकाचक्रे भौमग्रहस्य नक्षत्रात् गणना चन्द्रनक्षत्रपर्यन्तं भवति।

५. भौमनक्षत्रादारभ्य सप्तनक्षत्राणि विहाय अग्रिमेषु पंचनक्षत्रेषु चन्द्रनक्षत्रं स्यात्तदा लाभो भवति।

६. शिलान्यासः अग्निकोणे कर्त्तव्यः।

७. प्रदक्षिणक्रमेण (अग्निकोणानन्तरं नैऋत्यकोणे तदनन्तरं वायव्यकोणे ततश्च ईशानकोणे)शिलास्थापनं कर्त्तव्यम्।

८. प्रथमं स्तम्भस्थापना अग्निकोणे कर्त्तव्या।

९. महर्षि काश्यपमतानुसारेण आग्नेयकोणे प्रथमं सूत्र-भित्ति-शिलान्यासः स्तम्भस्थापना च करणीया।

१०. स्तम्भोच्छ्राये छत्र-माला-वस्त्र-धूप-दीपादिभिः पूजनं कार्यम्।

११. पुरातनगृहे स्थितानि काष्ठानि निषिद्धकाष्ठानि भवन्ति। तेषामुपयोगः नूतनगृहे वर्जितो भवति।

१२. श्रीपर्णी, रोहिणी, शाकः, सर्जश्चेति वृक्षाणां सरलानि अर्थात् अवक्राणि काष्ठानि ग्राह्यकाष्ठानि सन्ति।

१३. प्लक्षः, उदुम्बरः, निम्बः, वटवृक्षः, अश्वत्थः इत्यादयः वृक्षाः निन्दिताः।

१४. श्मशानम्, मार्गः, देवालयः, वल्मीकस्थानम्, उद्यानम्, तपस्विनामाश्रमस्थानम्, चैत्यस्थानम् अर्थात् बौद्धमन्दिरं जैनमन्दिरं वा, नदी संगमस्थलम् च, एतेषु स्थानेषु समुत्पन्नानां वृक्षाणां काष्ठम् न स्वीकरणीयम्।

१५. समं काष्ठं गृहे द्वारे च प्रयोक्तव्यम्। तथा अलिन्दे च विषमं काष्ठम्।

१६. वृक्षच्छेदनं रोहिणीरेवतीनक्षत्रयोः करणीयम्।

१७. वृक्षच्छेदनात् प्राक् भूतादिप्रार्थना करणीया।

१८. खातमध्ये मृदिष्टका-स्वर्ण-रत्न-धान्य-शैवालसंयुतं ताम्रपात्रे निधाय सर्वाणि वस्तूनि निक्षेप्तव्यानि।

१९. ध्रुवतारकां दृष्ट्वा वास्तुकृत्यं करणीयम्।

२०. रविभौमवासरयोः वास्तुकृत्यं न करणीयम्।

२१. समचतुरस्रस्य स्तम्भस्य नाम रुचकः अस्ति।

२२. भूतलस्थस्य भवनस्योच्छ्रायमाने द्वादशात्मकभागः ऊनः प्रथमस्थस्य भवनस्योच्छ्रायो भवति?

२३. गृहस्य विस्तारस्य षोडशांशे चतुर्हस्तं योजनेन भूतलस्थस्य भवनस्योच्छ्रायः।

२४. गृहं पूर्वदिशि अवनतं स्यात्तदा नराणां उन्नतिः भवति।

२५. गृहे प्रतीच्यां विनते सति धनानां क्षयो भवति।

४.१५ अभ्यासप्रश्नाः

१. चतुर्विधेष्टिकानां मानपुरस्सरं संज्ञा वर्णनीया?

२. वह्निदीपनचक्रं व्यावर्णयत।

३. स्तम्भस्थापनं कथं कर्त्तव्यम्? विस्तरेण वर्णयत।

४. कानि-कानि पुरातनवस्तूनि नवीनगृहे न प्रयोक्तव्यानि? वर्णयत।

५. चतुर्वर्णानां कृते अशुभवृक्षाणां वर्णनं करणीयम्।

६. वृक्षच्छेदनमुहूर्तं निरूप्य भूतादिप्रार्थना वर्णनीया।

७. वास्तुकृत्यं कदा करणीयमिति विषये विस्तरेण लिखत।

८. स्तम्भानां संज्ञां विलिख्य स्तम्भारोपणविधिं वर्णयत।

९. गृहोच्चमानं कथं साधनीयम्? वर्णयत।

१०. पूर्वादिदिक्षु गृहोच्चनीचत्वफलं व्यावर्णयत।

पञ्चमः पाठः – गृहविभागादिविचारः

पाठसंरचना

५.१ प्रस्तावना
५.२ उद्देश्यम्
५.३ गृहविभागविचारः
बोधप्रश्नाः
५.४ सूतिकागृहे कालविचारः
५.५ सूत्रविचारः
५.५.१ भूमिशोधनाय सूत्रनिर्णयः
५.५.२ विश्वकर्मप्रकाशे सूत्रनिर्णयः
बोधप्रश्नाः
५.६ शल्यनिष्कासनविचारः
५.६.१ महाज्योतिर्निबन्धे शल्यनिष्कासनविधिः
५.६.२ वास्तुराजवल्लभे शल्यानयनप्रकारः
५.६.३ प्राप्तशल्यफलम्
बोधप्रश्नाः
५.७ ज्योतिर्निबन्धे शल्यानयनप्रकारः
बोधप्रश्नाः
ग्रन्थस्य मूलपाठः
५.८ सारांशः
५.९ शब्दावली
५.१० सन्दर्भग्रन्थः
५.११ सहायकग्रन्थाः
५.१२ बोधप्रश्नोत्तराणि
५.१३ अभ्यासप्रश्नाः

५.१ प्रस्तावना

प्रियच्छात्र! बृहद्वास्तुमालायाः पञ्चमे पाठे भवतः स्वागतम्। गतपाठे भवान् गृहनिर्माणार्थ-मिष्टकाविचारप्रसङ्गे इष्टकानां विभिन्ननामानि तदनुसारेण तेषां शुभाशुभफलानि च सम्यग्रूपेण अधीतवान्। अनन्तरं शिल्यान्यासविधिः, वास्तुशास्त्राचार्याणाम् अनुसारं स्तम्भस्थापनविधिरपि पठितवान्। स्तम्भोच्छ्रायनियमः, पुरातनगृहस्य उपकरणवस्तूनां नूतनगृहे उपयोगं न भवति, प्रयोगकृते सति हानिः भवतीत्यपि भवान् ज्ञातवान्। तदनन्तरं गृहोपयोगकाष्ठं, निषिद्धकाष्ठं, वृक्षच्छेदनात्पूर्वं तस्य मुहूर्त्तविचारः, गर्ते निक्षेपवस्तूनि, वराहमिहिराचार्यानुसारं गृहोच्चमानं नतोन्नतादिफलञ्च अधीतवान्। अस्मिन् पञ्चमे पाठे गृहविभागादिविचारप्रसङ्गे भवान् दिक्परत्वेन गृहाणां निर्माणम् अर्थात् विभिन्नदिक्षु षोडशकक्षगृहाणां व्यवस्थाविषये पठिष्यति। अनन्तरं सूतिकागृहस्य निर्माणे कालनिर्णयः, भूमिसंशोधनाय सूत्रनिर्णयः विश्वकर्मानुसारं सूत्रनिर्णयः, विभिन्नग्रन्थाधारेण भूमेः शल्यनिष्कासननियमः तथैव तस्य शुभाशुभफलञ्चापि पाठेऽस्मिन् पठिष्यति।

५.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- दिग्विभागेन षोडशकक्षाणां स्थानविषये दक्षो भविष्यति।
- सूतिकागृहनिर्माणस्य कालनिर्द्धारणं कर्तुं शक्ष्यति।
- भूमिः संशोधनाय सूत्रनिर्णये सक्षमो भविष्यति।
- शल्यनिष्कासने प्रवीणो भविष्यति।
- प्राप्तशल्यस्य फलस्य निर्धारणे योग्यो भविष्यति।

५.३ गृहविभागविचारः

सामान्यतः अनुभवेन दृश्यते यत् निवासकर्ता निवासाय यत्र कुत्रापि वासयोग्यस्थलस्य चयनं कृत्वा तत्स्थलस्योपरि यद्गृहस्य निर्माणं कारयति तद्गृहं वस्तुतः दिग्वशाद् गृहकक्षविभागानुसारं न भवति। वास्तुशास्त्रे कार्यानुसारेण दिक्षु देवगृहादिकक्षविभागाः सम्प्राप्यन्ते। प्रस्तुते पाठे गृहविभागादिविचारप्रसङ्गे भूखण्डे विभिन्नकार्यसम्पादनाय कार्यप्रकृत्यनुरूपं शुभाशुभं च विचार्य षोडशकक्षविभागं पठिष्यामः।

पूर्वस्यां श्रीगृहं प्रोक्तमाग्नेय्यां स्यान्महानसम्॥१५०॥
शयनं दक्षिणस्यां च नैर्ऋत्यामायुधाश्रयम्।
भोजनं पश्चिमायां च वायव्यां धनसंचयम्॥१५१॥
उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम्।
इन्द्राग्न्योर्मथनं मध्ये यमाग्न्योर्घृतमन्दिरम्॥१५२॥
यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरम्।
राक्षसजलयोर्मध्ये विद्याभ्यासस्य मन्दिरम्॥१५३॥
तोयेशानिलयोर्मध्ये रोदनस्य च मन्दिरम्।
कामोपभोगशमनं वायव्योत्तरयोर्गृहम्॥१५४॥
कौबेरेशानयोर्मध्ये चिकित्सामन्दिरं सदा।
पुरन्दरेशयोर्मध्ये सर्ववस्तुषु संग्रहम्॥१५५॥
सदनं कारयेदेवं क्रमादुक्तानि षोडश।

अन्वयः - सदा पूर्वस्यां श्रीगृहं प्रोक्तम्, आग्नेयां महानसं स्यात्। दक्षिणस्यां शयनं, नैर्ऋत्यां च आयुधाश्रयम् (भवेत्)। पश्चिमायां भोजनं (गृहं) वायव्यां च धनसंचयम् (भवनं स्यात्)। उत्तरे द्रव्यसंस्थानम्, ऐशान्यां देवतागृहम् (भवेत्)।

इन्द्राग्न्योः मध्ये मथनं (गृहं), यमाग्न्योः (मध्ये) घृतमन्दिरं (स्यात्), यमराक्षसयोः मध्ये पुरीषत्यागमन्दिरं, राक्षसजलयोः मध्ये विद्याभ्यासस्य मन्दिरम् (भवेत्)। तोयेश-अनिलयोः मध्ये रोदनस्य मन्दिरं, वायव्योत्तरयोः (मध्ये) कामोपभोगशमनं गृहञ्च (भवेत्) कौवेर-ईशानयोः मध्ये चिकित्सामन्दिरं, (तथा) पुरन्दर-ईशानयोः मध्ये सर्ववस्तुषु संग्रहं गृहं भवेत्। एवं क्रमाद् उक्तानि षोडशसदनं कारयेत् ।

प्रतिपदार्थः - सदा = सर्वदा, पूर्वस्यां = पूर्वदिशि, श्रीगृहं = लक्ष्मीगृहं धनस्थापनगृहं वा, प्रोक्तम् = कथितम्, आग्नेय्यां = वह्निकोणे, महानसं = पाकशालां गृहं, स्यात् = भवेत्। दक्षिणस्यां = दक्षिणदिशि, शयनं = शयनगृहं भवेत्। नैर्ऋत्यां = नैर्ऋत्यकोणे अर्थात् दक्षिण-पश्चिमकोणे, च = अव्ययपदम् आयुधाश्रयं = शस्त्रागारः स्यात्। पश्चिमायां = पश्चिमदिशि, भोजनं = भोजनकरणाय गृहं भवेत्। वायव्यां = पश्चिम-उत्तरकोणे, च धनसंचयं = धनसंरक्षणगृहं स्यात्। उत्तरे = उत्तरस्यां दिशि, द्रव्यसंस्थानं = कोशगृहं, वस्तुस्थापनगृहं वा भवेत्। ऐशान्याम् = ईशानकोणे पूर्वोत्तरकोणे वा, देवतागृहं = देवपूजनकक्षस्य

निर्माणं करणीयम्। इन्द्राग्न्योः = पूर्वाग्नयोः, मध्ये = मध्यभागे, मथनं = दधिमथनगृहं स्यात्, यमाग्न्योः = दक्षिण-आग्नेयकोणयोः मध्यभागे, घृतमन्दिरं = घृतादिस्थापनगृहं भवेत्। यमराक्षसयोः = दक्षिण-नैर्ऋत्यकोणयोः मध्ये = अन्तरे, पुरीषत्यागमन्दिरं = शौचालयगृहं भवति। राक्षसजलयोः = नैर्ऋत्य-पश्चिमयोः मध्ये = मध्यस्थाने, विद्याभ्यासस्य = स्वाध्यायस्य, मन्दिरं = कक्षनिर्माणं कारयेत्। तोयेशानिलयोः = पश्चिम-वायव्यकोणयोः, मध्ये = मध्यस्थले, रोदनस्य = शोकसमये रोदनस्य क्रन्दनस्य वा, मन्दिरं = कक्षो भवेत्। वायव्योत्तरयोः = वायव्यकोण-उत्तरदिशोः मध्यभागे, च = एव कामोपभोगशमनं = रतिकाले सम्भोगाय, गृहं = कक्षभवनं कारयेत् अथवा तत्र नवदम्पत्तिकक्षो भवेत्। कौबेरेशानयोः = उत्तर-ईशानकोणयोः, मध्ये = अन्तरे, चिकित्सा = औषधस्थापनाय मन्दिरं = भवनं भवेत्। पुरन्दरेशयोः = पूर्व-ईशानकोणयोः मध्ये = मध्यमस्थले, सर्ववस्तुषु = सर्ववस्तुसंग्रहणाय भवनं भवेत्। एवम् = एवमेव वा एवमनेन प्रकारेण सदनं = गृहं कारयेत् = निर्मियेत्। क्रमात् = क्रमानुसारं षोडश = षोडश प्रकाराणि गृहाणि उक्तानि = कथितानि।

सरलार्थः - एकस्य समचतुरस्रभूखण्डस्योपरि यदा गृहस्य निर्माणं क्रियते तदा पूर्वस्यां दिशि धनसंरक्षणाय गृहस्य निर्माणं कारयेत्। क्षेत्रस्य पूर्वदक्षिणयोः मध्यभागे अग्निकोणे वा पाकशालायाः निर्माणं भवेत्। तस्य स्थलस्य दक्षिणस्यां दिशि शयनगृहस्य निर्माणं भवेत्। तथा दक्षिण-पश्चिमयोः मध्यमस्थले नैर्ऋत्यकोणे वा आयुधानां स्थापनाय कक्षस्य निर्माणं भवेत्। भूखण्डस्य पश्चिमदिशि भोजनगृहं भवितव्यम्। तस्य क्षेत्रस्य पश्चिम-उत्तरयोः मध्यवर्तिस्थाने अर्थाद् वायव्यकोणे धनसंचयगृहं भवेत्। भूखण्डस्य उत्तरदिशि द्रव्यस्थापनगृहं स्यात्। भवनस्य उत्तरपूर्वयोः मध्ये अर्थाद् ईशानकोणे देवगृहस्य निर्माणं शुभं भवति। अनन्तरं भवनस्य पूर्व-अग्निकोणयोः मध्यस्थले दधिमथनगृहस्य निर्माणं भवेत्। अग्निकोण-दक्षिणयोः मध्यभागे घृततैलादिपदार्थानां स्थापनाय गृहस्य निर्माणं भवेत्। दक्षिण-नैर्ऋत्यकोणयोः मध्यक्षेत्रे शौचालयस्य निर्माणं स्यात्। नैर्ऋत्य-पश्चिमयोः मध्यस्थाने अध्ययनकक्षस्य निर्माणं स्यात्। पश्चिम-वायव्यकोणयोः अन्तराले रोदनकक्षस्य निर्माणं कुर्यात्। वायव्य-उत्तरयोः मध्यभागे कामोपभोगशमनाय रतिभवनं कारयेत्। उत्तर-ईशानकोणयोः मध्यस्थले औषधगृहस्य निर्माणं भवेत्। ईशानपूर्वयोः मध्यभागे सर्ववस्तूनां संग्रहाय भवनस्य निर्माणं कारयेत्। भवनस्य मध्यभागे ब्रह्मस्थले अंगनं भवति। तस्मिन् स्थाने कक्षादिनिर्माणं न भवेत्।

षोडशगृहाणां चक्रम्

ईशानकोणः कक्षः १५ पूजागृहम्	पूर्वेशानमध्यः कक्षः १६ वस्तुसंग्रहगृहम्	पूर्वः कक्षः १ लक्ष्मीगृहम्	पूर्वाग्निमध्यः कक्षः २ दधिमन्थनगृहम्	अग्निकोणः कक्षः ३ पाकगृहम्
उत्तरेशानमध्यः कक्षः १४ औषधगृहम्				अग्निदक्षिणमध्यः कक्षः ४ घृतस्थापनगृहम्
उत्तरः कक्षः १३ द्रव्यस्थापनगृहम्				दक्षिणः कक्षः ५ शयनगृहम्
वायव्योत्तरमध्यः कक्षः १२ रतिगृहम्				दक्षिणनैऋत्यमध्यः कक्षः ६ शौचालयः
वायव्यकोणः कक्षः ११ भण्डारसदनम्	वायव्यपश्चिममध्यः कक्षः १० रोदनगृहम्	पश्चिमः कक्षः ९ भोजनगृहम्	पश्चिमनैऋत्यमध्यः कक्षः ८ स्वाध्यायग्रहम्	नैऋत्यकोणः कक्षः ७ शस्त्रागारम्

बोधप्रश्नाः

१. अग्निकोणे कस्य कक्षस्य निर्माणं भवति?

२. भूखण्डस्य यमराक्षसयोर्मध्ये कस्यकक्षस्य निर्माणं भवेत्?

३. कुत्र कोपभवनस्य निर्माणं भवति?

४. तोयेश इत्यनेन शब्देन का दिक् ज्ञायते?

५. कस्यां दिशि भोजनगृहस्य निर्माणं क्रियते?

५.४ सूतिकागृहे कालविचारः

सूतिकासदनस्यावश्यकता अधिकतया प्रसवकालात्पूर्वं भवति। एतदर्थमेतस्य भवनस्य निर्माणं सर्वदा नैर्ऋत्यां दिशि प्राप्तसमये कारयेत्।

नैर्ऋत्यां सूतिकागेहं नृपाणां भूतिमिच्छताम्॥१५६॥
आसन्नप्रसवे मासि कुर्याच्चैव विशेषतः।
तद्वत् प्रसवकाले स्यादिति शास्त्रेषु निश्चयः॥१५७॥
मासे तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने।
प्रसूतिसंभवे काले गृहारम्भणमिष्यते॥१५८॥

अन्वयः - भूतिमिच्छतां नृपाणां सूतिकागेहं नैर्ऋत्यां कुर्यात्। आसन्नप्रसवे मासि च एव विशेषतः कुर्यात् तद्वत् प्रसवकाले स्याद् इति शास्त्रेषु निश्चयः। प्रसूतिसंभवे काले नवमे मासे प्राप्ते तु पूर्वपक्षे शुभे दिने (सूतिका) गृहारम्भणम् इष्यते।

प्रतिपदार्थः - भूतिमिच्छताम् = ऐश्वर्यमिच्छतां, नृपाणां = राज्ञां, सूतिकागेहं = प्रसवगृहं, नैर्ऋत्यां = नैर्ऋतिकोणे, कुर्यात् = सम्पादयेत्।

आसन्नप्रसवे = प्रसवसमयोपगते, मासि = मासे, च एव विशेषतः कुर्यात् = यथाकाले विशेषरूपेण सूतिकासुखार्थं गृहादिकानां निर्माणादिकं क्रियते, तद्वत् प्रसवकाले = तेनैव प्रकारेण सुखादिकं सूतिका प्रसवकालसमुपस्थिते प्राप्नोति। इति हेतोः सूतिकागृहस्य निर्माणं शास्त्रेषु निश्चयः= वास्तुशास्त्रस्य ग्रन्थेषु निश्चितरूपेण मिलति अर्थात् एतच्छास्त्रवचनं, स्यात् = भवेत् इति।

प्रसूतिसंभवे = प्रसवसम्भवे, काले = समये, नवमे = नवमतमे, मासे = मासागमने, प्राप्ते = समुपस्थिते, तु = निश्चयेन अव्ययपदं, पूर्वपक्षे = शुक्लपक्षे, शुभे = शुभसमये दिने = वारे, सूतिकागृहारम्भणं = सूतिकायाः कृते गृहारम्भस्य कार्यम्, इष्यते =इच्छेदर्थात् सूतिकागृहस्य निर्माणं कारयेदिति भावः ।

सरलार्थः - सर्वप्रथममत्र प्रसवगृहस्य स्थानस्य निरूपणं कृत्वा अनन्तरं सूतिकागृहारम्भकालस्य निर्द्धारणमस्ति। वास्तुशास्त्रे श्रीगृहादिषोडशकक्षाणां दिगनुसारेण यथा प्रतिपादनमस्ति तथैव प्रसवगृहस्य अपि वर्तते। तत्र श्लोकानां पठनान्तरम् अनुमीयते यत् प्राचीनकाले सूतिकागृहेण सह षोडशकक्षयुतसदनस्य संरचना राजा वा तत्समतुल्यः मनुष्यः एव कारयति स्म। यथा श्लोकेऽस्मिन् वर्ण्यते-भूतिमिच्छतां नृपाणां सूतिकागेहं नैर्ऋत्यां कारयेत् इति। सम्प्रति प्रसवसम्पादनं प्रायः सर्वत्र चिकित्सालये भवति। तथापि शास्त्रदृष्ट्या चिकित्सालये अपि भूखण्डस्य नैर्ऋत्यकोणे एव प्रसवगृहस्य स्थानं भवेत्। सम्भवतया प्राचीनकाले प्रसवगृहस्य रचना अस्थायिरूपेण भवति स्म। तत्र सूतिकागृहारम्भाय सर्वदा गर्भस्य नवममासे प्रसवसमयागमनात्पूर्वं शुक्लपक्षे शुभवारयुक्तदिने नैर्ऋत्यां दिशि निर्माणं कार्यं कारयेत्।

५.५ सूत्रविचारः

गृहारम्भसमये भूमेः खण्डस्य परिधिनिर्माणाय रेखाकरणविधमं भवति। तच्च रेखाकरणं वर्णानुसारं सूत्रद्वारा भवति। अतः कस्य वर्णस्य किं सूत्रमिति उच्यते।

५.५.१ भूमिशोधनाय सूत्रनिर्णयः

विप्रस्य दर्भजं सूत्रं मौञ्जन्तु क्षत्रियस्य च।
कार्पासं च भवेद्वैश्ये शूद्रस्य स्वर्णकल्पितम्॥१५९॥

अन्वयः – विप्रस्य दर्भजं सूत्रं क्षत्रियस्य च मौञ्जं, वैश्ये कार्पासं शूद्रस्य तु स्वर्णकल्पितं च भवेत्।

प्रतिपदार्थः – भूमिशोधनाय सूत्रनिर्णयसमये विप्रस्य = ब्राह्मणस्य, दर्भजं सूत्रं = कुशनिर्मितं सूत्रं, प्रयोक्तव्यं, क्षत्रियस्य = महीभुजस्य च, मौञ्जं = मौञ्जनिर्मितं सूत्रं भवेत्, वैश्ये = वैश्यकुलोत्पन्नानां, गृहे कार्पासं = कार्पासनिर्मितेन सूत्रेण तु = निश्चयेन उपयोगं कारयेत्। शूद्रस्य = शूद्रवर्णस्य कृते, स्वर्णकल्पितं = स्वर्णेन निर्मितेन सूत्रेण च प्रयोगं, भवेत् = स्यात्।

सरलार्थः – भूमिसंशोधनाय सूत्रस्य आवश्यकता भवति। तत्सूत्रं चतुर्वर्णानुसारं निर्मितं भवेत्। यथा विप्रवर्णानां कृते कुशनिर्मितं सूत्रं वर्तते। क्षत्रियवर्णानां कृते मौञ्जसूत्रं भवति। वैश्यानां कार्पाससूत्रं, एवमेव शूद्राणां स्वर्णकल्पितसूत्रस्य निर्धारितमस्ति। यस्य वर्णस्य कृते यत्सूत्रं लिखितमस्ति तद्वर्णजनेन तत्सूत्रस्य परिमापनसमये प्रयोगः करणीयः इत्यर्थः।

५.५.२ विश्वकर्मप्रकाशे सूत्रनिर्णयः

अथापरमपि ज्ञानङ्कथयामि समासतः।
षड्गुणीकृतसूत्रेण शोधयेद्धरणीतले॥१६०॥
सुधृते समये तस्मिन्सूत्रङ्केनापि लङ्घितम्।
तदस्थि तत्र जानीयात्पुरुषस्य प्रमाणतः॥१६१॥
अभ्यक्तो दृश्यते यस्यां दिशि शल्यं समादिशेत्।
तस्यामेव तदस्थीनि सप्तत्यङ्गुलमानतः॥१६२॥
सूत्रिते समये यत्र श्वा सूत्रोपरि संस्थितः।
तदास्थि तत्र जानीयात् षष्ठ्यङ्गुलमितक्षितौ॥१६३॥
उन्मादे चागते तस्मिन् समये यत्र संस्थितः।
तदास्थि तत्र जानीयाद्धस्तद्वयमितक्षितौ॥१६४॥
सूत्रे विसूत्रिते तस्मिन् भिन्ने कुम्भेऽथवा यदि।
आदिशेन्निधनं तत्र दम्पत्योः क्रमशस्तदा॥१६५॥

अन्वयः – अथ अपरमपि ज्ञानं समासतः कथयामि। षड्गुणीकृतसूत्रेण धरणीतले शोधयेत्। सुधृते समये (यदि) केनापि तत् सूत्रं लङ्घितं तत्र पुरुषस्य प्रमाणतः तस्मिन् (स्थाने) अस्थि (अस्तीति) जानीयात्, यस्यां दिशि अव्यक्तो दृश्यते तस्यां (दिशि) सप्तत्यङ्गुलमानतः तदस्थीनि शल्यम् एव समादिशेत्।

सूत्रिते समये सूत्रोपरि यत्र श्वा संस्थितः (स्यात्) तत्र षष्ठ्यङ्गुलमितक्षितौ तद् अस्थि जानीयात्।

तस्मिन् समये उन्मादे आगते यत्र संस्थितश्च भवेत् तत्र हस्तद्वयमितक्षितौ तदा अस्थि जानीयात्।

यदि तस्मिन् (समये) सूत्रे विसूत्रिते अथवा कुम्भे भिन्ने (स्यात्) तदा तत्र दम्पत्योः क्रमशः निधनम् आदिशेत्।

प्रतिपदार्थः - अथ = अनन्तरं, सूत्रनिर्णयविषये, अपरमपि = अन्यमपि, ज्ञानं = सूत्रप्रयोगविषये शुभाशुभज्ञानं, समासतः = संक्षेपतः कथयामि = प्रतिपादयामि। षड्गुणीकृतसूत्रेण = दैर्घ्यमानेन षड्गुणं सूत्रमेकीकृत्य तेन, धरणीतले शोधयेत्= भूमिशोधनं करणीयमिति भावः। सुधृते समये = भूमिसंशोधनाय सूत्रधारणकाले, यदि केनापि = केनचित् नरपश्वादिना, तत्सूत्रं, लङ्घितं = लङ्घनं करोति, तर्हि तत्र = तस्मिन् स्थले, पुरुषस्य प्रमाणतः = एकस्य पुरुषस्य मानतः प्रायः सार्धत्रयहस्तमिते भूमेरन्तः, तस्मिन् = तत्र स्थले, तद् अस्थि = शल्यम् अस्तीति जानीयात् = विजानीयात्।

यस्यां दिशि, अभ्यक्तः दृश्यते = सूत्रं किचिंत्भग्नमिव स्फाटितं प्रतीयते, तस्यां दिशि शल्यं = अस्थिप्रभृतिशल्यम् एव, समादिशेत् = आदिशेत्। तदा सप्तत्यङ्गुलमानतः = अङ्गुलमानतः **७०** अंगुलानि भूमेरन्तः, अस्थीनि = अस्थिशल्यानि स्युः।

सूत्रिते समये = सूत्रेण भूमिशोधनकाले, सूत्रोपरि = सूत्रस्योपरि, यत्र = यस्मिन् स्थाने श्वा = कुक्कुरः, संस्थितः = तिष्ठति। तत्र = तस्मिन् स्थाने, षष्ठ्यङ्गुलमितक्षितौ = **६०** अङ्गुलपरिमिताधस्तले, तदस्थिः = कुक्कुरस्य अस्थिशल्यं भवति, जानीयात् = ज्ञेयम्।

तस्मिन् समये = सूत्रिते समय, उन्मादे = विक्षिप्तमनुष्ये, यत्र = यस्मिन् स्थले, आगते = समुपस्थिते, संस्थितः = तिष्ठतीति भावः। तत्र = तस्मिन् स्थाने, हस्तद्वयमितक्षितौ = हस्तद्वयपरिमितपृथिव्या अधःस्थले तदास्थि = तर्हि अस्थितशल्यं भवतीति, जानीयात् = विजानीयात्।

तत्र = तस्मिन् स्थले, सूत्रे, विसूत्रिते = विखण्डिते भंगे, अथवा, कुम्भे = घटे, भिन्ने = खण्डिते सति, तदा = तस्मिन् काले, दम्पत्योः = पतिपत्न्योः, क्रमशः निधनं = क्रमानुसारेण मरणमर्थात् सूत्रे विसूत्रिते पतिमरणं तथा कुम्भे भिन्ने पत्नीमरणम्, आदिशेत् = निर्दिशेत्।

सरलार्थः - भवननिर्माणकर्ता यस्मिन् क्षेत्रे निवासाय स्थानस्य निर्धारणं करोति, तस्मिन् स्थाने निर्माणसम्बधिकार्यारम्भात्पूर्वं स्थानस्य मापनांकनं भवति। अनन्तरं तत्र वास्तुकार्यं करणीयम्। येन सूत्रेण मापनं करणीयं तत्सूत्रं ब्राह्मणादिचतुर्वर्णानां कृते भिन्नं-भिन्नं निरूपितमस्ति। इत्यस्मिन् विषये भवान् गतश्लोके सम्यग् रूपेण अधीतवान्। अस्मिन् श्लोके सूत्रकरणसमये परिस्थितिवशाच्छुभाशुभफलानां विचारः क्रियते।

येन सूत्रेण सूत्रकार्यं भवेत् तत् सूत्रं सर्वदा दैर्घ्यमानेन षड्गुणितं कर्त्तव्यम्। सूत्रिते काले यः कश्चन पशुपक्षिमानवादि तत्सूत्रम् उल्लंघयति, अथवा तस्य सूत्रस्योपरि तिष्ठति तत्र एकस्य पुरुषस्य प्रमाणात् अर्थात् प्रायः सार्धहस्तत्रयमितादधस्तात् तस्य पश्वादेः अस्थिशल्यं भवतीति ज्ञेयम्। सूत्रप्रसरिते समये सूत्रस्य यद्भागः यत्र अभ्यक्तः स्फाटितो वा दरीदृश्यते तस्मिन् स्थाने सप्तत्यङ्गुलमिते अधो भागे अस्थि शल्यं वा भवेदिति ज्ञायते। सूत्रितसमये कुक्कुरः आगत्य यदि तस्य सूत्रस्योपरि तिष्ठति अथवा तत्सूत्रम् उल्लंघयति तर्हि तस्मिन् स्थाने षष्ट्यङ्गुलमिते अधो भागे तस्य अस्थि भवेदिति प्रवदेत्। सूत्रप्रसरिते समये यदि उन्मादयुक्तः मनुष्यः तत्सूत्रं लंघयति अथवा तस्य सूत्रस्योपरि तिष्ठति तर्हि तस्मिन् स्थले हस्तद्वयमितादधस्तात् अस्थि भवतीति विजानीयात्। परन्तु यदि सूत्रप्रसरिते काले सूत्रं भग्नं

खण्डितं वा भवेत् तर्हि तत्र निश्चयः भूस्वामिदम्पत्योः मध्ये पतिमरणं अथवा तस्मिन् काले कुम्भे भिन्ने सति पत्नीनिधनं भवेदिति ज्ञेयम्।

बोधप्रश्नाः

६. भूमेः कस्यां दिशि सूतिकागेहं करणीयम्?

७. कति गुणितसूत्रेण सूत्रस्य निर्माणं भवति?

८. सूत्रिते समये यदि श्वा सूत्रोपरि संस्थितः स्यात्तर्हि कुत्र शल्यं भवति?

९. सूत्रिते समये यत्र उन्मादः तिष्ठति तत्र कुत्र शल्यं भवति?

१०. यदि सूत्रं विसूत्रितं भवेत्तर्हि किं फलं भवेत्?

५.६ शल्यनिष्कासनविचारः

भूमेरधोभागे अस्थि-तुष-भस्म-वराटिका-कार्पास-खर्परादीनि अमाङ्गल्यानि वस्तूनि शल्यमित्यभिधीयते। यस्मिन् भूखण्डे एतानि वस्तूनि भवन्ति तस्मिन् स्थाने ये निवसन्ति तेषां महद्हानिः धनक्षयः मनोद्वेगः शारीरिक-मानसिकरोगः दुःस्वप्नादयश्च भवन्ति। तस्मात् कारणात् भूस्वामिना तस्मात् स्थानात् तानि अशुभानि अमाङ्गल्यानि वस्तूनि भवननिर्माणात् प्राक् निष्कास्यानि।

वास्तुशास्त्रे शल्योद्धारणाय बहुविधयः सन्ति। तन्माध्यमेन भूखण्डस्य कस्मिन् भागे, कस्या दिशि, कियन्मितादधस्तात् शल्यमस्ति? इत्थं सम्यग् विज्ञाय अनन्तरं तस्मात् भूखण्डात् तच्छल्यस्य निष्कासनं कृत्वा तत्र गृहनिर्माणं कर्त्तव्यम्।

५.६.१ महाज्योतिर्निबन्धे शल्यनिष्कासनविधिः

स्मृत्वेष्टदेवतां प्रश्नवचनस्याद्यमक्षरम्।
गृहीत्वा तु ततः शल्याशल्यं सम्यग्विचार्यते॥१६६॥
व प्रश्ने पूर्वस्यां दिशि मनुजशल्यं सार्द्धहस्तमात्रे मनुजमरणं कथयति।
क प्रश्ने आग्नेयां खरशल्यं कटिमात्रे नृपदण्डं वा गोमरणं कथयति॥
च प्रश्ने दक्षिणस्यां वानरशल्यं कटिमात्रे गृहाधीशस्य मृत्युं जनयति।
त प्रश्ने नैर्ऋत्यामश्वशल्यं सार्द्धहस्तमात्रे दुःखप्रदर्शनं कथयति॥
ण प्रश्ने प्रतीच्यां नरशल्यं पुरुषमात्रे धनापहरणं कथयति।
ह प्रश्ने वायव्यां द्विजशल्यं कटिमात्रे निर्धनं जनयति॥
स प्रश्ने उत्तरदिशि कटिमात्रे गोशल्यं गृहपतिमरणं कथयति।
य प्रश्ने चैशान्यां सार्द्धहस्तमात्रे ऋक्षशल्यं गोधननाशं जनयति॥
ज प्रश्ने मध्यभागे नरकपालं भस्मादिकं वा हृन्मात्रे कुलनाशं कथयति।
गृहे शल्याभावे शुभमिति वदेद् वास्तुकुशलः॥

अन्वयः - (अस्यां भूमौ शल्यमस्ति न वेति प्रश्नसमये वास्तुविद्) इष्टदेवतां स्मृत्वा (प्रश्नः कार्यः) तस्य वचनस्य आद्याक्षरं गृहीत्वा, ततः शल्याशल्यं तु सम्यग् विचार्यते।

प्रश्ने वः (वर्णस्तदा) पूर्वस्यां दिशि सार्द्धहस्तमात्रे मनुजशल्यं (भवेत्, तच्छल्यं) मनुजमरणं कथयति।

प्रश्ने कः (वर्णो भवेत्तदा) आग्नेयां कटिमात्रे खरशल्यं (स्यात्, तच्छल्यं) नृपदण्डं गोमरणं वा कथयति।

प्रश्ने चः (वर्णः स्यात्तदा) दक्षिणस्यां (दिशि) कटिमात्रे वानरशल्यं (भवेत्, तच्छल्यं) गृहाधीशस्य मृत्युं जनयति।

प्रश्ने तः वर्णस्तदा नैर्ऋत्यां सार्द्धहस्तमात्रे अश्वशल्यं (स्यात्, तच्छल्यं) दुःखप्रदर्शनं कथयति।

प्रश्ने णः (वर्णस्तदा) प्रतीच्यां पुरुषमात्रे नरशल्यं (भवेत्, तच्छल्यं) धनापहरणं कथयति।

प्रश्ने हः (वर्णो भवेत्तदा) वायव्यां कटिमात्रे द्विजशल्यं (स्यात्, तच्छल्यं) निर्धनं जनयति।

प्रश्ने सः (वर्णस्तदा) उत्तरदिशि कटिमात्रे गोशल्यं (भवेत् तच्छल्यं) गृहपतिमरणं कथयति।

प्रश्ने यः (वर्णस्तदा) ऐशान्यां सार्द्धहस्तमात्रे ऋक्षशल्यं (स्यात्, तच्छल्यं) गोधननाशं जनयति।

प्रश्ने जः (वर्णो भवेत्तदा) मध्यभागे हृन्मात्रे नरकपालं भस्मादिकं वा (भवेत्, तच्छल्यं) कुलनाशं कथयति।

वास्तुकुशलः शल्याभावे गृहे शुभमिति वदेत्।

प्रतिपदार्थः - निवासभूमौ शल्यमस्ति न वेति प्रश्नसमये प्रश्नकर्ता, इष्टदेवतां = स्वाभीष्टदेवतां स्मृत्वा = स्मरणं कृत्वा, प्रश्नः कर्तव्यः। वास्तुशास्त्राचार्यः प्रश्नकर्तुः वचनस्य = वाक्यस्य आद्याक्षरं = प्रथमाक्षरं , गृहीत्वा = ग्रहणं कृत्वा संगृह्य वा, ततः = तस्मात्, शल्याशल्यं = अस्थिप्रभृतिशल्यम् अस्ति न वेति, तु = अव्ययपदं, सम्यग् = सम्यग्रूपेण विचार्यते = विचारं कारयेत्।

प्रश्ने = प्रश्नसमये, यदि व = ववर्णो मुखात् निस्सृतं भवेत् तदा, पूर्वस्यां दिशि = पूर्वदिशि, सार्द्धहस्तमात्रे = सार्द्धहस्तपरिमिताधस्तले, मनुजशल्यं = नरशल्यं भवेत्। तच्छल्यं मनुजमरणं = नराणां निधनं, कथयति = वदति।

प्रश्ने = प्रश्नकाले, क = कवर्णो भवेत्तदा, आग्नेयां = दक्षिणपूर्वकोणे, कटिमात्रे = कटिपरिमिताधस्तले, खरशल्यं = गर्दभशल्यं स्यात्। तच्छल्यं नृपदण्डं = भूपभयं, गोमरणं = गोधनानां नाशं वा, कथयति = वदति।

प्रश्ने = प्रश्नसमये, च = चवर्णः स्यात्तदा, दक्षिणस्यां = दक्षिणदिशि, कटिमात्रे = कटिपरिमिताधस्तले, वानरशल्यं = कपिशल्यं भवेत्। तच्छल्यं गृहाधीशस्य = भवनस्वामिनः मृत्युं = मरणं, जनयति = कथयति।

प्रश्ने = प्रश्नकाले, त = तवर्णस्तदा, नैर्ऋत्यां = दक्षिणपश्चिमकोणे, सार्द्धहस्तमात्रे = सार्द्धमितादधस्तात्, अश्वशल्यं = अश्वस्य अस्थिरूपशल्यं भवेत्। तदस्थि दुःखप्रदर्शनं = दुःखप्रदायकं, कथयति = जनयति।

प्रश्ने = प्रश्नकाले, ण = णवर्णो भवेत्तदा प्रतीच्यां = पश्चिमस्यां दिशि, पुरुषमात्रे = सार्धहस्तत्रयपरिमितादधस्तले, नरशल्यं = मानवशल्यं स्यात्, तच्छल्यं धनापहरणं = धननाशं, कथयति = वदति।

प्रश्ने = प्रश्नसमये, ह = हवर्णसमुद्भवे, वायव्यां = उत्तरपश्चिमकोणे, कटिमात्रे = कटिपरिमितादधोभागे, द्विजशल्यं = विप्रादिद्विजातीनां शल्यं स्यात्। तदस्थि निर्धनं = धनहीनं जनयति = सूचयति।

प्रश्ने = प्रश्नसमये, स = सवर्णागमे सति, उत्तरदिशि = उत्तरस्यां दिशि, कटिमात्रे = कटिमिताधोभागस्थले, गोशल्यं = गवां शल्यं भवेत्। तच्छल्यं गृहपतिमरणं = भूस्वामिनः निधनं, जनयति = कथयति।

प्रश्ने = प्रश्नकाले, य = यवर्णो भवेत्तदा ऐशान्यां = पूर्वोत्तरकोणे, सार्द्धहस्तमात्रे = सार्द्धहस्तमितस्थले, ऋक्षशल्यं = भल्लूकस्यास्थि भवेत्। तदस्थि गोधननाशं = गोजातीयपशूनां विनाशं, जनयति = सूचयति।

प्रश्ने = प्रश्नसमये, ज = जवर्णः स्यात्तदा मध्यभागे = भूक्षेत्रस्य मध्यमस्थले, हृन्मात्रे = हृदयमितादधोभागे, नरकपालं = मनुष्यकपालं भस्मादिकं = भस्माद्यमंगलवस्तु वा भवेत्। तच्छल्यं, कुलनाशं = वंशनाशं, कथयति। वास्तुकुशलः = वास्तुकार्ये दक्षः, शल्याभावे = अस्थिप्रभृतिशल्यविहीनक्षेत्रे, गृहे = भवने, शुभमिति = मङ्गलमयं भवतीति, वदेत् = कथयेत्।

सरलार्थः – गृहकर्ता भवननिर्माणाय भूखण्डस्य चयनानन्तरं तस्मिन् स्थले शल्यमस्ति न वेति ज्ञातुं प्रश्नं कुर्यात्। वास्तुशास्त्राचार्यः स्वेष्टदेवस्य स्मरणं कृत्वा भूमेः शुभाशुभत्वज्ञानाय पुष्पादीनां नामोच्चारितस्य प्रथमं वर्णं स्वीकृत्य शल्याशल्यं विचारयेत्।

तत्रादौ शल्यान्वेषणसमये ब्राह्मणत्रयेण '' ॐ धरिणी विदारिणी भूत्यै स्वाहा रक्षामि'' इति मन्त्रस्य सहस्रत्रयवारं जपं कारयित्वा गृहकर्तृहस्ताद् भूमिं स्पृष्ट्वा गृहभूमिशुभाशुभज्ञानज प्रश्नं वदेत्। तत्रादौ ब्राह्मणाद्याः वर्णाः क्रमशः पुष्पनदीदेवफलमिति ब्रुवन्ति। यत्र पुष्पाद्यक्षरं भवति तत्र शल्यं वदेत् खननकाले नवधा भूमिं विभजेत्। यदि चेत् व क च त ण ह स य एवं ज एतान्यक्षराणि मुखादुद्गतानि तदा क्रमात् पूर्वादिदिक्षु शल्यमादिशेत्।

प्रश्नोच्चारणसमये प्रश्नकर्तुः मुखात् यदि ववर्णोच्चारितं भवेत्तदा वास्तुशास्त्राचार्यः अस्यां भूमौ पूर्वस्यां दिशि सार्द्धहस्तपरिमितादधस्स्थले नरशल्यमस्ति इति वदेत्। एवमत्र तच्छल्यकारणेन तस्मिन् स्थले निवासकर्तुः निधनं भवेदिति जानीयात्।

प्रश्नसमये प्रश्नकर्तुः मुखात् यदि कवर्णः उच्चारितोभवेत्तदा तस्यां भूमौ आग्नेयां दिशि कटिपरिमितादधोभागे गर्दभशल्यं भवेत्। तच्छल्यं गोधनविनाशं तथा नृपदण्डमपि करोति।

प्रश्नसमये प्रश्नकर्तुः मुखात् यदि चवर्णः निस्सरति तदा तस्याः भूमेः दक्षिणस्यां दिशि कटिमिताधोभागे वानरशल्यं भवेत्। तच्छल्यं तस्मिन् स्थाने गृहस्वामिनः मरणं करोति।

प्रश्नसमये गृहनिर्माणकर्तुः मुखात् यदि तवर्णः उच्चारितो भवेत्तदा भूखण्डस्य नैर्ऋत्यभागे सार्द्धहस्तपरिमिताधोभागे अश्वशल्यं भवति। तदस्थि तत्र वासकर्तुः मनसि सर्वदा भयम् उत्पादयति।

प्रश्नकाले भूस्वामिनः मुखात् यदि णवर्णोच्चारितं भवेत्तदा भूमेः पश्चिमस्यां दिशि एकपुरुषप्रमाणमधोभागे नरशल्यं भवति। तच्छल्यं निर्माणकर्तुः धनविनाशं करोति।

प्रश्नसमये कर्तुः मुखात् यदि हवर्णः निस्सरति तदा भूखण्डस्य वायव्यकोणे कटिमिताधोभागे विप्रशल्यं स्यात्। तच्छल्यं धननाशं करोति।

प्रश्नसमये भवननिर्माणकर्तुः मुखात् यदि सः वर्णः समुत्पद्यते तदा भूखण्डस्य उत्तरदिशि कटिप्रमाणे गोशल्यं स्यात्। तदस्थि गृहपतेः मरणाय भवति।

प्रश्नसमये भूपतेः मुखात् यदि यः वर्णोत्त्पतिः भवेत्तदा भूमेः ऐशान्यकोणे सार्द्धहस्तपरिमितादधोभागे भल्लूकस्यास्थि भवतीति ज्ञातव्यम्। तदस्थि गोजातीयपशूनां नाशं करोति।

प्रश्नकाले प्रश्नकर्तुः मुखात् यदि जवर्णोच्चारितं स्यात्तदा भूखण्डस्य मध्यभागे हृत्परिमितादधस्तले नरकपालं भस्मादिकं च भवेत्। तच्छल्यं भूस्वामिनः वंशनाशस्य कारणं भवेदिति। गृहे शल्याभावे शुभमिति कथनीयम्।

अनेन प्रकारेण भवननिर्माणकर्ता भूमेः कति परिमितादधोभागे कस्य शल्यमस्ति? इति सम्यग्रूपेण निरीक्ष्य तदनन्तरं तत्क्षेत्रं संशोध्य च शल्याभावभूमौ गृहनिर्माणकार्यं कुर्यात्।

५.६.२ वास्तुराजवल्लभे शल्यानयनप्रकारः

प्रश्नत्रयं वापि गृहाधिपेन
देवस्य वृक्षस्य फलस्य चापि।
वाच्यं हि कोष्ठाक्षरसंस्थितेन
शल्यं विलोक्यं भवनेषु सृष्ट्या॥१६७॥
आ का चा टा ए त शा पा य वर्गाः
प्राच्यादिस्थे कोष्ठके शल्यमुक्तम्।
केशाङ्गाराः काष्ठलौहास्थिकाद्यं
तस्मात्कार्यं शोधनं भूमिकायाः॥१६८॥

अन्वयः - वापि गृहाधिपेन देवस्य वृक्षस्य फलस्य च सृष्ट्या कोष्ठाक्षरसंस्थितेन प्रश्नत्रयं हि विलोक्य भवनेषु शल्यं वाच्यम्। प्राच्यादिस्थे कोष्ठके आ का चा टा ए त शा पा य वर्गाः केश-अंगाराः काष्ठ-लौह- अस्थिकाद्यं शल्यम् उक्तम्। तस्मात् भूमिकायाः शोधनं कार्यम्।

प्रतिपदार्थः - वापि = अथवा अन्यप्रकारेण अपि, गृहाधिपेन = वास्तुस्वामिना, देवस्य = विष्णवादिदेवस्य, वृक्षस्य = निम्बादिवृक्षस्य, फलस्य = आम्रादिफलस्य नामानि उच्चारिते सति नाम्नः आद्याक्षरस्य, चापि, सृष्ट्या कोष्ठाक्षरसंस्थितेन = निर्मितकोष्ठानुसारेण, प्रश्नत्रयं = देवादित्रयः प्रश्नाः तान् , विलोक्य = दृष्ट्वा, भवनेषु = गृहेषु, शल्यं = अस्थिप्रभृतिशल्यं , वाच्यं = वक्तव्यम्। कस्मिन् भागे शल्यमस्तीति कथयेत्।

आ-का-चा-टा-ए-त-शा-पा-य- वर्गाः प्राच्यादिस्थे = कोष्ठके पूवादिदिक्षु संस्थिते शल्यम् = अस्थिप्रभृतिशल्यं, उक्तं = कथनीयमिति भावः। प्रश्नस्य आद्याक्षरं यस्मिन्, कोष्ठके = प्रकोष्ठे भवेत्, तस्मिन् स्थाने केशाङ्गाराः = केशाः अङ्गाराश्च, काष्ठलौहास्थिकाद्यं = दारु-लौह-अस्थिप्रभृतिशल्यादिकं स्यात्। तस्मात् = ततः शल्यादिवस्तुस्थितेषु सति गृहनिर्माणादिकार्यं न करणीयम्। अतः भूमिकायाः = भूमेः, शोधनं = संशोधनं, कार्यं = करणीयम्।

सरलार्थः - वास्तुशास्त्रस्याचार्यः नवधाविभक्तभूमौ वक्ष्यमाणविधिना कोष्ठकेषु अक्षरविन्यासं कृत्वा प्रश्नकर्तुं क्रमात् कस्यापि देवस्य, वृक्षस्य, फलस्य च नाम वक्तुं कथयति। अनन्तरं भूस्वामिनः मुखात् यच्छब्दं निर्गच्छति तस्याद्यक्षरं गृहीत्वा तच्छब्दः यस्मिन् प्रकोष्ठे वर्तते तस्यानुसारेण भूमौ तस्यां दिशि शल्याशल्यं विचार्यं फलाफलं विवेचयति। यदि प्रश्नकर्तुः मुखात् अवर्गस्य अर्थात् अ, इ, उ, ऋ, लृ वर्णेषु कस्यापि आद्यक्षरयुक्तशब्दोत्पतिः भवेत्तदा पूर्वस्यां दिशि शल्यमस्ति इति वाच्यम्। यदि उच्चारणसमये प्रश्नकर्तुः मुखात् क, ख, ग, घ, ङ इति कवर्गोच्चारितं स्यात् तदा अग्निकोणे शल्यं भवतीति वक्तव्यं एवमत्र कर्तुः मुखात् च, छ, ज, झ, ञ इतिचवर्गस्तदा दक्षिणदिशि शल्यं भवेत्। यदि भूस्वामिनः मुखात् ट, ठ, ड, ढ, ण इति टवर्गो भवेत्तदा नैर्ऋत्यां दिशि अस्थि स्यात्। यदि गृहनिर्माणकर्तुः मुखात् ए, ऐ, ओ, औ उच्चारितं भवेत्तदा पश्चिमदिशि

शल्यमस्तीति ज्ञातव्यम्। यदि गृहस्वामिनः मुखात् त, थ, द, ध, न इति तवर्गः स्यात्तदा वायव्यकोणे शल्यं विजानीयात्। यदि प्रश्नकरणसमये कर्तुः मुखात् श, ष, स, ह वर्णाः स्युः तदा उत्तरदिशि शल्यं वदेत्। यदि प्रश्नकाले भूस्वामिनः मुखात् प, फ, ब, भ, म इति पवर्गो भवेत्तदा ऐशान्यकोणे शल्यं भवेदिति जानीयात्। प्रश्नसमये प्रश्नकर्तुः मुखात् यदि य, र, ल, व इति यवर्णः स्यात्तदा मध्यभागे शल्यं भवतीति वक्तव्यम्। एवमत्र शल्यं ज्ञात्वा भूमिं संशोध्य तस्मात्परं तत्र शोधितायां भूमौ गृहारम्भकार्यं कारयेत्।

चक्रम्

ईशानकोणः प फ ब भ म	पूर्वदिक् अ इ उ ऋ लृ	अग्निकोणः क ख ग घ ङ
उत्तरदिक् श ष स ह	मध्यभागः य र ल व	दक्षिणदिक् च छ ज झ ञ
वायव्यकोणः त थ द ध न	पश्चिमदिक् ए ऐ ओ औ	नैर्ऋत्यकोणः ट ठ ड ढ ण

५.६.३ प्राप्तशल्यफलम्

शल्ये गवां भूपभयं हयानां रुजः शुनां वै कलहप्रणाशौ।
खरोष्ट्रयोर्हानिरपत्यनाशं नृणामजस्याग्निभयं तनोति॥१६९॥

अन्वयः - गवां शल्ये भूपभयं, हयानां रुजः, शुनां कलहप्रणाशौ वै, खरोष्ट्रयोः हानिम्, नृणाम् अपत्यनाशम्, अजस्य अग्निभयं तनोति।

प्रतिपदार्थः - गवां = धेनूनां, शल्ये = अस्थिप्रभृतिशल्ये, भूपभयं = नृपतिभयं, हयानाम् = अश्वानां शल्ये, रुजः = रोगः, शुनां = शुनकानां कुक्कुराणां वा शल्ये, कलहप्रणाशौ = कलिः नाशश्चैव, खर-उष्ट्रयोः = गर्दभस्य उष्ट्रस्य च शल्ये, हानिम् = क्षयम्, नृणां = मनुष्याणां शल्ये, अपत्यनाशं = सन्ततिनाशम्, अजस्य = मेषस्य शल्ये प्राप्ते, अग्निभयं = वह्निभयं तनोति = समुत्पद्यते इति भावः।

सरलार्थः - यदि खनने भूमौ गोशल्यस्य प्राप्तिः भवेत्तदा तच्छल्यं तत्र नृपभयं करोति। यदि भूगर्भे अश्वशल्यस्य प्राप्तिः भवेत्तदा रोगभयं स्यात्। यदि तस्मिन् क्षेत्रे कुक्कुरस्य शल्यं मिलति तदा तस्मिन् स्थाने निवासिनां मध्ये परस्परं कलहो भवति अपि च विनाशः स्यात्। यदि तस्मिन् स्थले गर्दभस्य उष्ट्रस्य च शल्यं स्यात्तदा तच्छल्यं धनहानिं सन्ताननाशं च करोति। यदि भूक्षेत्रस्य अधःस्थले अजस्य शल्यं भवेत्तदा तच्छल्यं तत्र अग्निभयं जनयति।

बोधप्रश्नाः

११. कानि अमाङ्गल्यानि वस्तूनि शल्यानि भवन्ति?

१२. शल्ययुक्तगृहे निवासेन का हानिः भवेत्?

१३. भूमेः शल्याशल्यविचारः कदा क्रियते?

१४. कस्य शल्यस्य दर्शनेन अपत्यनाशं भवति?

१५. प्रश्नकर्तुः मुखात् यदि ववर्णोच्चारितं भवेत्तदा कस्यां दिशि शल्यं स्यात्?

५.७ ज्योतिर्निबन्धे शल्यानयनप्रकारः

भूगर्भात् अस्थिप्रभृतिशल्यं निष्कास्य तदनन्तरं भूखण्डस्योपरि निर्माणकार्यं करणीयमिति शास्त्रकाराणां मतम्। अतः नैकविधशल्यानयनप्रविधयः मानकग्रन्थेषु लभ्यन्ते। अत्र वयं ज्योतिर्निबन्धोक्तविधिं पठिष्यामः

अ-क-च-ट-त-व-य-श-हपया-वर्णाः पूर्वादिमध्यान्ताः।
शल्यकरा इह नान्ये शल्यगृहे निवसतां नाशः॥१७०॥
पृच्छायां यदि अः प्राच्यां नरशल्यं तदा भवेत्।
सार्धहस्तप्रमाणेन तच्च मानुषमृत्युकृत्॥१७१॥
आग्नेय्यां दिशि कः प्रश्ने खरशल्यं करद्वये।
राजदण्डो भवेत्तत्र भयं नैव निवर्तते॥१७२॥
याम्यायां दिशि चः प्रश्ने कुर्यादाकटिसंस्थितम्।
नरशल्यं गृहेशस्य मरणं चिररोगतः॥१७३॥
नैर्ऋत्यां दिशि टः प्रश्ने सार्धहस्तादधस्तले।
शुनोऽस्थि जायते तच्च बालानां जनयेन्मृतिम्॥१७४॥
तः प्रश्ने पश्चिमायान्तु शिशोः शल्यं प्रजायते।
सार्धहस्ते गृहस्वामी न तिष्ठति सदा गृहे॥१७५॥
वायव्यां दिशि पः प्रश्ने तुषाङ्गाराश्चतुष्करे।
कुर्वन्ति मित्रनाशं च दुःस्वप्नं दर्शनं सदा॥१७६॥
उदीच्यां दिशि यः प्रश्ने विप्रशल्यं कटेरधः।
तच्छीघ्रं निर्धनत्वाय कुबेरसदृशस्य हि॥१७७॥
ऐशान्यां दिशि शः प्रश्ने गोशल्यं सार्धहस्ततः।
तद्गोधनस्य नाशाय जायते गृहमेधिनः॥१७८॥
हपया मध्यमे कोष्ठे वक्षो मात्रे भवेदधः।
नृकपालं कचं भस्मं लोहं तत्कुलनाशकृत्॥१७९॥

अन्वयः - अ क च ट त प य श हपया वर्णाः पूर्वादिमध्यान्ताः (स्थाप्याः) इह (वर्णाः) शल्यकरा (भवन्ति) अन्ये न, शल्यगृहे निवसतां (प्राणिनां) नाशः (भवेत्)।

यदि (प्रश्ने) पृच्छायां अः (वर्णो) भवेत् तदा प्राच्यां सार्द्धहस्तप्रमाणेन नरशल्यं (स्यात्) तच्च मानुषमृत्युकृद् (भवेत्)।

(यदि) प्रश्ने कः (वर्णो) भवेत् तदा आग्नेय्यां दिशि करद्वये खरशल्यं (भवेत्) तत्र (निवासे) राजदण्डः (स्यात् एवमत्र) भयं नैवं निवर्तते।

प्रश्ने चः (वर्णः स्यात्तदा) याम्यायां दिशि आकटिसंस्थितं नरशल्यं भवेत्। (तच्छल्यं) चिररोगतः गृहेशस्य मरणं कुर्यात्।

प्रश्ने टः (वर्णो भवेत्तदा) नैर्ऋत्यां दिशि सार्धहस्तादधस्तले शुनास्थि जायते। तच्च बालानां मृतिं जनयेत्।

प्रश्ने तः (वर्णः स्यात्तदा) पश्चिमायां तु सार्धहस्ते शिशोः शल्यं प्रजायते। तत्र वासे गृहस्वामी सदा गृहे न तिष्ठति।

प्रश्ने प: (वर्णस्तदा) वायव्यां दिशि चतुष्करे तुषाङ्गारा: (भवन्ति) (ते) सदा मित्रनाशं दु:स्वप्नं दर्शनं च कुर्वन्ति।

प्रश्ने य: (वर्णस्तदा) उदीच्यां दिशि कटेरध: विप्रशल्यं (भवेत्)। तत् शीघ्रं कुबेर सदृशस्य हि निर्धनत्वाय (स्यात्)।

प्रश्ने श: (भवेत्तदा) ऐशान्यां दिशि सार्धहस्तत: गोशल्यं (भवेत् तत्) गृहमेधिन: गोधनस्य नाशाय जायते।

(यदि) प्रश्ने हपया (वर्णा: स्यु: तर्हि) मध्यमे कोष्ठे वक्षोमात्रे अध: नृकपालं कचं भस्मं लोहं च (स्यात्) तत् कुलनाशकृत् भवेत्।

प्रतिपदार्थ: - प्रश्नकर्तु: मुखात् यदि अ क च ट त प य श हपया वर्णा: = वर्णानां मध्ये कश्चिदपि वर्ण: निर्गतो भवेत्तदा तद्वर्णवशात् तत्र शल्याशल्यं विचार्यते।

पूर्वादिमध्यान्ता: = पूर्वाद्यष्टदिक्पूर्वकं मध्यस्थानं यावत्, स्थापयेत्। इह = एते वर्णा:, शल्यकरा = शल्यप्रदायका: भवन्ति। अन्ये = अन्यवर्णा: स्यु: तदा शल्यकरा न भवन्ति। शल्यगृहे = अस्थिप्रभृतिशल्ययुक्तभवने, निवसता = निवासकारणात्, प्राणिनां नाश: = विनाश: मरणं वा भवेत्।

यदि प्रश्ने = प्रश्नकरणसमये, पृच्छायां = प्रश्नकर्तरि मुखात् प्रथमाक्षरम्, अ: = अवर्णो भवेत्तदा, प्राच्यां = पूर्वदिशि, सार्द्धहस्तप्रमाणेन = सार्द्धहस्तपरिमितादधस्तले, नरशल्यं = मनुष्यशल्यं स्यात्। तच्च = तच्छल्यं मानुषमृत्युकृत् = मनुष्यस्य मरणकारणं भवेत्।

प्रश्ने = प्रश्नकाले पृच्छकमुखात्, क: = कवर्णो भवेत्, आग्नेयां दिशि = पूर्वदक्षिणकोणे, करद्वये = हस्तद्वयमितादधोभागे खरशल्यं = गर्दभशल्यं स्यात्। तत्र = तस्मिन् स्थाने निवासे सति निवासकर्तु: राजदण्ड: = नृपदण्ड: भवेत्। तद्भयं = तत्र भीति: न = नहि निवर्तते = न गच्छति सदैव तिष्ठति इति भाव:।

प्रश्ने = प्रश्नसमये पृच्छकमुखात्, च: = चवर्णो निस्सृतो भवेत्तदा याम्यायां दिशि = दक्षिणदिशि, आकटिसंस्थितं = कटिपरिमितादधस्तले, नरशल्यं = मनुष्यशल्यं स्यात्। तच्छल्यं चिररोगत: = दीर्घकालिकरोगात्, गृहेशस्य = भवनस्वामिन:, मरणं = मृत्यु: कुर्यात् = कारयेत्।

प्रश्ने = प्रश्नोत्पत्तिकाले, ट: = टवर्ण: स्यातदा नैर्ऋत्यां दिशि = दक्षिणपश्चिमकोणे सार्द्धहस्तादधस्तले = सार्द्धकरपरिमिताधो भागे, शुनास्थि = कुक्कुरस्य अस्थिशल्यं, जायते = विजायते तच्च = तच्छल्यं बालानां = शिशूनां मृतिं = मरणं जनयेत् = कारयेत्।

प्रश्ने = प्रश्नसमये, त: = तवर्णस्तदा पश्चिमां = पश्चिमस्यां दिशि, तु = निश्चयात्मक: अव्ययपदं, सार्धहस्ते = सार्धमितकरे, शिशो: = बालानां, शल्यं = अस्थिशल्यं प्रजायते = भवति, तत्र वासे, गृहस्वामी = भवनस्वामी, सदा = सर्वदा, गृहे = भवने, न = नहि तिष्ठति = निवासं करोति सर्वदा प्रवासे स्यादिति भाव:।

प्रश्ने = प्रश्नोच्चारणसमये, प: = पवर्णस्तदा, वायव्यां दिशि = उत्तरपश्चिमकोणे चतुष्करे = चतुर्हस्तपरिमितादधस्तले, तुषाङ्गारा: = धान्यावरणरूपतुष-दग्धकाष्ठावशेषरूपाङ्गाराश्च भवन्ति। ते सदा = सर्वदा, मित्रनाशं = सुहृद्नाशं, निवासकर्तु:, दु:स्वप्नं दर्शनं च कुर्वन्ति।

प्रश्ने = प्रश्नसमये, य: = यवर्णो भवेत्तदा उदीच्यां दिशि = उत्तरदिशि, कटेरध: = कटिपरिमितादधस्तले विप्रशल्यं = ब्राह्मणस्य अस्थि भवेत्। तत् = तच्छल्यं, शीघ्रं =

त्वरितमेव, कुबेरसदृशस्य = कुबेरसमानधनिकपुरुषस्य अपि, हि = निचयात्मकः अव्ययपद, निर्धनत्वाय = दारिद्रयाय भवति।

प्रश्ने = प्रश्नकरणसमये, शः शवर्णस्तदा, ऐशान्यां दिशि = उत्तरपूर्वकोणे सार्धहस्ततः = सार्धहस्तादधस्तले, गोशल्यं = गवां शल्यं भवेत्। तत् = तच्छल्यं, गृहमेधिनः = भवनस्वामिनः, गोधनस्य = धेनुप्रभृतिपशुधनस्य, नाशाय = विनाशाय जायते।

प्रश्ने = प्रश्नकाले, हपया = ह प या वर्णाः उच्चारिताः भवेयुः, तदा मध्यमे कोष्ठे = भूखण्डस्य मध्यमस्थले, वक्षोमात्रेऽधः नीचे = वक्षपरिमितादधोभाग, नृ कपालं = मनुष्यस्य शिरः, खर्परं, कचं = केशादिकं, भस्म, लौहं = लोहादिवस्तु च भवेत्। तत् = तच्छल्यं, कुलनाशकृत् = कुलविनाशं करोति।

सरलार्थः – वर्णानां कोष्ठकसंस्थापने सर्वदा पूर्वादारभ्य क्रमशः अ क च ट त प य श इत्यष्टवर्णाः अष्टदिक्षु स्थापयेत्। मध्यमकोष्ठे हपया वर्णाः स्थातव्याः। भूमौ शल्याशल्यस्य विचारणे ध्यातव्याः यत् एते उपर्युक्तवर्णाः एव शल्यकराः भवन्ति, अन्ये न स्युः। शल्यगृहे निवासेन निवासकर्तुः धनहानिः मनस्तापः रोगः विनाशश्च भवति। अतः गृहारम्भादिकार्यारम्भात् पूर्वं शल्यनिष्कासनं करणीयम्। प्रश्नकर्ता देवपुष्पादिनामोच्चारणपूर्वकं प्रश्नं कुर्यात्।

प्रश्नकरणसमये प्रश्नकर्तुः मुखात् यद्ववर्ण उच्चारितो भवेत् तदनुसारेण आचार्यः तस्मिन् स्थले कति परिमितादधोभागे? कस्यां दिशि? कस्य शल्यमस्ति? इत्यस्मिन् विषये प्रतिपादयति।

प्रश्नकरणकाले यदि अवर्णः पृच्छकस्य मुखान्निस्सरति तर्हि पूर्वदिशि सार्द्धहस्तपरिमितादधस्तले मनुष्यस्य अस्थि स्यात्। तदस्थि नराणां मृत्युप्रदायको भवेत्।

एवमेव प्रश्नसमुद्भवकाले गृहनिर्माणकर्तुः मुखात् यदि कवर्णः आगच्छति तदा पूर्वदक्षिणकोणे करद्वयपरिमितादधोभागे गर्दभशल्यं स्यात्। तच्छल्यकारणेन तस्मिन् स्थाने ये निवसन्ति तेषां मनसि भयं जायते।

प्रश्नोत्पत्तिसमये प्रश्नकर्तुः मुखात् यदि चवर्णोच्चारितं भवेत्तर्हि दक्षिणदिशि कटिपरिमिताद- धस्तले नरशल्यं भवेत्। तच्छल्यं गृहेशस्य चिररोगवशात् मरणं करोति।

प्रश्नसमये गृहपतेः मुखात् यदि टवर्णस्तदा दक्षिणपश्चिमकोणे सार्द्धहस्तादधस्तले कुक्कुरस्य अस्थि भवेत् तदा गृहेशस्य शिशुनाशो भवेत्।

प्रश्नोच्चारणकाले भूस्वामिनः मुखात् यदि तवर्णस्तदा पश्चिमदिशि शिशोः शल्यं भवेत्। तच्छल्ये सति गृहपतिः सर्वदा गृहे न तिष्ठति। प्रश्नकाले गृहस्वामिनः मुखात् यदि पवर्णः उच्चारितो भवेत् तर्हि पश्चिमोत्तरकोणे सार्द्धपरिमितादधो भागे तुषांगारादयः स्युः , ते मित्रनाशं दुःस्वप्नदर्शनञ्च कुर्वन्ति।

प्रश्नकरणसमये प्रश्नकर्तुः मुखात् यदि यवर्णः स्यात्तदा उत्तरस्यां दिशि कटेरधोभागे विप्रशल्यं भवेत् तच्छल्यं कुबेरसदृशस्य धनयुक्तमनुष्यस्यापि शीघ्रं धनापहरणं करोति।

प्रश्नकरणकाले कर्तुः मुखात् यदि शवर्णः उच्चारितो भवेत्तदा ऐशान्यां दिशि सार्धमितादधस्तले गोशल्यं स्यात्। तच्छल्यं गृहपतेः गोधनं विनाशयति।

प्रश्नोद्भवसमये प्रश्नकर्तुः मुखात् यदि हपया एते वर्णाः उच्चारिताः भवन्ति तर्हि तस्य क्षेत्रस्य मध्यमस्थले हृत्परिमितादधोभागे नरकपालं केशभस्मलोहादिकञ्च स्युः। तच्छल्यं गृहेशस्य कुलं नाशयति।

बोधप्रश्नाः

१७. पूर्वादिमध्यान्ताः के वर्णाः शल्यकराः भवन्ति?

१८. प्रश्नकरणसमये यदि कर्तुः मुखात् टः वर्णः उच्चारितो भवेत् तदा भूमौ कुत्र शल्यं स्यात्?

१९. यदि चतुष्करे तुषाङ्गारादयः सन्ति तर्हि ते किं फलं प्रदास्यन्ति?

२०. केषां अस्थीनि कुलं नाशयन्ति?

ग्रन्थस्य मूलपाठः

पूर्वस्यां श्रीगृहं प्रोक्तमाग्नेय्यां स्यान्महानसम्॥१५०॥
शयनं दक्षिणस्यां च नैर्ऋत्यामायुधाश्रयम्।
भोजनं पश्चिमायां च वायव्यां धनसंचयम्॥१५१॥
उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम्।
इन्द्राग्न्योर्मथनं मध्ये यमाग्न्योर्घृतमन्दिरम्॥१५२॥
यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरम्।
राक्षसजलयोर्मध्ये विद्याभ्यासस्य मन्दिरम्॥१५३॥
तोयेशानिलयोर्मध्ये रोदनस्य च मन्दिरम्।
कामोपभोगशमनं वायव्योत्तरयोर्गृहम्॥१५४॥
कौवेरेशानयोर्मध्ये चिकित्सामन्दिरं सदा।
पुरन्दरेशयोर्मध्ये सर्ववस्तुषु संग्रहम्॥१५५॥
सदनं कारयेदेवं क्रमादुक्तानि षोडश।
नैर्ऋत्यां सूतिकागेहं नृपाणां भूतिमिच्छताम्॥१५६॥
आसन्नप्रसवे मासि कुर्याच्चैव विशेषतः।
तद्वत् प्रसवकाले स्यादिति शास्त्रेषु निश्चयः॥१५७॥
मासे तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने।
प्रसूतिसंभवे काले गृहारम्भणमिष्यते॥१५८॥
विप्रस्य दर्भजं सूत्रं मौञ्जन्तु क्षत्रियस्य च।
कार्पासं च भवेद्वैश्ये शूद्रस्य स्वर्णकल्पितम्॥१५९॥
अथापरमपि ज्ञानङ्कथयामि समासतः।
षड्गुणीकृतसूत्रेण शोधयेद्धरणीतले॥१६०॥
सुधृते समये तस्मिन्सूत्रङ्केनापि लङ्घितम्।
तदस्थि तत्र जानीयात्पुरुषस्य प्रमाणतः॥१६१॥
अभ्यक्तो दृश्यते यस्यां दिशि शल्यं समादिशेत्।
तस्मामेव तदस्थीनि सप्तत्यङ्गुलमानतः॥१६२॥
सूत्रिते समये यत्र श्वा सूत्रोपरि संस्थितः।
तदास्थि तत्र जानीयात् षष्ठ्यङ्गुलमितक्षितौ॥१६३॥
उन्मादे चागते तस्मिन् समये यत्र संस्थितः।
तदास्थि तत्र जानीयाद्धस्तद्वयमितक्षितौ॥१६४॥
सूत्रे विसूत्रिते तस्मिन् भिन्ने कुम्भेऽथवा यदि।
आदिशेन्निधनं तत्र दम्पत्योः क्रमशस्तदा॥१६५॥
स्मृत्वेष्टदेवता प्रश्नवचनस्याद्यमक्षरम्।

गृहीत्वा तु ततः शल्याशल्यं सम्यग्विचार्यते॥१६६॥
व प्रश्ने पूर्वस्यां दिशि मनुजशल्यं सार्द्धहस्तमात्रे मनुजमरणं कथयति।
क प्रश्ने आग्नेयां खरशल्यं कटिमात्रे नृपदण्डं वा गोमरणं कथयति॥
च प्रश्ने दक्षिणस्यां वानरशल्यं कटिमात्रे गृहाधीशस्य मृत्युं जनयति।
त प्रश्ने नैर्ऋत्यामश्वशल्यं सार्द्धहस्तमात्रे दुःखप्रदर्शनं कथयति॥
ण प्रश्ने प्रतीच्यां नरशल्यं पुरुषमात्रे धनापहरणं कथयति।
ह प्रश्ने वायव्यां द्विजशल्यं कटिमात्रे निर्धनं जनयति॥
स प्रश्ने उत्तरदिशि कटिमात्रे गोशल्यं गृहपतिमरणं कथयति।
य प्रश्ने चैशान्यां सार्द्धहस्तमात्रे ऋक्षशल्यं गोधननाशं जनयति॥
ज प्रश्ने मध्यभागे नरकपालं भस्मादिकं वा हृन्मात्रे कुलनाशं कथयति।
गृहे शल्याभावे शुभमिति वदेद् वास्तुकुशलः॥
प्रश्नत्रयं वापि गृहाधिपेन देवस्य वृक्षस्य फलस्य चापि।
वाच्यं हि कोष्ठाक्षरसंस्थितेन शल्यं विलोक्यं भवनेषु सृष्टया॥१६७॥
आ का चा टा ए त शा पा य वर्गः प्राच्यादिस्थे कोष्ठके शल्यमुक्तम्।
केशाङ्गाराः काष्ठलौहास्थिकाद्यं तस्मात्कार्यं शोधनं भूमिकायाः॥१६८॥
शल्ये गवां भूपभयं हयानां रुजः शुनां वै कलहप्रणाशौ।
खरोष्ट्रयोर्हानिरपत्यनाशं नृणामजस्याग्निभयं तनोति॥१६९॥
अ क च ट त व य श हपया वर्णाः पूर्वादिमध्यान्ताः।
शल्यकरा इह नान्ये शल्यगृहे निवसतां नाशः॥१७०॥
पृच्छायां यदि अः प्राच्यां नरशल्यं तदा भवेत्।
सार्धहस्तप्रमाणेन तच्च मानुषमृत्युकृत्॥१७१॥
आग्नेय्यां दिशि कः प्रश्ने खरशल्यं करद्वये।
राजदण्डो भवेत्तत्र भयं नैव निवर्तते॥१७२॥
याम्यायां दिशि चः प्रश्ने कुर्यादाकटिसंस्थितम्।
नरशल्यं गृहेशस्य मरणं चिररोगतः॥१७३॥
नैर्ऋत्यां दिशि टः प्रश्ने सार्धहस्तादधस्तले।
शुनोऽस्थि जायते तच्च बालानां जनयेन्मृतिम्॥१७४॥
तः प्रश्ने पश्चिमायान्तु शिशोः शल्यं प्रजायते।
सार्धहस्ते गृहस्वामी न तिष्ठति सदा गृहे॥१७५॥
वायव्यां दिशि पः प्रश्ने तुषाङ्गारचतुष्करे।
कुर्वन्ति मित्रनाशं च दुःस्वप्नं दर्शनं सदा॥१७६॥
उदीच्यां दिशि यः प्रश्ने विप्रशल्यं कटेरधः।
तच्छीघ्रं निर्धनत्वाय कुबेरसदृशस्य हि॥१७७॥
ऐशान्यां दिशि शः प्रश्ने गोशल्यं सार्धहस्ततः।
तद्गोधनस्य नाशाय जायते गृहमेधिनः॥१७८॥
हपया मध्यमे कोष्ठे वक्षोमात्रे भवेदधः।
नृकपालं कचां भस्मं लोहं तत्कुलनाशकृत्॥१७९॥

५.८ सारांशः

प्रियच्छात्र! भवान् अस्मिन् पञ्चमे पाठे षोडशगृहाणां निर्माणप्रसङ्गे पूर्वदिगारभ्य अष्टदिक्षु कस्यां दिशि? कस्य गृहस्य निर्माणं करणीयम् इत्यस्मिन् विषये सम्यग्रूपेण पठितवान्। अनन्तरं सूतिकागृहस्य आवश्यकता तथा तस्य निर्माणं भूखण्डस्य कस्यां दिशि

भवेदित्यपि ज्ञातवान्। भूमिपरिमापनाय सर्वेषां वर्णानां सूत्रं भिन्न-भिन्नं भवतीत्यपि पठितवान्। अनन्तरं सूत्रकरणसमये यदि तस्य सूत्रस्योपरि कोऽपि प्राणी समागत्य तिष्ठति अथवा तत्सूत्रम् उलङ्घयति। तदा तस्मिन् स्थले कति परिमितादधोभागे शल्यमस्ति? इति ज्ञातुं भवान् सक्षमो जातः। तदनन्तरं विभिन्नशास्त्रदृष्ट्या शल्यनिष्कासनविधिः पृच्छकस्य कृते कर्तव्यविचारः एवमत्र प्रश्नकर्तुः मुखात् यद्वर्णोच्चारितं भवति तद्वर्णाधारेण कस्यां दिशि? कति परिमितादधस्थले? कस्य अस्थि भवेदिति समीचीनरूपेण अधीतवान्। मन्ये अस्य पाठस्य अध्ययनेन भवान् शल्यनिष्कासने सक्षमो जातः।

५.९ शब्दावली

१.	श्रीगृहम्	=	लक्ष्मीगृहम्, धनस्थापनस्य गृहम्
२.	महानसम्	=	पाकसदनम्
३.	आयुधाश्रयम्	=	शस्त्रस्थापनगृहम्
४.	द्रव्यसंस्थानम्	=	स्वर्णाद्याभूषणस्थापनगृहम्
५.	पुरीषत्यागमन्दिरम्	=	शौचालयम्
६.	विद्याभ्यासस्य गृहम्	=	अध्ययनस्य कक्षम्
७.	कामोपभोगशमनम्	=	रतिसम्भोगगृहम्
८.	राक्षसः	=	नैर्ऋत्यकोणाधिपः
९.	चिकित्सामन्दिरम्	=	औषधस्थापनगृहम्
१०.	पुरन्दरः	=	इन्द्रः, पूर्वदिक्
११.	सूतिकागेहं	=	प्रसवसदनम्
१२.	भूतिमिच्छताम्	=	ऐश्वर्यमिच्छताम्
१३.	दर्भजं सूत्रं	=	कुशनिर्मितं सूत्रम्
१४.	मौञ्जं सूत्रं	=	शरयुक्तं सूत्रम्
१५.	लङ्घितम्	=	उल्लङ्घितम्
१६.	अभ्यक्तो	=	अस्पष्टः, स्फाटितः
१७.	श्वा	=	कुक्कुरः
१८.	उन्मादेः	=	उन्मादमनुष्यस्य
१९.	विसूत्रिते	=	खण्डिते, भंगे
२०.	आदिशेत्	=	निर्दिशेत्
२१.	दम्पत्योः	=	पतिपत्न्योः
२२.	स्मृत्वा	=	स्मरणं कृत्वा
२३.	खरशल्यं	=	गर्दभशल्यम्
२४.	हृन्मात्रे	=	हृदयपरिमितादधोभागे

२५. कुलनाशम् = वंशनाशम्

२६. वाच्यम् = उक्तम्

२७. विलोक्यम् = अवलोक्यम्

२८. सृष्टया = निर्माणं कार्यम्

२९. आद्यम् = प्रथमम्

३०. अजः = मेषः

३१. शुनाम् = कुक्कुराणाम्

३२. रुजः = रोगः

३३. हयः = अश्वः

३४. अपत्यनाशम् = सन्ताननाशम्

३५. याम्यः = दक्षिणः

५.१० सन्दर्भग्रन्थः

१. **बृहद्वास्तुमाला - पण्डित श्री रामनिहोर द्विवेदी,**
चौखम्बा सुरभारती प्रकाशन, संस्करण-२०१२।

५.११ सहायकग्रन्थाः

१. **बृहत्संहिता - श्री वराहमिहिराचार्यकृत**
प्रकाशकः - चौखम्बा विद्याभवन, वाराणसी।

२. **वास्तुरत्नावली - पण्डित श्री जीवनाथदैवज्ञ विरचिता,**
चौखम्बा अमरभारती प्रकाशन तृतीय संस्करण १९८१।

३. **मुहूर्त्तचिन्तामणि - पण्डित श्री रामदैवज्ञ विरचित,**
तेजकुमार बुक डिपो (प्रा०) लिमिटेड लखनऊ, दशवाँ संस्करण, २००४।

५.१२ बोधप्रश्नोत्तराणि

१. पाकसदनम्

२. शौचगृहम्

३. पश्चिमवायव्ययोः मध्ये

४. पश्चिमः

५. पश्चिमस्यां दिशि

६. नैर्ऋत्यकोणे

७. षड्गुणितसूत्रेण

८. षष्ठ्याङ्गुलपरिमितादधोभागे

९. हस्तद्वयमिते क्षितौ अस्थिशल्यम्

१०. दम्पत्योः मध्ये पतिनिधनं भवेत्।

११. तुषास्थि-अङ्गार-वराटिका-भस्म-खर्पर-लोहादिद्रव्याणि सन्ति।

१२. मनस्सन्ताप-दुःस्वप्न-धनहानि-कलह-प्राणविनाशादयः।

१३. गृहारम्भात्पूर्वम्

१४. खरोष्ट्रयोः

१५. पूर्वस्यां दिशि नरशल्यं भवेत्।

१६. कुक्कुरस्य

१७. अ-क-च-ट-त-प-य-श-ह-प-या वर्णाः सन्ति।

१८. शुनकस्य

१९. मित्रनाशं दुःस्वप्नदर्शनञ्च कुर्वन्ति।

२०. नृकपालं कचं भस्मलोहञ्च

५.१३ अभ्यासप्रश्नाः

१. सूतिकागृहनिर्माणस्य कालस्य निर्धारणं करोतु।

२. वर्णाधारेण सूत्रस्य प्रतिपादयत।

३. विश्वकर्मप्रकाशानुसारं शल्याशल्यं विवेचयत।

४. राजवल्लभवास्तुशास्त्रानुसारं प्राप्तशल्यस्य फलं वर्णयत।

५. ज्योतिर्निबन्धदृष्ट्या शल्यानयनप्रकारं लिखत।

षष्ठः पाठः – अहिबलचक्रविचारः

पाठसंरचना

६.१ प्रस्तावना
६.२ उद्देश्यम्
६.३ अहिबलचक्रप्रयोजनविचारः
६.३.१ तत्र स्थानद्वारनिर्णयः
६.४ अहिबलचक्रनिर्माणविधिः
बोधप्रश्नाः
६.५ चन्द्रसूर्यसाधनविचारः
६.५.१ स्पष्टचन्द्रसाधनम्
६.५.२ स्पष्टसूर्यसाधनम्
६.६ सूर्यचन्द्रयोः नक्षत्रेषु संस्थितिवशात्फलविचारः
बोधप्रश्नाः
६.७ चन्द्रस्य शुभादिसंस्थितिवशात्फलविचारः
६.७.१ चन्द्रस्य शुभपापक्षेत्रयोः संस्थितिवशात्फलम्
६.७.२ चन्द्रस्य बलाबलानुसारेण फलम्
६.८ चन्द्रोपरि ग्रहदृष्ट्यादिवशात्फलविचारः
६.८.१ चन्द्रोपरि सूर्यादिग्रहाणां दृष्टिवशाद् द्रव्यभेदः
६.८.२ चन्द्रोपरि ग्रहदृष्टौ विशेषः
६.८.३ चन्द्रस्य सूर्यादिग्रहाणां राशौ संस्थितिवशाद् द्रव्यपात्रम्
बोधप्रश्नाः
६.९ चन्द्रस्य संस्थितिवशाद् द्रव्यप्राप्तिविचारः
६.९.१ चन्द्रस्य भुक्तांशादिवशाद् द्रव्यप्राप्तिः
६.९.२ चन्द्रस्य उच्चादिराशौ संस्थितिवशाद् द्रव्यप्राप्तिस्थानम्
६.९.३ चन्द्रस्य भुक्तांशादिवशेन द्रव्यविचारः
६.९.४ नवविधद्रव्याधिष्ठापकाः
६.९.५ द्रव्याधिष्ठापकानां पूजनप्रकारः
बोधप्रश्नाः
ग्रन्थस्य मूलपाठः
६.१० सारांशः
६.११ शब्दावली
६.१२ सन्दर्भग्रन्थः
६.१३ सहायकग्रन्थाः
६.१४ बोधप्रश्नोत्तराणि
६.१५ अभ्यासप्रश्नाः

६.१ प्रस्तावना

प्रियच्छात्र! बृहद्वास्तुमालायाः षष्ठे पाठे भवतां स्वागतम्। गतपाठे भवान् गृहविभागादि-विचारप्रसङ्गे दिक्परत्वेन भिन्न-भिन्नगृहाणां निर्माणविधिं पठितवान्। भूमेः परिमापनाय सूत्रनिर्णयं, विभिन्नग्रन्थाधारेण भूमेः शल्यनिष्कासनविधिं चापि अधीतवान्। षष्ठे पाठेऽस्मिन् भूमेरधस्थले अवस्थितानां द्रव्यशल्यादिकानां ज्ञानं भविष्यति। तत्र सर्वप्रथमं अहिबलचक्रं किम्? एवमेतस्य चक्रस्य का आवश्यकता? कश्च चक्रस्य निर्माणविधिः? इत्यपि भवान् पठिष्यति। अनन्तरं

चन्द्रसूर्ययोः साधनं, सूर्यस्य चन्द्रनक्षत्रेऽवस्थितिवशात् एवञ्च चन्द्रस्य सूर्यनक्षत्रे संस्थिते सति निधिपात्रे द्रव्याद्रव्यविषयेऽपि पठिष्यति। एवमेव चन्द्रस्य शुभाशुभग्रहस्य क्षेत्रे अवस्थितिवशाद् द्रव्यक्षेत्रे द्रव्यलाभालाभविषये अपि भवान् ज्ञास्यति। यदि द्रव्यक्षेत्रे द्रव्यमस्ति तर्हि कति परिमितं द्रव्यं वर्तते इत्यपि पठिष्यति। अनेन प्रकारेण चन्द्रोपरि आदित्यादिग्रहाणां दृष्टिवशाद् द्रव्यपात्रे स्वर्णादिद्रव्येषु किं द्रव्यमस्ति एवञ्च कीदृशे पात्रे द्रव्यमस्ति इत्यस्यापि निर्धारणं कर्तुं शक्ष्यति। तात्कालिकचन्द्रस्य भुक्तांशं दृष्ट्वा कुत्र द्रव्यस्यावस्थितिरस्तीति ज्ञास्यति। तदनन्तरं द्रव्याधिष्ठापकानां निर्णयं कृत्वा तेषां पूजनविधिमपि ज्ञास्यति। मन्ये पाठस्यास्याध्ययनेन भवान् अहिबलचक्रस्य प्रयोगेण द्रव्यादीनां परिज्ञाने दक्षो भविष्यति।

६.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- भूमेरधस्थले द्रव्यनिरूपणे निपुणो भविष्यति।
- अहिबलचक्रस्य प्रयोजनं ज्ञास्यति।
- सर्पचक्रस्य निर्माणं कर्तुं शक्ष्यति।
- अहिबलचक्रे स्थानद्वारादिकानां निर्धारणे दक्षो भविष्यति।
- चन्द्रस्य शुभाशुभावस्थितिम् अवलोक्य क्षेत्रे द्रव्याद्रव्यनिर्णये योग्यो भविष्यति।
- चन्द्रोपरि ग्रहाणां दृष्टिवशान्निधिपात्रे द्रव्यप्रमाणं प्रतिपादयितुं शक्ष्यति।
- द्रव्याधिष्ठापकानां देवानां पूजनसम्पादने दक्षो भविष्यति।

६.३ अहिबलचक्रप्रयोजनविचारः

अहिबलचक्रमर्थात् सर्पाकृतियुक्तं चक्रमस्ति। अष्टाविंशतिनक्षत्राणामाधारेण चक्रस्यास्य निर्माणं भवति। अनेन चक्रेण साधकाः भूमेरधस्थले स्थितं द्रव्यं शल्यम् अथवा शून्यस्थानं जानन्ति। अहिबलचक्रस्य प्रयोजनविषये अत्र विस्तरेण भवान् पठिष्यति।

अहिचक्रं प्रवक्ष्यामि यथा सर्वज्ञभाषितम्।
द्रव्यं शल्यं तथा शून्यं येन जानन्ति साधकाः॥१८०॥
निधिनिर्वर्तनैकस्थः सम्भान्तो यत्र भूतले।
तत्र चक्रमिदं स्थाप्यं स्थानद्वारमुखस्थितम्॥१८१॥

अन्वयः – यथा सर्वज्ञभाषितं (तथैव) अहिचक्रं प्रवक्ष्यामि। येन (चक्रेण)साधकाः द्रव्यं शल्यं तथा शून्यं जानन्ति। यत्र भूतले निवर्तनैकस्थः निधिः सम्भ्रान्तः तत्र स्थानद्वारमुखं स्थितं इदं चक्रं स्थाप्यम्।

प्रतिपदार्थः – यथा=येन प्रकारेण सर्वज्ञ= सर्वज्ञेन महादेवेन भाषितं=कथितं (तथैव) अहिचक्रम्=अहिबलचक्रं सर्पचक्रं वा प्रवक्ष्यामि=कथयामि, येन (चक्रेण), साधकाः=साधनरताः, द्रव्येच्छुकजनाः, द्रव्यं=स्वर्णादिद्रव्यं, शल्यं =कपाल–अस्थि–खर्परादिकं, तथा शून्यं = द्रव्यशल्यादिहीनं स्थानं, जानन्ति= ज्ञातुं प्रभवन्ति। यत्र = यस्मिन् स्थले, भूतले = भूमिगर्भे इति भावः, निवर्तनैकस्थः = एकस्य निवर्तनस्य प्रमाणं 200200 हस्तपरिमितं भवतीति आचार्यभास्करेण उक्तम्, तावन्मिते परिमाणयुक्ते भूमिरधस्थले, निधिः = द्रव्यराशिः, सम्भ्रान्तः = विस्मृतो जात इति भावः, तत्र = तस्मिन् स्थले, स्थानद्वारमुखं स्थितं = वक्ष्यमाणप्रकारेण

मासाद्यनुसारेण चक्रस्य द्वारनिर्णयं कृत्वा तद्दिशि अवस्थितं, इदं चक्रं= अहिबलचक्रं, स्थाप्यम्= न्यसेत्।

सरलार्थः - साधकाः येन चक्रेण भूमेरधोभागे निवर्तनपरिमिते (निवर्तनं 200200 करमितं भवति) क्षेत्रे स्थितं द्रव्यादिकानां प्रतिपादने समर्थाः भवन्ति, तदहिबलचक्रं यथा महादेवेन कथितं तदनुसारं वर्णयामि। यस्मिन् स्थले धनं संस्थाप्य धनपः निधिस्थलं विस्मृतवान्, तस्मिन् स्थले तद्धनपात्रं पुनः प्राप्तये अथवा भूमेरधस्थले धनपात्रज्ञानाय खर्परादिशल्यज्ञानाय अथवा शून्यस्थलज्ञानाय च अहिबलचक्रस्य प्रयोगः क्रियते। अश्विन्याद्यष्टविंशतिनक्षत्राणा- माधारेण अस्य अहिबलचक्रस्य निर्माणं भवति। चक्रस्य यस्मिन् स्थले भूमौ निधिः वर्तते, तस्य भूखण्डस्य प्रवेशद्वारे तद् यन्त्रं अहिबलचक्रं वा स्थापनीयम्।वक्ष्यमाणप्रकारेण मासाद्यनुसारेण चक्रस्य द्वारनिर्णयं कृत्वा तद्दिशि अवस्थितम् इदं अहिबलचक्रं संस्थाप्यम्।

६.३.१ तत्र स्थानद्वारनिर्णयः

भाद्रत्रये शिरः प्राच्यां याम्यां मार्गत्रये शिरः।
फाल्गुनत्रितये पश्चादुत्तरे च ततः परम्॥
यत्र सर्पशिरस्तत्र स्थानद्वारं विनिर्दिशेत्।
तत्र चक्रमिदं स्थाप्यं चेद् बहिर्भागगो निधिः॥
गृहे यदि भवेत् द्रव्यं गृहद्वारे तदा न्यसेत्।
मुख्योऽयं गदितः पक्षे हरिवंशकवीश्वरैः॥

अन्वयः - भाद्रत्रये प्राच्यां (सर्पस्य) शिरः, मार्गत्रये याम्यां शिरः, फाल्गुनत्रितये पश्चात्, ततः परम् उत्तरे च । यत्र सर्पशिरः तत्र स्थानद्वारं विनिर्दिशेत्। चेद् बहिर्भागगो निधिः तत्र इदं चक्रं स्थाप्यम्। यदि गृहे द्रव्यं भवेत् तदा गृहद्वारे (चक्रमुखं) न्यसेत्। हरिवंशकवीश्वरैः (स्थानद्वारस्य) पक्षे अयं मुख्यः गदितः।

प्रतिपदार्थः - भाद्रत्रये =भाद्रपदादिमासत्रये अर्थात् भाद्रपद-आश्विन-कार्तिकमासेषु, प्राच्यां = पूर्वदिशि, शिरः= सर्पशिरः, मार्गत्रये =मार्गशीर्ष-पौष-माघमासेषु, याम्यां = दक्षिणस्यां दिशि, फाल्गुनत्रितये=फाल्गुन-चैत्र-वैशाखमासेषु, पश्चात्=पश्चिमदिशि, ततः परम्= तत्पश्चात् ज्येष्ठ-आषाढ-श्रावणमासेषु, उत्तरे च =उत्तरस्यां दिशि, शिरः= नागशिरः ज्ञेयम्। यत्र= यस्मिन् स्थाने, सर्पशिरः= मासानुसारेण नागशिरो भवेत्, तत्र= तस्मिन् स्थाने तद्दिशि, स्थानद्वारं = अहिबलचक्रस्य मुखद्वारं, विनिर्दिशेत्= आदिशेत्। चेत् = यदि, बहिर्भागगो= गृहात् बहिः, निधिः= द्रव्यं, तत्र= तस्मिन् स्थले, इदं चक्रं = सर्पशिरानुसारेण अहिबलचक्रं, स्थाप्यम्= न्यसेत्। यदि गृहे= गृहान्ते, द्रव्यं भवेत् = निधिः स्यात्, तदा गृहद्वारे= गृहे यस्मिन् प्रकोष्ठे द्रव्यस्य सम्भावनास्ति तस्य द्वारे चक्रमुखं, न्यसेत्=स्थापयेत्। हरिवंशकवीश्वरैः = कवीश्वरहरिवंशमहोदयैः, पक्षे=स्थानद्वारस्य स्थापननिर्णये, अयं मुख्यः गदितः= अनेन प्रकारेण भणितमस्ति।

सरलार्थः- अत्र कवीश्वरहरिवंशैः कथितं स्थानद्वारनिर्णयं कथ्यते। भाद्रपदादिमासत्रये अर्थात् भाद्रपद-आश्विन-कार्तिकमासेषु सर्पशिरः पूर्वदिशि वर्तते। अनेन प्रकारेण मार्गशीर्ष-पौष-माघमासेषु दक्षिणस्यां दिशि नागशिरो भवेत्, एवमत्र फाल्गुन-चैत्र-वैशाखमासेषु पश्चिमदिशि अहिशिरः स्यात्। एवमेव ज्येष्ठ-आषाढ-श्रावणमासेषु उत्तरस्यां दिशि सर्पशिरः भवतीति वक्तव्यः। यस्मिन् मासे यत्र सर्पशिरः उल्लिखितमस्ति तस्मिन् समये तत्र स्थानद्वारं भवेदिति आदिशेत्। यदि निधिः बर्हिभागगो भवेत् तर्हि अस्य चक्रस्य स्थापनं सर्पशिरदिशि

कारयेत्। अनेन प्रकारेण यदि द्रव्यं गृहे भवेत्तदा चक्रस्य स्थापनं तस्य गृहस्य द्वारे करणीयमिति।

६.४ अहिबलचक्रनिर्माणविधिः

अहिः शब्दस्य अर्थः सर्पः, इदम् अहिबलचक्रमपि सर्पाकारं भवति। यथा सर्पः उपविशति तथा अष्टाविंशतिकोष्ठकेषु साभिजिदष्टविंशतिनक्षत्राणि संस्थाप्य चक्रं विरचयेत्। अत्र वयं चक्रस्यास्य निर्माणविधिं पठिष्यामः।

ऊर्ध्वं रेखाष्टकं लेख्यं तिर्यक् पञ्च तथैव च।
अहिचक्रं भवत्येवमष्टविंशतिकोष्ठकम्॥१८२॥
तत्र पौष्णाश्वियाम्यर्क्षं कृतिकापितृभाग्यकम्।
उत्तराफाल्गुनी लेख्यं पूर्वपङ्क्त्यां भसप्तकम्॥१८३॥
अहिर्बुध्न्याजपादर्क्षं शतभं ब्राह्मसार्पभम्।
पुष्यं हस्तं समालेख्यं द्वितीयां पङ्क्तिमास्थितम्॥१८४॥
विधिर्विष्णुर्धनिष्ठाख्यं सौम्यं रौद्रं पुनर्वसुः।
चित्राभं च तृतीयायां पङ्क्तौ धिष्णस्य सप्तकम्॥१८५॥
विश्वर्क्षं तोयभं मूलं ज्येष्ठां मैत्रविशाखके।
स्वातीं पंक्तौ चतुर्थ्यां च कृत्वा चक्रं विलोकयेत्॥१८६॥
एवं प्रवर्तिते चक्रे प्रस्तारः पन्नगाकृतिः।
द्वारशाखे मघायाम्ये द्वारस्था कृत्तिका मता॥१८७॥
अश्वीशपूर्वाषादादित्रिकं पञ्चचतुष्टयम्।
रेवतीपूर्वभाद्रेन्दोर्भानि शेषाणि भास्वतः॥१८८॥

अन्वयः - ऊर्ध्वम् (ऊर्ध्वक्रमेण) रेखाष्टकं लेख्यम्, तथैव तिर्यक् (क्रमेण) पञ्च (रेखा) (लिखेत्) एवम् अहिचक्रम् अष्टविंशतिकोष्ठकं भवति। तत्र (कोष्ठकेषु) पौष्ण-अश्विनी- याम्यर्क्षं, कृतिका, पितृ-भाग्यकं उत्तराफाल्गुनी (इति) भसप्तकं पूर्वपङ्क्त्यां लेख्यम्।

अहिर्बुध्न्य-अजपादर्क्षं, शतभं, ब्राह्मं, सार्पभं, पुष्यं, हस्तं (इति) नक्षत्रसप्तकं द्वितीयां पङ्क्तिस्थितं समालेख्यम्।

विधिः विष्णुः, धनिष्ठाख्यं सौम्यं रौद्रं, पुनर्वसुः चित्राभं (इति)धिष्णस्य सप्तकं च तृतीयायां पङ्क्तौ (लेख्यम्)

विश्वर्क्षं, तोयभं, मूलं, ज्येष्ठां, मैत्र-विशाखके स्वातीं (इति नक्षत्रसप्तकं) चतुर्थ्यां पङ्क्तौ च कृत्वा चक्रं विलोकयेत्।

एवं प्रवर्तिते चक्रे पन्नगाकृतिः प्रस्तारः भवति। मघायाम्ये द्वारशाखे स्थिते, कृत्तिका द्वारस्था मता (द्वारमुखं भवति)। अश्वि-ईश-पूर्वाषाढादि (एतानि नक्षत्राणि आदिभूतानि येषां तत्क्रमेण) त्रिकं पञ्चं, चतुष्टयं रेवती पूर्वभाद्रपदा (च एतानि नक्षत्राणि) इन्दोः भानि, शेषाणि भास्वतः (भानि ज्ञेयानि)।

प्रतिपदार्थः - ऊर्ध्वम्=ऊर्ध्वाधरप्रकारेण, रेखाष्टकम्=अष्टरेखासमूहः, लेख्यं=लेखनीयम्। तथा=तेन प्रकारेण एव, तिर्यक्=क्षैतिजप्रकारेण, क्रमेण पञ्च =पञ्चरेखासमूहं, लिखेत्= चक्रनिर्माणाय अंकितं कार्यमिति भावः। एवम्= अनेन प्रकारेण, अहिचक्रम्= अहिबलचक्रम् अष्टाविंशतिकोष्ठकं=अष्टाविंशतिसंख्यकानां कोष्ठकानां समूहो, भवेत्, तत्र=तेषु कोष्ठकेषु

पौष्ण=रेवतीनक्षत्रम्, अश्विनी=अश्विनीनक्षत्रं, याम्यर्क्षं=भरणीनक्षत्र, कृत्तिका=कृतिकानक्षत्रं पितृ=मघानक्षत्रं, भाग्यकं=पूर्वाफाल्गुनीनक्षत्रम् उत्तराफाल्गुनीनक्षत्रं चेति भसप्तकं=नक्षत्रसप्तकं पूर्वपङ्क्त्यां=प्रथमपङ्क्त्यां लेख्यम्।

अहिर्बुध्न्यम्=उत्तराभाद्रपदनक्षत्रम्, अजपादर्क्षं=पूर्वभाद्रपदनक्षत्रं, शतभं=शतभिषानक्षत्रं ब्राह्म=रोहिणीनक्षत्रं, सार्पभम्=आश्लेषानक्षत्रम्, पुष्यं=पुष्यनक्षत्रं, हस्त=हस्तनक्षत्रं चेति सप्तनक्षत्राणि द्वितीयां पङ्क्तिस्थितं=द्वितीयपङ्क्त्यां, समालेख्यं=सम्यग्रूपेण विलेख्यम्,

विधिः =अभिजिन्नक्षत्रं, विष्णुः=श्रवणनक्षत्रं, धनिष्ठाख्यं=धनिष्ठासंज्ञकनक्षत्रं सौम्यं=मृगशिरानक्षत्रं, रौद्रम्=आर्द्रानक्षत्रं, पुनर्वसुः= पुनर्वसुनक्षत्रं चित्राभं=चित्रानक्षत्रं चेति धिष्णस्य=नक्षत्रस्य सप्तकं तृतीयायां पङ्क्तौ=तृतीयपङ्क्त्यां लेख्यं=लेखनीयम्।


विश्वर्क्षम्=उत्तराषाढानक्षत्रं, तोयभं=पूर्वाषाढानक्षत्रं, मूलं=मूलनक्षत्रं , ज्येष्ठां=ज्येष्ठानक्षत्रं मैत्रविशाखिके= अनुराधानक्षत्रं विशाखानक्षत्रं च, स्वाती=स्वातीनक्षत्रं एतानि सप्तनक्षत्राणि चतुर्थ्यां पङ्क्तौ च कृत्वा=चतुर्थपङ्क्त्यां विलिख्य, चक्रं=अहिबलचक्रं विलोकयेत्=पश्येत्। एवम्= अनेन प्रकारेण, प्रवर्तिते=निर्मिते, चक्रे=नक्षत्रात्मके अहिबलचक्रे, पन्नगाकृतिः=सर्पाकृतिः प्रस्तारः= आच्छादितो भवति। मघायाम्ये =मघानक्षत्रं भरणीनक्षत्रं च, द्वारशाखे=द्वारस्योभयपार्श्वस्थिते ज्ञातव्ये। कृत्तिका=कृत्तिकानक्षत्रं द्वारस्था मता=द्वारमुखे भवतीति।

अश्वीशपूर्वषाढादि=अश्विनीनक्षत्रं आर्द्रानक्षत्रं पूर्वषाढनक्षत्रं च एतानि नक्षत्राणि आदिभूतानि सन्ति येषाम्, (तेषामनुक्रमेण) त्रिकं=त्रीणि नक्षत्राणि, पञ्च=पञ्चनक्षत्राणि चतुष्टयं=चत्वारि नक्षत्राणि लेख्यानि। तद्यथा-अश्विनी-भरणी-कृत्तिका त्रीणि नक्षत्राणि आर्द्रापुनर्वसुपुष्याश्लेषा मघा चेति पञ्चनक्षत्राणि, पूर्वाषाढोत्तराषाढाभिजित्-श्रवणनक्षत्रमिति चत्वारि नक्षत्राणि,(तथा च) रेवती-पूर्वभाद्रपदानक्षत्रे, एतानि चतुर्दशनक्षत्राणि, इन्दोः=चन्द्रस्य,भानि=नक्षत्राणि भवन्ति। शेषाणि =अवशिष्टानि चतुर्दशनक्षत्राणि, भास्वतः=सूर्यस्य, भानि=नक्षत्राणि ज्ञेयानि।

सरलार्थः - अहिबलचक्रन्तु सर्पस्य आकारसदृशं भवति। चक्रनिर्माणाय अष्ट ऊर्ध्वाधररेखाः विलिख्य अनन्तरं तस्योपरि क्षैतिजप्रकारेण पंचतिर्यक्रेखा करणीया। अनेन विधिना चक्रनिर्माणे सति अष्टाविंशतिकोष्ठात्मकस्य सर्पचक्रस्य निर्माणं भवति। तत्र प्रथमपङ्क्तौ रेवती- अश्विनी-भरणी-कृत्तिका-मघा-पूर्वफाल्गुनी-उत्तराफालगुनीति सप्तनक्षत्राणि लिखेत्। द्वितीयपङ्क्तौ उत्तराभाद्रपद-पूर्वभाद्रपद-शतभिषा-रोहिणी-आश्लेषा-पुष्य-हस्तनक्षत्राणि स्थापयेत्। तृतीयपङ्क्तौ अभिजित्-श्रवण-धनिष्ठा-मृगशिरा-आर्द्रा-पुनर्वसु-चित्राणि एतानि सप्तर्क्षाणि स्थातव्यानि। चतुर्थपङ्क्तौ च उत्तराषाढा-पूर्वषाढा-मूल-ज्येष्ठा-अनुराधा-विशाखा-स्वातीनक्षत्राणि भवन्तीति। अनेन प्रकारेण अष्टाविंशतिकोष्ठकेषु नक्षत्राणि संस्थाप्य पन्नगाकृति चक्रस्य निर्माणं कर्तव्यम्। किन्तु सर्पचक्रस्य द्वारशाखारूपेण द्वारस्योभयपार्श्वे भरणी-मघानक्षत्रे भवेतां तथा तस्य चक्रस्य मुखद्वारे कृत्तिकानक्षत्रं सर्वदा संस्थापयेत्।

उपर्युक्तेषु अष्टाविंशतिनक्षत्रेषु चन्द्रस्य अश्विनी-भरणी-कृत्तिका-आर्द्रा-पुनर्वसु-पुष्य-आश्लेषा-मघा-पूर्वषाढा-उत्तराषाढा-अभिजित्-श्रवण-पूर्वभाद्रपदा-रेवती एतानि चतुर्दशनक्षत्राणि सन्ति। शेषाणि भानि (रोहिणी-मृगशिरा-पूर्वफाल्गुनी-उत्तराफाल्गुनी-हस्त-चित्रा-स्वाती-विशाखा-अनुराधा-ज्येष्ठा-मूल-धनिष्ठा-शतभिषा-उत्तरभाद्रपदनक्षत्राणि सूर्यस्य नक्षत्राणि सन्ति।

अहिबलचक्रम्



बोधप्रश्नाः

१. अहिबलचक्रेण साधकाः किं कुर्वन्ति?

२. कति ऊर्ध्वाधरारेखाः करणीयाः?

३. पन्नगाकृतिः कस्य चक्रस्य निर्माणं भवेत्?

४. रौद्रनक्षत्रं कस्यां पङ्क्तौ लेख्यम्?

५. अहिबलचक्रस्य मुखद्वारे कस्य नक्षत्रस्य स्थापनं कर्तव्यम्?

६.५ चन्द्रसूर्यसाधनविचारः

तत्र अहिबलचक्रेण द्रव्यादिज्ञानार्थं चन्द्रसूर्ययोः साधनं केनचिद्भिन्नप्रकारेण क्रियते। अत्र नक्षत्रादितात्कालिकचन्द्रसूर्ययोः साधनं भवति। येन स्पष्टस्थानद्वारनिर्णयः द्रव्यादिज्ञानं च भवति। अत्र वयमस्मिन् विषये पठिष्यामः।

६.५.१ स्पष्टचन्द्रसाधनम्

उदयादिगता नाड्यो भघ्नाः षष्ठ्याप्तशेषके।
दिनेन्दुभुक्तयुक्तेऽसौ भवेत्तत्कालचन्द्रमा॥१८९॥
षष्टिघ्नं तं निशानाथं शरवेदाप्तकं पुनः।
त्रिभिर्भक्त्वा युगैः शेषं प्रागादिचक्रवक्त्रगम्॥१९०॥

अन्वयः – उदयादिगता नाड्यः भघ्नाः षष्ट्या आप्ते शेषके दिनेन्दुभुक्तयुक्ते असौ तत्कालचन्द्रमा भवेत्। तं निशानाथं षष्टिघ्नं शरवेदाप्तकं पुनः त्रिभिः भक्त्वा (पुनः) युगैः शेषं (तत्) प्रागादिचक्रवक्त्रगम् (भवेत्)।

प्रतिपदार्थः – उदयादिगता = प्रश्नकाले उदयतः भुक्ताः, नाड्यः=घट्यः, भघ्नाः= सप्तविंशतिसंख्यया गुणिताः कार्याः, षष्ट्या आप्ते = षष्टिसंख्यया विभक्ते, शेषके= यच्छेषमानं तस्मिन्, दिनेन्दुभुक्तयुक्ते = तद्दिवसस्य गतचन्द्रनक्षत्रयुक्ते, असौ तत्कालचन्द्रमा भवेत्= यल्लब्धमानं तत्तु तात्कालिकः चन्द्रः स्यात्।

तं निशानाथं = तं तात्कालिकं चन्द्रं, षष्टिघ्नं =षष्टिसंख्यया गुणितं कार्यं, शरवेदाप्तकं= पंचचत्वारिंशत्संख्यया भक्तं, पुनः त्रिभिः भक्त्वा, (पुनः) युगैः = चतुर्भिः भक्ते, शेषं = यच्छेषमानं तत्, प्रागादिचक्रवक्त्रगम् = पूर्वादिदिशिक्रमात् सर्पमुखरूपं स्थानद्वारं(भवेत्) अर्थाद् एकशेषे पूर्वदिशि, द्विशेषे दक्षिणस्यां दिशि, त्रिशेषे पश्चिमदिशि तथा च चतुश्शेषे उदीच्यां दिशि स्थानद्वारमुखसंस्थितं भवति।

सरलार्थः - प्रश्नकाले उदयस्य भुक्ताः घट्यः (सम्भवतः इष्टकालमानं) सप्तविंशतिसंख्यया गुणिताः कार्याः, पुनश्च षष्ट्या विभक्ते यच्छेषमानं तस्मिन् तद्दिवसस्य गतचन्द्रनक्षत्रयुक्ते यल्लब्धमानं तत्तु तात्कालिकः चन्द्रः स्यात्।

तं तात्कालिकं चन्द्रं षष्टिसंख्यया गुणितं कार्यं, पंचचत्वारिंशत्संख्यया भक्तं, पुनः त्रिभिः भक्त्वा, पुनश्च चतुर्भिः भक्ते यच्छेषमानं तत् पूर्वादिदिशिक्रमात् सर्पमुखरूपं स्थानद्वारं(भवेत्) अर्थाद् एकशेषे पूर्वदिशि, द्विशेषे दक्षिणस्यां दिशि, त्रिशेषे पश्चिमदिशि तथा च चतुश्शेषे उदीच्यां दिशि स्थानद्वारमुखसंस्थितं भवति।

६.५.२ स्पष्टसूर्यसाधनम्

चन्द्रवत्साधयेत् सूर्यमृक्षस्थं चेष्टकालिकम्।
पश्चाद् विलोकयेत्तौ च स्वर्क्षे वा चान्यभे स्थितौ॥१९१॥

अन्वयः - चन्द्रवत् इष्टकालिकम् ऋक्षस्थं सूर्यं च साधयेत्। पश्चात् तौ विलोकयेत् (यत्तौ) स्वर्क्षे स्थितौ (स्यातामथवा) अन्यभे च (अवस्थितौ)।

प्रतिपदार्थः - चन्द्रवत्=चन्द्रसाधनवत् अर्थात् यथा चन्द्रस्पष्टं साधनमभवत् तथैव, इष्टकालिकम्=निधिप्रश्नसमयस्य, ऋक्षस्थं = नक्षत्रस्थं, सूर्यं च साधयेत्= स्पष्टसूर्यसाधनं करणीयम्। पश्चात्= अनन्तरं, तौ= सूर्यचन्द्रौ, विलोकयेत्= पश्येत्, (यत्तौ) स्वर्क्षे= स्वनक्षत्रे, स्थितौ (स्यातामथवा), अन्यभे= अपरस्य नक्षत्रे च (अवस्थितौ)।

सरलार्थः - यथा चन्द्रस्पष्टस्य साधनमभवत् तेनैव प्रकारेण नक्षत्रस्थं सूर्यं साधयेत्। यथा - द्रव्यान्वेषणसमये प्रश्नकाले उदयस्य भुक्ताः घट्यः (सम्भवतः इष्टकालमानं) सप्तविंशतिसंख्यया गुणिताः कार्याः, पुनश्च षष्ट्या विभक्ते यच्छेषमानं तस्मिन् तद्दिवसस्य गतसूर्यनक्षत्रयुक्ते यल्लब्धमानं तत्तु तात्कालिकः सूर्यः स्यात्। अनेन विधिना स्पष्टसूर्यसाधनं कृत्वा निरीक्षयेत् यत् सूर्यचन्द्रौ स्वर्क्षौ अवस्थितौ स्याताम् अथवा अपरस्य नक्षत्रे अवस्थितौ इति।

६.६ सूर्यचन्द्रयोः नक्षत्रेषु संस्थितिवशात्फलविचारः

निधिकारकस्य चन्द्रस्य नक्षत्रेष्वेवावस्थितिं दृष्ट्वा द्रव्याद्रव्यं विचारणीयम्। द्रव्यान्वेषणसमये यदि तात्कालिकः चन्द्रः स्वस्य नक्षत्रेऽवस्थितं स्यात् अथवा चन्द्रनक्षत्रे सूर्यचन्द्रौ उभौ भवतः तदा निधिक्षेत्रे द्रव्यं सुनिश्चितं भवतीति वक्तव्यम्। किन्तु कदा शल्यं ज्ञेयम्? कदा च शून्यं वक्तव्यम्? इति विषये अत्र वयं विस्तरेण पठामः।

चन्द्रस्यर्क्षे यदाऽर्केन्दू तदास्ति निश्चितं निधिः।
भानो ऋक्षे स्थितौ नोचेत् तदा शल्यं न चान्यथा॥१९२॥
स्वस्वभे द्वितयं ज्ञेयं नास्ति किञ्चिद् विपर्यये।
स्थितं न लभते वित्तं चन्द्रे क्रूरग्रहान्विते॥१९३॥

अन्वयः - यदा चन्द्रस्यर्क्षे अर्केन्दू (स्यातां) तदा (तत्र) निश्चितं निधिः अस्ति। भानोः ऋक्षे स्थितौ तदा शल्यं (वाच्यम्)। अन्यथा न (स्यात्)। (यदि तौ) स्वस्वभे स्थितौ (तदा तत्र) द्वितयं ज्ञेयं किञ्चिद्विपर्यये नास्ति। (यदि) चन्द्रे क्रूरग्रहान्विते (तदा तत्र) स्थितं वित्तं न लभते।

प्रतिपदार्थः - यदा = यस्मिन् समये, चन्द्रस्य = शशांकस्य, ऋक्षे = नक्षत्रे, अर्केन्दू = सूर्याचन्द्रौ(स्यातां) तदा = तस्मिन् काले (तत्र), निश्चितं= निश्चयपूर्वकं, निधिः =द्रव्यम्, अस्ति = स्यात्। भानोः = सूर्यस्य, ऋक्षे = नक्षत्रे, स्थितौ = सूर्यचन्द्रयोः संस्थितौ, तदा शल्यं = कपालास्थिप्रभृतिशल्यं(वाच्यम्)। अन्यथा न = विपर्यये सति अर्थात् चन्द्रस्य नक्षत्रे सूर्ये सति एवं च सूर्यस्य नक्षत्रे चन्द्रे सति न तु द्रव्यं नहि शल्यमर्थात् शून्यं स्यात्(स्यात्)।

(यदि तौ) स्वस्वभे= निजनिजनक्षत्रे, स्थितौ = सूर्यचन्द्रौ अवस्थितौ (तदा तत्र) द्वितयं ज्ञेयं = द्रव्यं शल्यं च विजानीयात्। किञ्चिद्विपर्यये =विपर्यये सति अर्थात् चन्द्रस्य नक्षत्रे सूर्ये सति एवं च सूर्यस्य नक्षत्रे चन्द्रे सति, नास्ति = न द्रव्यं न च शल्यमर्थात् शून्यं विजानीयादिति भावः। (यदि) चन्द्रे = शशांके, क्रूरग्रहान्विते = सूर्यभौमशनिप्रभृतिपापग्रहसमन्विते, (तदा तत्र) स्थितं वित्तं = भूमिगर्भे सत्यपि धनं, न लभते = न प्राप्यते।

सरलार्थः - प्रश्नसमये चन्द्रः यस्मिन् नक्षत्रेऽस्ति अथवा चन्द्रस्य नक्षत्रे यदा सूर्यचन्द्रौ उभौ स्थितौ भवतः तदा तस्मिन् स्थले भूमिगर्भे सुनिश्चितरूपे द्रव्यपात्रे द्रव्यम् स्यादिति कथितव्यम्। एवमेव सूर्यनक्षत्रे सूर्यचन्द्रौ अवस्थितौ स्यातां तदा भूमिगर्भे शल्यं भवेदिति। यदि तौ विपर्ययेन स्थितौ स्यातामर्थात् चन्द्रस्य नक्षत्रे सूर्यः स्यात्तथा सूर्यस्य नक्षत्रे चन्द्रः स्यात्तदा तत्र न द्रव्यं न च शल्यमेव स्यादर्थात् शून्यमेव भवति। एवमेव यद सूर्य-चन्द्रौ स्व-स्व-नक्षत्रेषु अवस्थितौ वर्तेते तदा तस्मिन् पात्रे द्रव्यं शल्यं च सुनिश्चितं स्यात्। सूर्यस्थाने शल्यं चन्द्रस्थले च निधिः भवति। यदि तौ विपर्ययेन स्थितौ स्यातामर्थात् चन्द्रस्य नक्षत्रे सूर्यः स्यात्तथा सूर्यस्य नक्षत्रे चन्द्रः स्यात्तदा तत्र न द्रव्यं न च शल्यमेव स्यादर्थात् शून्यमेव भवति। यदि चन्दमाः पापग्रहेण अर्थात् सूर्य-शनि-मङ्गलादिभिः समन्वितं वर्तते तदा भूमौ स्थितं द्रव्यमपि न प्राप्यते।

बोधप्रश्नाः

६. चन्द्रर्क्षमिति शब्दस्य कोऽर्थः ?

७. शरवेदाप्तकमिति शब्देन कति संख्या स्वीकरणीया?

८. सूर्यस्पष्टीकरणं कस्य ग्रहस्य सदृशं करणीयम्?

९. भूमिगर्भे कदा शल्यं प्राप्यते?

१०. भूमावस्थितद्रव्यस्य कदा प्राप्तिः न भवति?

६.७ चन्द्रस्य शुभादिसंस्थितिवशात्फलविचारः

चन्द्रस्य शुभाशुभग्रहाणां राशिषु संस्थितिवशात् चन्द्रस्य क्षीणे पुष्टे सति अपि च ग्रहाणां दृष्टिवशाद्द्रव्यप्राप्तेः सम्भावना भवति न वा इति विषये अत्र भवान् पठिष्यति।

६.७.१ चन्द्रस्य शुभपापक्षेत्रयोः संस्थितिवशात्फलम्

शुभक्षेत्रगते चन्द्रे द्रव्यलाभो न संशयः।
पापक्षेत्रे न लाभः स्याज्ज्ञातव्यं दैवविद्वरैः॥१९४॥

अन्वयः - चन्द्रे शुभक्षेत्रगते द्रव्यलाभो (भवेत्) (अत्र) संशयो न (कार्यः)। (चन्द्रे) पापक्षेत्रे (स्थिते) च लाभो न स्यात्। (एवमत्र) देवविद्वरैः ज्ञातव्यम्।

प्रतिपदार्थः - चन्द्रे=शशांके, शुभक्षेत्रगते = शुभग्रहाणां गुरु-शुक्र-बुधानां गृहगते अर्थात् धनु-मीन-वृष-तुल-मिथुन-कन्या-कर्कराशिगते, द्रव्यलाभो = निधिप्राप्तिः भवेत्, अस्मिन् विषये संशयः=सन्देहः, न= नहि कर्तव्यः। तदनुरूपं चन्द्रस्य पापक्षेत्रे = पापग्रहाणां सूर्य-मङ्गल-शनिप्रभृतिपापग्रहाणां गृहे सिंह-मेष-वृश्चिक-मकर-कुम्भराशौ अवस्थिते, लाभः=द्रव्यलाभः न=नहि स्यात्। अनेन प्रकारेण देवविद्वरैः=दैवज्ञैः ज्योतिषज्ञैः वा ज्ञातव्यम्।

सरलार्थः - यदा चन्द्रः शुभकारकानां बुध-गुरु-शुक्रादिग्रहाणां मिथुन-कन्या-धनु-मीन-वृष-तुला-कर्कराशिषु निवसति तदा द्रव्यान्वेषणकर्ता यदि द्रव्यान्वेषणं करोति तर्हि भण्डारपात्रे निधिप्राप्तिः भवतीति शास्त्रकाराः कथयन्ति। एवमेव यदा चन्द्रः पापफलप्रदानां सूर्य-मङ्गल-शनिग्रहाणां सिंह-मेष-वृश्चिक-मकर-कुम्भक्षेत्रेषु स्थितः स्यात्तदा द्रव्यस्थले द्रव्यं न भवति।

६.७.२ चन्द्रमसः बलाबलानुसारेण फलम्

पुष्टे चन्द्रे भवेन्मुद्रा क्षीणे चन्द्रेऽल्पको निधिः।
ग्रहदृष्टिवशात् सोऽपि विज्ञेयो नवधा बुधैः॥१९५॥

अन्वयः - पुष्टे (स्थिते) चन्द्रे मुद्रा (अधिका) भवेत्, चन्द्रे क्षीणे अल्पको निधिः (स्यात्) सोऽपि निधिः ग्रहदृष्टिवशात् नवधा बुधैः विज्ञेयः।

प्रतिपदार्थः - पुष्टे= शुक्लपक्षस्य अष्टमीतः कृष्णसप्तमी पर्यन्तं चन्द्रः पुष्टः स्यात्,तस्मिन् समये चन्द्रे=शशाङ्के, धनभण्डारे मुद्रा = द्रव्यं भवेत्। चन्द्रे = शशांके, क्षीणे = कृष्णपक्षस्याष्टमीतः शुक्लसप्तमीं यावत् चन्द्रः क्षीणो भवति, तस्मिन् काले, च अल्पकः= स्वल्पः न्यूनो वा, निधिः=द्रव्यं भवेत्। सोऽपि निधिः = तद्द्रव्यन्तु, ग्रहदृष्टिवशात्=ग्रहाणां दृष्ट्यनुसारेण, नवधा=नवप्रकारकाः बुधैः=पण्डितैः विज्ञेयः=विजानीयादिति।

सरलार्थः - शुक्लपक्षस्याष्टमीतः कृष्णपक्षसप्तमीपर्यन्तं चन्द्रः पुष्टः स्यात्तस्मिन् समये द्रव्यान्वेषणे सति तस्मिन् स्थले भूमौ द्रव्यागारे अधिकं द्रव्यं भवेत्। किन्तु चन्द्रे क्षीणे सति अर्थात् कृष्णपक्षस्याष्टमीतः शुक्लपक्षसप्तमीं यावत् काले यदि निधिकार्यं भवेत्तर्हि द्रव्यभण्डारे स्वल्पं द्रव्यम् भवेत्। पुनः तद्द्रव्यमपि ग्रहदृष्टिवशात् नवप्रकारकं भवतीति विज्ञेयम्।

६.८ चन्द्रोपरि ग्रहदृष्ट्यादिवशात्फलविचारः

यदा द्रव्यान्वेषणकर्ता द्रव्यमन्वेषयति तदा तस्य मनसि जिज्ञासा समुदेति यदस्मिन् द्रव्यक्षेत्रे किम् द्रव्यमस्ति? अर्थात् स्वर्ण-रजत-ताम्र-हीरक-रत्नानि सन्ति अथवा किंचिदपि नास्तीति? तज्जिज्ञासायाः समाधानाय चन्द्रोपरि अन्येषां ग्रहाणां दृष्ट्यनुसारेण भण्डारपात्रे द्रव्यं भवतीति विचार्यम्। अत्र वयमस्मिन् विषये पठिष्यामः।

६.८.१ चन्द्रोपरि सूर्यादिग्रहाणां दृष्टिवशाद् द्रव्यभेदः

हेमं तारं तु ताम्रारं रत्नं कास्यायसं त्रपु।
नागं चन्द्रे विजानीयाद् भास्करादिग्रहेक्षिते॥१९६॥

अन्वयः – (चन्द्रस्योपरि) भास्करादिग्रह– ईक्षिते (क्रमशः सूर्ये दृष्टे) हेमं (चन्द्रे) तारं (भौमे) ताम्रं (बुधे) आरं (बृहस्पतौ) रत्नं (शुक्रे) कांस्यं (शनि) आयसं (राहौ) त्रपु (केतौ) नागं विजानीयात्।

प्रतिपदार्थः – चन्द्रस्योपरि भास्करादिग्रहेक्षिते = सूर्यादिग्रहाणां दृष्टौ सति द्रव्यगारे नवप्रकारकं द्रव्यं जानीयादिति भावः। हेमं=सूर्यः निरीक्षिते द्रव्यपात्रे स्वर्णं, तारं= चन्द्रेक्षिते मुक्ता रजतं वा, ताम्रं=भौमनिरीक्षिते ताम्रमुद्रा धातुः वा वर्तते, आरं= बुधेक्षिते आरमर्थात् पीतलधातु इति हिन्द्याम्। रत्नं =जीवदृष्टौ मणिः, कांस्य=शुक्रेक्षिते कांस्यवस्तु स्यात्। आयसं = शनिदृष्टे लौहधातुः द्रव्यं वा भवेत्। त्रपु=राहौ निरीक्षिते त्रपु (रांगाधातु इति हिन्द्याम्), नागं = केतुदृष्टौ सीसकधातुः (सीसा इति हिन्द्याम्) द्रव्यं वा, विजानीयात् =जानीयात्।

सरलार्थः – पूर्वसाधिततात्कालिकचन्द्रोपरि सूर्यादिग्रहाणां दृष्टिवशाद् द्रव्यपात्रे नैकविधद्रव्याणि भवन्ति। यदा चन्द्रोपरि सूर्यस्य दृष्टिः वर्तते तदा द्रव्यगारे स्वर्णं भवेत्। तद्दिवसस्य चन्द्रे निरीक्षिते निधिपात्रे मुक्ता रजतं वा वर्तते। यदा चन्द्रोपरि अङ्गारकस्य दृष्टिः भवेत्तदा द्रव्यपात्रे ताम्रमुद्रादिकं स्यात्, एवमेव तस्योपरि यदा बुधदृष्टिः भवति तदा भण्डारपात्रे आरद्रव्यं (पीतलधातु इति हिन्द्याम्) भवेत्। यदा तात्कालिकचन्द्रोपरि गुरोः दृष्टिः स्यात्तदा निधिस्थले रत्नानि भवन्ति। एवमेव चन्द्रस्योपरि शुक्रदृष्टिवशात् द्रव्यपात्रे कांस्यधातुः भवेत्। अनेन प्रकारेण यदा शनिदृष्टिः स्यात्तदा निधिस्थले लौहजनितद्रव्यस्य प्राप्तिः भवति। यदा राहुः पश्यति तदा द्रव्यपात्रे त्रपु (रांगाधातु इति हिन्द्याम्) प्राप्यते। एवं च केतुनिरीक्षिते निधिक्षेत्रे सीसकद्रव्याणि भवन्ति।

६.८.२ चन्द्रोपरि ग्रहदृष्टौ विशेषः

मिश्रैमिश्रं भवेद् द्रव्यं शून्यं दृष्टिविवर्जिते।
सर्वग्रहेक्षिते चन्द्रे निर्दिष्टोऽसौ महानिधिः॥१९७॥

अन्वयः – मिश्रैः (दृष्टे) मिश्रं द्रव्यं भवेत्। चन्द्रे दृष्टिविवर्जिते शून्यं (वस्तु) (स्यात्)। असौ सर्वग्रहेक्षिते महानिधिः निर्दिष्टः।

प्रतिपदार्थः – मिश्रैः = चन्द्रः शुभैः पापैश्च मिश्रितग्रहैः दृष्टे, मिश्रं = तत्तद्ग्रहानुरूपं मिश्रितं द्रव्यं = निधिः वस्तु वा, भवेत्, चन्द्रे = शशांके, दृष्टिविवर्जिते = ग्रहदृष्टिविरहिते शून्यं=द्रव्याभावः स्यात्। असौ=चन्द्रमा, सर्वग्रहेक्षिते= सूर्यादिसमस्तग्रहैः वीक्षिते द्रव्यस्थले महानिधिः= महद्द्रव्यं महाधनं वा, निर्दिष्टः=आदिष्टः।

सरलार्थः – चन्द्रोपरि पापशुभग्रहाणां मिश्रितरूपेण दृष्टिसम्बन्धो भवेत्तदा तस्मिन् क्षेत्रे भूमेरधो भागे द्रव्यपात्रे मिश्रितानि द्रव्याणि वस्तूनि वा भवन्ति। परन्तु यदि चन्द्रोपरि कस्यापि ग्रहस्य दृष्टिः न स्यात् तदा तस्मिन् स्थले द्रव्यपात्रे किमपि द्रव्यं न भवेदिति जानीयात्। अनेन प्रकारेण यदि चन्द्रस्योपरि सर्वग्रहाणां दृष्टिः स्यात्तदा तत्र द्रव्यपात्रे महद्द्रव्यं महानिधिः वा प्राप्यते।

६.८.३ चन्द्रस्य सूर्यादिग्रहाणां राशौ संस्थितिवशाद् द्रव्यपात्रम्

हेमं रूप्यं च ताम्रारं पाषाणं मृण्मयायसम्।
आदित्यादिगृहे चन्द्रे द्रव्यभाण्डं प्रजायते॥१९८॥

अन्वयः – चन्द्रे आदित्यादिगृहे (क्रमशः)हेमं रूप्यं ताम्रम् आरं पाषाणं मृण्मयम् आयसं च द्रव्यभाण्डं प्रजायते।

प्रतिपदार्थः- चन्द्रे=शशाङ्के आदित्यादिगृहे=भास्करादिगृहे सति अर्थात् चन्द्रः सूर्यादिग्रहाणां राशौ संस्थितो भवेत् (तदा क्रमशः) हेमं= सूर्यगृहे स्थिते सति अर्थात् सिंहराशौ भवेत्तदा सुवर्णमयपात्रं भवेत्। रूप्यं= स्वगृहे कर्के निवासेन रजतमयपात्रं स्यात्। ताम्रं=भौमगृहे (मेषवृश्चिकराशौ)संस्थितिवशात्ताम्रमयपात्रं वर्तते। आरं=बुधगृहे (मिथुनकन्यराशौ) स्थिते आरमयपात्रं (पीतलपात्रं)भवति। पाषाणं = गुरुक्षेत्रे (धनुमीनराशौ) स्थिते प्रस्तरनिर्मितपात्रं मृण्मयं= शुक्रभवने (वृषतुलाराशौ) गते मृत्तिकया निर्मितं पात्रं ज्ञेयं, आयसं=शनिक्षेत्रे (मकरकुम्भराशौ) गते लौहमयपात्रं च, द्रव्यभाण्डं=निधिपात्रं, प्रजायते=भवतीति भावः।

सरलार्थः - प्रश्नसमये चन्द्रस्य मेषादिविभिन्नराशिषु सञ्चरणवशात् निधिक्षेत्रे भिन्न-भिन्नपात्रे द्रव्याणि भवन्तीति ज्ञातव्यम्। तात्कालिकचन्द्रः यदा सूर्यराशौ सिंहराशौ च अवस्थितः स्यात्तदा स्वर्णेन निर्मिते पात्रे द्रव्यं भवेत्। यदि चन्द्रः स्वक्षेत्रे कर्कराशौ स्यात्तदा रजतमयपात्रे निधिः भवतीति। एवमेव यदा चन्द्रः मङ्गलस्य क्षेत्रे मेषे वृश्चिके वा भवेत्तदा ताम्रपात्रे द्रव्यं भवति। यदा चन्द्रः बुधराशौ मिथुने कन्यायां वा स्यात्तदा आरमयपात्रे (पीतलपात्रे) वस्तु भवेत्। यदा चन्द्रः गुरुक्षेत्रे धनुराशौ मीने वा भवेत्तदा पाषाणमये पात्रे निधिः कथनीयः। यदि चन्द्रः शुक्रक्षेत्रे वृषे तुलायां वा स्थितो भवेत्तदा मृत्तिकानिर्मितपात्रे वस्तूनि स्युः। यदा चन्द्रः शनिक्षेत्रे मकरे कुम्भे वा भवेत् तदा लौहपात्रे द्रव्याणि भवन्ति।

बोधप्रश्नाः

११. चन्द्रः पापक्षेत्रगते द्रव्यलाभो भवेत् न वा ?

१२. गुरोः दृष्टिवशाद् निधिपात्रे किम् वर्तते?

१३. यदा चन्द्रः भौमगृहे स्यात्तदा कस्मिन् पात्रे द्रव्यं भवेत्?

१४. यदि चन्द्रः वृषराशौ भवेत्तदा कस्मिन् भाण्डे द्रव्यं वर्तते?

१५. आयसम् इति शब्देन किं अवगम्यते?

६.९ चन्द्रस्य संस्थितिवशाद्रव्यप्राप्तिविचारः

तात्कालिकचन्द्रः कस्मिंश्चित् राशौ स्थितः स्यात्तत्र यावन्मिताः राश्यंशाः तेन भुक्ताः तदाधारेण भूमौ द्रव्यप्राप्तेः सम्भावना कथं करणीयम्? तथैव चन्द्रस्य स्वोच्चराशौ संस्थितिवशात् ग्रहयुतिवशात् षड्वर्गेषु च बलाबलानुसारेण कथं द्रव्यपात्रे द्रव्यपरिमाणं विचारणीयमिति भवान् अस्मिन् पाठ्यांशे पठिष्यति।

६.९.१ चन्द्रभुक्तांशादिवशाद् द्रव्यप्राप्तिः

भुक्तराश्यंशमानेन भूमानं कामिकैः करैः।
नीचे द्विघ्नं परे नीचे जलस्थोऽसौ भवेन्निधिः॥१९९॥

अन्वयः - (चन्द्रस्य) भुक्तराश्यंशमानेन कामिकैः करैः भूमानं (परिमाप्य भूमौ) नीचे (द्रव्यं जानीयात्) नीचे द्विघ्नं (द्रव्यं स्यात्)। असौ परे नीचे जलस्थः निधिः भवेत्।

प्रतिपदार्थः - भुक्तराश्यंशमानेन=तात्कालिकचन्द्रेण यावन्तः राश्यंशाः भुक्ताः तत्संख्याधारेण, कामिकैः = धनेच्छुकैः भूस्वामिभिः, करैः = हस्तैः भूमानं=भुवः परिमापनं कृत्वा, नीचे=अधोभागे द्रव्यं भवतीति जानीयात्। नीचे= चन्द्रे नीचराशिगते अर्थात् वृश्चिकराशौ गते सति, द्विघ्नं= भूमौ द्विगुणिते नीचे द्रव्यं भवेदिति भावः। असौ=चन्द्रः, परे नीचे=वृश्चिकराशेः

तृतीयांशे परमनीचांशगते स्यात् तदा, जलस्थः निधिः = जले द्रव्यं स्थितं भवेदिति।

सरलार्थः - प्रश्नसमुद्भवकाले तात्कालिकचन्द्रेण यावन्तः राश्यंशाः भुक्ताः भूस्वामिहस्तेन धनेच्छुकहस्तेन वा भूमौ तावन्तः अधस्थले द्रव्यं भवति। यदा चन्द्रः स्वनीचराशौ अर्थात् वृश्चिकराशौ भवेत्तदा द्विगुणिते अधस्थले द्रव्यं भवेत्। यदा चन्द्रः परमनीचे अर्थात् वृश्चिकस्य तृतीयांशे गतः स्यात् तदा जलमध्ये च द्रव्यमस्तीति जानीयात्।

६.९.२ चन्द्रस्य स्वोच्चराशौ संस्थितिवशाद् द्रव्यप्राप्तिस्थानम्

स्वोच्चस्थे तूर्ध्वगं द्रव्यं नवमांशक्रमेण च।
परमोच्चे स्थिते चन्द्रे भित्तिस्थमृक्षसङ्क्रमे॥२००॥

अन्वयः - चन्द्रे स्वोच्चस्थे नवांशक्रमेण ऊर्ध्वगं द्रव्यं भवेत्। (चन्द्रे) परमोच्चे (स्थिते) तु ऋक्षसङ्क्रमे च भित्तिस्थं (द्रव्यं भवेत्)।

प्रतिपदार्थः - चन्द्रे=निशानाथे, स्वोच्चस्थे=स्वोच्चराशिगते वृषराशौ स्थिते, नवांशक्रमेण= भुक्तनवांशक्रमेण अर्थात् यावन्तः नवांशकाः भुक्ताः तत्क्रमेण मापने सति, ऊर्ध्वगम्= भूमितः ऊर्ध्वभागे उच्चस्थाने वा, द्रव्यं = निधिः भवेत्। परमोच्चे= शशाङ्के परमोच्चराशिगते वृषतृतीयांशे अवस्थिते, ऋक्षसङ्क्रमे=नक्षत्रसंक्रमणसमये, च भित्तिस्थं = भित्तौ भित्तिमध्यस्थं वा, द्रव्यम् अस्तीति।

सरलार्थः - यदा चन्द्रः स्वस्य उच्चराशौ वृषराशिस्थो भवेत् तदा तत्र तस्य राश्यंशभोगं दृष्ट्वा तदनुसारेण धनेच्छुकस्य हस्तेन परिमाप्य भूमौ ऊर्ध्वभागे द्रव्यं कथनीयम्। यदा चन्द्रः स्वोच्चराशौ परमोच्चस्थाने अर्थात् वृषराशेः तृतीयांशे स्यात् अथवा चन्द्रस्य नक्षत्रसंक्रमणकालो वा भवेत्तदा भित्तिमध्यस्थं द्रव्यं जानीयात्।

६.९.३ चन्द्रस्य भुक्तांशादिवशेन द्रव्यविचारः

चन्द्रभुक्तांशमानेन द्रव्यसंख्या विधीयते।
तस्या दशगुणावृद्धिः षड्वर्गेन्दुबलक्रमात्॥२०१॥

अन्वयः - चन्द्रभुक्तांशमानेन द्रव्यसंख्या विधीयते। इन्दोः षड्वर्गबलक्रमात् तस्याः दशगुणावृद्धिः (भवति)।

प्रतिपदार्थः - चन्द्रभुक्तांशमानेन = चन्द्रेण भुक्तानाम् अंशानामाधारेण द्रव्यसंख्या = निधिसंख्या विधीयते=सम्पाद्यते कथनीयेति भावः। इन्दोः=चन्द्रस्य, षड्वर्गबलक्रमात् =षड्वर्गेषु क्षेत्र-होरा-द्रेष्काण-नवांश-द्वादशांश-त्रिंशांशेषु यावन्मितेषु वर्गेषु चन्द्रः बली स्यादिति भावः, क्रमात्=तत्क्रमानुसारेण, तस्याः =निधेः द्रव्यस्य वा संख्यायाः, दशगुणावृद्धिः=दशपरिमितगुणिताः वृद्धिः भवतीति।

सरलार्थः - द्रव्यान्वेषणसमये चन्द्रेण भुक्तानाम् अंशानामाधारेण द्रव्यसंख्या कथनीया परन्तु तात्कालिकचन्द्रः स्वषड्वर्गेषु राशि-होरा-द्रेष्काण-नवांश-द्वादशांश-त्रिंशाशेषु यावन्मितेषु वर्गेषु स्वोच्चादिसंस्थितिवशाद् बली स्यात् तदनुसारेण क्रमशः दशगुणितम् अधिकद्रव्यं भण्डारपात्रे भवेदिति चिन्तनीयम्। यथा एकस्मिन् वर्गे बली तदा धनपात्रेऽपि दशगुणद्रव्यम् अधिकं भवति। एवमेव चन्द्रः वर्गद्वये बली स्यात्तदा द्रव्यस्य शतगुणावृद्धिः (100) जानीयात्। अनेन प्रकारेण वर्गत्रये बली स्यात्तदा सहस्रगुणा (1000), वर्गचतुष्टये अयुतगुणा दशसहस्रगुणा वा (10,000), पंचसु वर्गेषु बली स्यात् लक्षगुणा (100000) तथा च षट्सु वर्गेष्वेव बली स्यात्तदा प्रयुतगुणा अर्थाद्दशलक्षगुणा 1000000 द्रव्यवृद्धिः भवतीति।

६.९.४ नवविधद्रव्याधिष्ठापकाः

अधिष्ठितं भवेद् द्रव्यं यत्र चन्द्रो ग्रहान्वितः।
तदधिष्ठापको ज्ञेयो भास्करादिग्रहैः क्रमात्॥२०२॥
ग्रहं मुग्धग्रहं चैव क्षेत्रपालं च मातृकाः।
दीपेशं भीषणं रुद्रं यक्षं नागं विदुः क्रमात्॥२०३॥

अन्वयः - (प्रश्नसमये) यत्र चन्द्रो ग्रहान्वितः (स्यात् तदा तत्र) भास्करादिग्रहैः क्रमात् तदधिष्ठापको ज्ञेयः। क्रमात् (चन्द्रे सूर्यसमन्विते) ग्रहम्, एवं (तात्कालिकचन्द्रस्य तद्दिवसस्य चन्द्रेण सहान्विते) मुग्धग्रहं, (भौमयुक्ते) क्षेत्रपालं, (बुधसहिते) मातृकाः, (गुरुसंयुते) दीपेशं, (शुक्रसहिते) भीषणं, (शनियुते) रुद्रं, (राहुसहिते) यक्षं, (केतुसहिते) नागं च विदुः।

प्रतिपदार्थः - निधिप्रश्नकाले यत्र =यस्मिन् स्थले चन्द्रः=शशांकः ग्रहान्वितः = ग्रहसमन्वितः स्यात् तत्र भास्करादिग्रहैः=सूर्यादिग्रहैः, क्रमात्= क्रमानुसारेण, तदधिष्ठापकः=द्रव्याधिष्ठापकः ज्ञेयः=विज्ञेयः।

क्रमात्= क्रमानुसारेण द्रव्याधिष्ठापकः, ग्रहं = चन्द्रे सूर्यसहिते ग्रहसंज्ञकं देवं, मुग्धग्रहं = चन्द्रः एकाकी एव स्यादथवा पूर्वसाधिततात्कालिकचन्द्रः तद्दिवसस्य चन्द्रेण सह स्यात्तदा मुग्धग्रहसंज्ञकं देवं, क्षेत्रपालं= कुजसहिते क्षेत्रपालसंज्ञकं देवं, मातृकाः=बुधसहिते मातृगणाः, दीपेशं = गुरुसहिते दीपेशसंज्ञकं देवं, भीषणं = शुक्रयुते भीषणसंज्ञकं देवं, रुद्रं =शनिसहिते रुद्रदेवं शिवं वा, यक्षं = राहुसहिते यक्षसंज्ञकं देवं, नागं च = केतुसहिते च नागदेवं च, विदुः=जानीयुः।

सरलार्थः - प्रश्नकाले चन्द्रः येन ग्रहेण समन्वितो भवेत्। तदनुसारं द्रव्याधिष्ठापकं विजानीयात्। यथा - चन्द्रः सूर्यग्रहेण समन्वितो भवेत्तदा द्रव्याधिष्ठापकः 'ग्रहो' भवति। चन्द्रः एकाकी एव स्यादथवा पूर्वसाधिततात्कालिकचन्द्रः तद्दिवसस्य चन्द्रेण सह स्यात्तदा मुग्धग्रहः, स्यात्। यदा सः अङ्गारकेण संयुतः स्यात्तदा द्रव्याधिष्ठापकः क्षेत्रपालो ज्ञेयः। अनेन प्रकारेण यदा सः बुधयुतो वर्तते तदा 'मातृकाः', गुरुसहिते 'दीपेशः', शुक्रसहिते 'भीषणः' शनिग्रहसमन्विते 'रुद्रः', राहुग्रहसंयुते 'यक्षः' केतुसमन्विते च नागः द्रव्याधिष्ठापको भवति।

६.९.५ द्रव्याधिष्ठापकानां पूजनप्रकारः

ग्रहे होमः प्रकर्तव्यो मुग्धे नारायणो बलिः।
क्षेत्रपाले सुरामांसं मातृकासु महाबलिः॥२०४॥
दीपेशे दीपजा पूजा, भीषणे भीषणाचर्नम्।
रुद्रे च रुद्रजो जाप्यो यक्षे यक्षादिशान्तयः॥२०५॥
नागे नागगणाः पूज्या गणनाथेन संयुता।
लक्ष्मीं धरादितत्त्वानि सर्वकार्येषु पूजयेत्॥२०६॥
एवं कृत्वा विधानेन निधिः साध्योऽपि सिद्ध्यति।
निधिं प्राप्ता नरा लोके वन्दनीया न संशयः॥२०७॥

अन्वयः - ग्रहे (द्रव्याधिष्ठापके सति) होमः प्रकर्तव्यः। मुग्धे नारायणो बलिः (देयः)। क्षेत्रपाले सुरामांसं प्रदेयमिति। मातृकासु महाबलिः प्रदेयः। दीपेशे दीपजा पूजा, भीषणे च भीषणार्चनं रुद्रे रुद्रजः जाप्यः, यक्षे यक्षादिशान्तयः, नागे गणनाथेन संयुताः नागगणाः पूज्याः। सर्वकार्येषु लक्ष्मीं धरादितत्वानि च पूजयेत्। एवं विधानेन (पूजां) कृत्वा

निधिः साध्योऽपि (साध्यकार्यं) सिद्ध्यति। नराः निधिं प्राप्ता (अस्मिन्) लोके वन्दनीयाः (भवन्ति अत्र) संशयः न (कार्यः)।

प्रतिपदार्थः – ग्रहे= यदा ग्रहो द्रव्याधिष्ठापकः स्यात्तदा तत्प्रीत्यर्थं, होमः=ग्रहशान्तिहोमः, प्रकर्तव्यः=करणीयः। मुग्धे= मुग्धः द्रव्याधिष्ठापकः स्यात्तदा तस्य संतोषाय, नारायणो बलिः=कर्मकाण्डविशेषः नारायणबलिः कर्त्तव्यः। क्षेत्रपाले=क्षेत्रपालः द्रव्याधिष्ठापकः स्यात्तदा तस्य प्रसन्नाय, सुरामांसं = तस्मै मदिरामांसादितामसबलिः प्रदातव्यः। मातृकासु = मातृकाः द्रव्याधिष्ठापिकाः स्युः तदा तेषां प्रीतये, महाबलिः=छागादिकानां बलिः देयः। दीपेशे=दीपेशः द्रव्याधिष्ठापकः स्यात्तदा तस्य अनुग्रहप्राप्त्यर्थं, दीपजा = धूपदीपनैवेद्यादिसंयुता पूजा करणीया। भीषणे= भीषणः द्रव्याधिष्ठापकः स्यात्तदा तत्प्रीत्यर्थं, च भीषणार्चनं = तान्त्रिकोक्तपद्धतिपुरस्सरं छागादिबलियुता पूजा कर्तव्या। रुद्रे=रुद्रः द्रव्याधिष्ठापकः स्यात्तदा तस्य अनुग्रहप्राप्त्यर्थं, रुद्रजो जाप्यः =रुद्रसम्बन्धिजपादिकं रुद्राभिषेकमहामृत्युञ्जयमन्त्रादिजपं आचरेत्। यक्षे=यक्षो द्रव्याधिष्ठापकः स्यात्तदा तस्य प्रीत्यर्थं, यक्षादिशान्तयः = यक्षशान्तिः प्रकर्तव्या। नागे = नागः निधिपतिः स्यात्दा तत्तोषाय, गणनाथेन संयुताः = गणपतिना समन्विताः, नागगणाः= शेषाद्यष्टकुलनागगणाः, पूज्याः = तेषां पूजा विधातव्या। सर्वकार्येषु = सर्वस्मिन् वास्तुकार्येषु, लक्ष्मीं=श्रीदेवीं धनस्याधिष्ठात्रीं, धरादितत्वानि=पृथिवि-जल-तेज-वायु-आकाशतत्त्वानि, पूजयेत् = विधिपूर्वकं प्रपूजयेत्, एवं विधानेन = अनेन प्रकारेण विधिपूर्वकं, नराः =मनुष्याः, पूजां कृत्वा=पूजनविधिं सम्पाद्य, निधिः=निधिरन्वेषणकर्ता संसाधकः अपि कार्येऽस्मिन् सिद्ध्यति=सिद्धिलाभं करोति। निधिं=द्रव्यं प्राप्ता=लब्धा, लोके= संसारे, वन्दनीयाः =पूजनीयाः भवन्ति। अत्र संशयः= अस्मिन्विषये कदापि सन्देहः, न=नहि कर्तव्यः।

सरलार्थः – चन्द्रेण सह कः ग्रहः समन्वितोऽस्ति तदनुसारेण द्रष्टाधिष्ठापकस्य देवस्य निर्णयं कृत्वा तत्पश्चात् तद्द्रव्यास्याधिष्ठापकस्य देवस्य तोषाय तस्मै पूजा-होम-बलिदानादयः पूर्वनिर्धारितविद्ध्यनुसारं प्रतिपादनीयाः। पूजनान्तरं निधिकार्यं करणीयम्। किन्तु अत्र प्रश्नः समुदेति यद् द्रव्याधिष्ठातॄणां देवानां पूजा कथं सम्पादनीया? यतः देवाः निजस्वभावानुसारेण पूजां स्वीकृत्य संतुष्टाः भवन्ति। तदा ते साधकस्य मनोभिलषितं फलं प्रददति। एतदर्थम् अत्र पूजाविधिः वर्णितः।

सर्वप्रथमं तु सर्वकार्येषु गणपतिसहितं लक्ष्मीं सम्पूज्य अनन्तरं धरातत्त्वान्यपि अर्चयेत्। तदा यदि द्रव्याधिष्ठापकदेवः ग्रहः भवेत्तदा अधिदेव-प्रत्यधिदेवसहितं ग्रहं प्रपूज्य ग्रहहोमः करणीयः। मुग्धः द्रव्याधिष्ठापकः स्यात्तदा तत्प्रसन्नाय तस्मिन् स्थले नारायणपूजनं कृत्वा तत्पश्चात् नारायणबलिः कर्तव्यः। एवमेव द्रव्याधिष्ठापकः क्षेत्रपालः स्यात् तदा तत्प्रमोदाय सुरामांसादिसंयुता पूजा कर्तव्या। मातृकाः द्रव्याधिष्ठापिकाः स्युः तदा तेषां प्रीत्यर्थं छागादिमहाबलिं दद्यात्। दीपेशः द्रव्याधिष्ठापकः स्यात् तदा तत्प्रीतये धूपदीपादिसंयुतां पूजां कृत्वा दीपदानमाचरेत्। भीषणः द्रव्याधिष्ठापको भवेत्तदा तस्यानुग्रहप्राप्त्यर्थं तन्त्रोक्तप्रकारेण छागादिबलिपुरस्सरं भीषण पूजा करणीया। एवमेव रुद्रः द्रव्याधिष्ठापकः स्यात्तदा तदनुग्रहाय रुद्राभिषेक-महामृत्युंजयमन्त्रप्रभृतिरुद्रजपादिकं कुर्यात्। यक्षः द्रव्याधिष्ठापकः स्यात्तदा तत्प्रीत्यर्थं यक्षशान्तिः प्रकर्तव्या। यदि द्रव्याधिष्ठापकः नागः स्यात्तदा तत्प्रीतये गणपतिसहितान् अष्टकुलनागान् प्रपूजयेत्। अनेन प्रकारेण विधिपूर्वकं पूजां कृत्वा साधकः निधिं संप्राप्य संसारेऽस्मिन् पूजनीयो भवति।

बोधप्रश्नाः

१६. कदा निधिः भित्तौ अस्तीति ज्ञायते?

१७. चन्द्रस्य भुक्तांशमानेन कस्या गणना क्रियते?

१८.	चन्द्रः वर्गचतुष्टये बली स्यात्तदा कति गुणं द्रव्यं प्राप्यते?

१९.	द्रव्यान्वेषणकाले यदि चन्द्रः बुधयुक्तो भवेत्तदा द्रव्याधिष्ठापकः कः?

२०.	कदा द्रव्याधिष्ठापको रुद्रो भवति?

२१.	कस्य प्रीत्यर्थं यक्षशान्तिपूजनं कुर्यात्?

२२.	कस्य पूजायां नारायणबलिं दद्यात्?

ग्रन्थस्य मूलपाठः-

अहिचक्रं प्रवक्ष्यामि यथा सर्वज्ञभाषितम्।
द्रव्यं शल्यं तथा शून्यं येन जानन्ति साधकाः॥१८०॥
निधिर्निवर्तनैकस्थः सम्भ्रान्तो यत्र भूतले।
तत्र चक्रमिदं स्थाप्यं स्थानद्वारमुखस्थितम्॥१८१॥
भाद्रत्रये शिरः प्राच्यां याम्यां मार्गत्रये शिरः।
फाल्गुनत्रितये पश्चादुत्तरे च ततः परम्॥
यत्र सर्पशिरस्तत्र स्थानद्वारं विनिर्दिशेत्।
तत्र चक्रमिदं स्थाप्यं चेद् बहिभार्गगो निधिः॥
गृहे यदि भवेत् द्रव्यं गृहद्वारे तदा न्यसेत्।
मुख्योऽयं गदितः पक्षे हरिवंशकवीश्वरैः॥
ऊर्ध्वं रेखाष्टकं लेख्यं तिर्यक् पञ्च तथैव च।
अहिचक्रं भवत्येवमष्टाविंशतिकोष्ठकम्॥१८२॥
तत्र पौष्णाश्वियाम्यर्क्षं कृत्तिकापितृभाग्यकम्।
उत्तराफाल्गुनी लेख्यं पूर्वपङ्क्त्यां भसप्तकम्॥१८३॥
अहिर्बुध्न्याजपादर्क्षं शतभं ब्राह्मसार्पभम्।
पुष्यं हस्तं समालेख्यं द्वितीयां पङ्क्तिमास्थितम्॥१८४॥
विधिर्विष्णुर्धनिष्ठाख्यं सौम्यं रौद्रं पुनर्वसुः।
चित्राभं च तृतीयायां पङ्क्तौ धिष्णस्य सप्तकम्॥१८५॥
विश्वर्क्षं तोयभं मूलं ज्येष्ठां मैत्रविशाखके।
स्वातीं पङ्क्तौ चतुर्थ्यां च कृत्वा चक्रं विलोकयेत्॥१८६॥
एवं प्रवर्तिते चक्रे प्रस्तारः पन्नगाकृतिः।
द्वारशाखे मघायाम्ये द्वारस्था कृत्तिका मता॥१८७॥
अश्वीशपूर्वाषाढादित्रिकं पञ्चचतुष्टयम्।
रेवतीपूर्वभाद्रेन्दोर्भानि शेषाणि भास्वतः॥१८८॥
उदयादिगता नाड्यो भघ्नाः षष्ठ्याप्तशेषके।
दिनेन्दुभुक्तयुक्तेऽसौ भवेत्तत्कालचन्द्रमाः॥१८९॥
षष्ठिघ्नं तं निशानाथं शरवेदाप्तकं पुनः।
त्रिभिर्भक्त्वा युगैः शेषं प्रागादिचक्रवक्त्रगम्॥१९०॥
चन्द्रवत् साधयेत् सूर्यमृक्षस्थं चेष्टकालिकम्।
पश्चात् विलोकयेत्तौ च स्वर्क्षे वा चान्यभे स्थितौ॥१९१॥
चन्द्रस्यर्क्षे यदाऽर्केन्दू तदास्ति निश्चितं निधिः।
भानो ऋक्षे स्थितौ नोचेत् तदा शल्यं न चान्यथा॥१९२॥
स्वस्वभे द्वितयं ज्ञेयं नास्ति किञ्चिद् विपर्यये।

स्थितं न लभते वित्तं चन्द्रे क्रूरग्रहान्विते॥१९३॥
शुभक्षेत्रगते चन्द्रे द्रव्यलाभो न संशयः।
पापक्षेत्रे न लाभः स्याज्ज्ञातव्यं दैवविद्वरैः॥१९४॥
पुष्टे चन्द्रे भवेन्मुद्रा क्षीणे चन्द्रेऽल्पको निधिः।
ग्रहदृष्टिवशात् सोऽपि विज्ञेयो नवधा बुधैः॥१९५॥
हेमं तारं तु ताम्रारं रत्नं कास्यायसं त्रपु।
नागं चन्द्रे विजानीयाद् भास्करादिग्रहेक्षिते॥१९६॥
मिश्रैर्मिश्रं भवेद् द्रव्यं शून्यं दृष्टिविवर्जिते।
सर्वग्रहेक्षिते चन्द्रे निर्दिष्टोऽसौ महानिधिः॥१९७॥
हेमं रूप्यं च ताम्रारं पाषाणं मृण्मयायसम्।
आदित्यादिगृहे चन्द्रे द्रव्यभाण्डं प्रजायते॥१९८॥
भुक्तराश्यंशमानेन भूमानं कामिकैः करैः।
नीचे द्विघ्नं परे नीचे जलस्थोऽसौ भवेन्निधिः॥१९९॥
स्वोच्चस्थे तूर्ध्वगं द्रव्यं नवमांशक्रमेण च।
परमोच्चे स्थिते चन्द्रे भित्तिस्थमृक्षसङ्क्रमे॥२००॥
चन्द्रभुक्तांशमानेन द्रव्यसङ्ख्या विधीयते।
तस्या दशगुणावृद्धिः षड्वर्गेन्दुबलक्रमात्॥२०१॥
अधिष्ठितं भवेद् द्रव्यं यत्र चन्द्रो ग्रहान्वितः।
तदधिष्ठापको ज्ञेयो भास्करादिग्रहैः क्रमात्॥२०२॥
ग्रहे मुग्धग्रहं चैव क्षेत्रपालं च मातृकाः।
दीपेशं भीषणं रुद्रं यक्षं नागं विदुः क्रमात्॥२०३॥
ग्रहे होमः प्रकर्तव्यो मुग्धे नारायणो बलिः।
क्षेत्रपाले सुरामासं मातृकासु महाबलिः॥२०४॥
दीपेशे दीपजा पूजा, भीषणे भीषणाचर्नम्।
रुद्रे च रुद्रजो जाप्यो यक्षे यक्षादिशान्तयः॥२०५॥
नागे नागगणाः पूज्या गणनाथेन संयुता।
लक्ष्मीं धरादितत्वानि सर्वकार्येषु पूजयेत्॥२०६॥
एवं कृत्वा विधानेन निधिः साध्योऽपि सिद्धयति।
निधिं प्राप्ता नरा लोके वन्दनीया न संशयः॥२०७॥

६.१० सारांशः

प्रियच्छात्र! षष्ठपाठस्यास्य पठनेन भवान् अहिबलचक्रं तस्य प्रयोजनम् आवश्यकतां चाधीतवान्। अनेन प्रकारेण सर्पचक्रस्य निर्माणविधिं स्थानद्वारस्य निर्णयं, चन्द्रसूर्ययो: साधनविधिं चापि सम्यग्रूपेण पठितवान्। सूर्यचन्द्रयोः नक्षत्रेषु संस्थितिवशात् भण्डारपात्रे द्रव्यशल्यादिनिरूपणं कथं भवतीत्यपि अत्र भवता ज्ञातम्। अनन्तरं चन्द्रस्य शुभपापग्रहाणां क्षेत्रेषु स्थित्यनुसारेण द्रव्यक्षेत्रे द्रव्याधिकता-न्यूनताविषयेऽपि ज्ञातवान्। चन्द्रोपरि ग्रहदृष्टिं निरीक्ष्य निधिक्षेत्रे स्वर्णादिवस्तूनां प्राप्तिविषये भवान् पठितवान् । तेन प्रकारेण चन्द्रस्य उच्च-नीचादिराशौ संस्थितिं दृष्ट्वा अपि च तद्भुक्तांशादिकं ज्ञात्वा द्रव्यप्राप्तिस्थलस्य निर्धारणे भवान् निपुणो जातः। तात्कालिकचन्द्रस्य षड्वर्गसाधनं कृत्वा तस्य षड्वर्गेषु बलं विचार्य द्रव्यपात्रे द्रव्यपरिमाणविषये अपि पठितवान्। ततः चन्द्रेण सह ग्रहाणामवस्थितिं दृष्ट्वा कथं द्रव्याधिष्ठापकाः देवाः ज्ञातव्याः इत्यपि अधीतवान्। अन्ते च द्रव्याधिष्ठापकानां देवानां पूजनविधिं भवान् ज्ञातवान्। मन्ये अस्य पाठस्य अध्ययनेन भवान् अहिबलचक्रस्य प्रयोगेण द्रव्यादीनां परिज्ञाने निपुणो जातः।

६.११ शब्दावली

१.	अहिचक्रे	=	सर्पचक्रे, अहिबलचक्रे
२.	प्रवक्ष्यामि	=	कथयामि
३.	सर्वज्ञः	=	परमेश्वरः शिवः
४.	भाषितम्	=	कथितम्
५.	भूतले	=	पृथिवितले
६.	स्थानद्वारं	=	स्थानस्य द्वारम्, सर्पचक्रस्य मुखम्
७.	सम्भ्रान्तः	=	सम्भ्रमः
८.	ऊर्ध्वम्	=	ऊर्ध्वाधरम्(लाम्बिकरूपेण)
९.	तिर्यक्	=	तिर्यग्रूपम् (क्षैतिजरूपेण)
१०.	पौष्णम्	=	रेवतीनक्षत्रम्
११.	याम्यः	=	भरणीनक्षत्रम्
१२.	पूर्वपङ्क्त्याम्	=	प्रथमपङ्क्त्याम्
१३.	विधिः	=	ब्रह्मा अभिजित् नक्षत्रं वा
१४.	सर्पभम्	=	आश्लेषानक्षत्रम्
१५.	धिष्णम्	=	नक्षत्रम्
१६.	लेख्यम्	=	लेखनीयम्
१७.	विश्वर्क्षम्	=	उत्तराषाढानक्षत्रम्
१८.	भास्वतः	=	सूर्यतः
१९.	अर्हिबुध्यः	=	उत्तराभाद्रपदनक्षत्रम्
२०.	अजपादः	=	पूर्वभाद्रपदनक्षत्रम्
२१.	विष्णुः	=	श्रवणनक्षत्रम्
२२.	सौम्यः	=	मृगशिरानक्षत्रम्
२३.	भघ्नाः	=	सप्तविंशतिगुणिताः
२४.	इन्दुः	=	चन्द्रः
२५.	ऋक्षम्	=	नक्षत्रम्
२६.	नाड्यः	=	घट्यः
२७.	अर्कः	=	सूर्यः
२८.	क्रूरग्रहः	=	पापग्रहः
२९.	प्रस्तारः	=	विस्तारः , आच्छादितः

३०.	वित्तम्	=	धनम्
३१.	विपर्यये	=	वैपरीत्ये
३२.	हेमं	=	स्वर्णम्
३३.	पुष्टे	=	बलयुक्ते
३४.	आरं	=	पीतलधातु इति हिन्द्याम्
३५.	आयसं	=	लौहम्
३६.	त्रपु	=	रांगधातु इति हिन्द्याम्
३७.	नागं	=	सीसकम्
३८.	अन्यथा	=	भिन्नप्रकारेण
३९.	संशयः	=	सन्देहः
४०.	प्रकर्तव्यः	=	करणीयः
४१.	कामिकः	=	इच्छुकः
४२.	द्रव्यभाण्डम्	=	निधिपात्रम्
४३.	विदुः	=	जानीयुः
४४.	करैः	=	हस्तैः
४५.	द्विघ्नं	=	द्विगुणितम्
४६.	मृण्मयः	=	मृत्तिकानिर्मितः
४७.	वन्दनीया	=	पूजनीया
४८.	जलस्थ	=	जले स्थितः

६.१२ सन्दर्भग्रन्थः

१. **बृहद्वास्तुमाला, पण्डित श्री रामनिहोर द्विवेदी,**
प्रकाशकः - चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करणम् २०१२।

६.१३ सहायकग्रन्थाः

१. **बृहत्संहिता - आचार्य वराहमिहिरकृता**
प्रकाशकः- चौखम्बा विद्याभवन वाराणसी।

२. **वास्तुरत्नावली - श्रीजीवनाथझा,**
प्रकाशकः - चौखम्बा अमरभारतीप्रकाशन, तृतीयसंस्करण १९८१।

३. **मुहूर्त्तचिन्तामणिः - रामदैवज्ञः,**
प्रकाशकः - तेजकुमार बुक डिपो प्रा. लिमिटेड दशवां संस्करण, २००४।

६.१४ बोधप्रश्नोत्तराणि

१. द्रव्यं शून्यं तथा शल्यं जानन्ति।

२. अष्टरेखा कर्तव्या

३. अहिबलचक्रस्य निर्माणं भवति

४. तृतीयपङ्क्तौ

५. कृत्तिकानक्षत्रस्य

६. चन्द्रनक्षत्रम्

७. पञ्चचत्वारिंशत् (45)

८. चन्द्रवत्

९. यदा सूर्याचन्द्रौ सूर्यनक्षत्रे भवतः।

१०. चन्द्रे क्रूरग्रहान्विते

११. न भवति

१२. रत्नम्

१३. ताम्रपात्रे

१४. मृण्मयपात्रे

१५. लौहधातुः

१६. चन्द्रे परमोच्चे स्थिते नक्षत्रसंक्रमे च

१७. निधिसंख्यायाः

१८. अयुतगुणं द्रव्यं लभते

१९. मातृकाः

२०. यदा चन्द्रः शनिग्रहेण समन्वितो भवेत्।

२१. यक्षस्य

२२. मुग्धस्य पूजने

६.१५ अभ्यासप्रश्नाः

१. अहिबलचक्रस्य प्रयोजनपूर्वकं तस्य निर्माणविधिं वर्णयत।

२. स्पष्टचन्द्रसाधनविधिं प्रतिपादयत।

३. भूमेरन्तस्थद्रव्याद्रव्यस्य तत्परिमाणस्य च निर्धारणं सूर्यचन्द्रयोराधारेण कथं क्रियते? विवेचयत।

४. स्थानस्य द्वारं निर्धारणं कथं क्रियते? स्पष्टयत।

५. चन्द्रस्य शुभपापक्षेत्रयोः संस्थितिवशात् कथं द्रव्यलाभालाभं च जानीयात्? निरूपयत।

६. चन्द्रस्य बलाबलानुसारेण कथं द्रव्यविचारो भवति? प्रतिपादयत।

७. चन्द्रोपरि ग्रहदृष्टिवशात् द्रव्यभेदान् लिखत।

८. चन्द्रस्य सूर्यादिग्रहाणां राशौ संस्थितिवशाद्द्रव्यभाण्डनिरूपणं कुर्यात्।

९. चन्द्रस्य संस्थितिवशाद्द्रव्यप्राप्तिस्थाननिर्णयं प्रतिपादयत।

१०. चन्द्रस्य भुक्तांशवशात् षड्वर्गे बलानुसारेण च द्रव्यविचारः निरूपणीयः।

११. नवविधद्रव्याधिष्ठापकविचारः प्रतिपादनीयः।

१२. द्रव्याधिष्ठापकानां पूजाविधिः लेखनीयः।